# गृह्यसंस्कारप्रायश्चित्तानि

पुणेस्थिताय टिळक-महाराष्ट्र-विद्यापीठाय

विद्यावाचस्पति(पीएच्.डी.)पदवीनिमित्तं समर्पितोऽयं प्रबन्धः

संशोधनच्छात्रः

माधव गजानन केळकर

मार्गदर्शकः

डॉ. श्रीपाद भट

श्री बालमुकुन्द लोहिया संस्कृत तथा भारतीयविद्या अध्ययन केन्द्रम्

साहित्यम् एवं ललितकलाविद्याशाखा

जून २०१६

प्रतिज्ञापत्रम्

अहम् अत्र उद्घोषयामि यत् **गृह्यसंस्कारप्रायश्चित्तानि** इति नाम्ना सम्पूर्णः कृतः तथा च लिखितः प्रबन्धः मया इतःपूर्वं कस्यापि पदवीनिमित्तम् अथवा समकक्ष्याय अध्ययनाय कस्मिन्नपि विद्यापीठे अथवा परीक्षणमण्डले प्रस्तुतः नास्ति।

स्थानम् - पुणे माधव गजानन केळकर

दिनाङ्कः संशोधनच्छात्रः

प्रमाणपत्रम्

अत्र प्रमाणीक्रियते यत् **गृह्यसंस्कारप्रायश्चित्तानि** इति नाम्ना विद्यावाचस्पति(पीएच्.डी)पदवीनिमित्तं पुणेस्थितस्य टिळक-महाराष्ट्र-विद्यापीठस्य श्री बालमुकुन्द लोहिया संस्कृत तथा भारतीयविद्या अध्ययन केन्द्रस्य संस्कृतविभागे प्रस्तुतोऽयं प्रबन्धः सम्पूर्णतया मूलभूततया श्री. माधव गजानन केळकर इत्यनेन मम अवधाने तथा मार्गदर्शने सम्पूर्णः कृतः। मम उत्तमज्ञानानुसारं तथा च विश्वासानुसारम् एतस्मिन् प्रबन्धे समावेशितः विषयः अनेन इतःपूर्वं कस्यापि पदवीनिमित्तम् अथवा समकक्ष्याय अध्ययनाय कस्मिन्नपि विद्यापीठे अथवा परीक्षणमण्डले प्रस्तुतः नास्ति।

स्थानम् - पुणे डॉ. श्रीपाद भट

दिनाङ्कः मार्गदर्शकः



कृतज्ञता

**यस्य स्मरणमात्रेण जन्मसंसारबन्धनात्।**

**विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे।।**

यस्य केवलं स्मरणेन एव जन्मनः संसारबन्धः छिन्नः खण्डितः भवति तस्य विष्णोः आदौ स्मरणं कर्तव्यम्। सर्वविधपापानां निरसनं विष्णोः स्मरणेन भवति। तस्य स्मरणं कृत्वा विदुषां पुरस्तात् प्रबन्धममुं प्रस्तोष्यामि।

अद्य मम तातपादानां वेदमूर्तीनां गजानन मधुसूदन केळकरवर्याणां तथा च मम श्वशुराणां वेदमूर्तीनां केशव सीताराम जोगळेकरवर्याणां स्मरणं विशेषतया भवति। मम तातपादाः मह्यं बलात् वेदाध्ययने नियोजितवन्तः। मम श्वशुरवर्याः श्रौतस्मार्तकर्मणाम् आशङ्कानां निरसनं सर्वदा कृतवन्तः। तेषाम् आशीर्वादास्तु सर्वदा मम शिरसि सन्ति एव।

अस्य प्रबन्धस्य मार्गदर्शकाः आद्यप्रेरकाः संस्कृतसम्भाषणस्य मम गुरवः डॉ. श्रीपाद भट महोदयाः। दशमकक्ष्यापर्यन्तं विद्यालयस्तरे मया संस्कृतं नैव अधीतमासीत्। टिळक-महाराष्ट्र-विद्यापीठे संस्कृतसम्भाषणवर्गमाध्यमेन

संस्कृतविषये मयि आस्थां ते एव जनितवन्तः। तदा प्रतिदिनम् एकपृष्ठात्मकं कृतं संस्कृतमाध्यमेन लेखनमेव प्रबन्धस्य अस्य संस्कृतमाध्यमेन लेखने साहाय्यभूतमभवत्। अस्य प्रबन्धस्य लेखनसमयेऽपि ते एव मां तदा तदा प्रचोदितवन्तः। तस्मादेव एतत् कार्यं पूर्णतां गतम्।

प्रबन्धस्यास्य शोधकार्ये भाण्डारकरप्राच्यविद्यासंशोधनमन्दिरम्, टिळकमहाराष्ट्रविद्यापीठम्, तथा च वैदिकसंशोधनमण्डलम् इत्येतासु संस्थासु विद्यमानानां ग्रन्थानाम् उपयोगः मया कृतः। अतः तासां संस्थानां सञ्चालकानां विषये कृतज्ञतां प्रकटीकरोमि।

मया पदव्युत्तरशिक्षणं जून १९९२ तमे आङ्ग्लशताब्दे पूर्णं कृतमासीत्। पञ्चदशवर्षाणि राज्यस्तरे, वर्षद्वयम् अखिलभारतस्तरे संस्कृतभारत्याः दायित्वम् ऊढमासीत्। सप्तदशवर्षाणि निरन्तरं विशिष्टमध्ययनं कृतं नासीत्। परं शिक्षणस्तरे विशिष्टं शिक्षणं पूर्णं कर्तव्यमिति मम पत्न्याः सौ.प्रज्ञायाः आग्रहकारणात् अहं पुनः प्रेरितः अभवम्। तस्याः प्रेरणाकारणादेव अहम् एतत् कार्यं पूर्णं कर्तुं अशक्नुवम्। प्रबन्धस्य मुद्रितशोधनकार्ये साहाय्यभूतौ श्री. मोरेश्वर देवधर तथा च सौ. सुवर्णा बोरकर इत्येतयोः विशेषोल्लेखः आवश्यकः। अन्ये मम गृहसदस्याः, मम गुरवः, मम सहपाठिनः, मम मित्राणि तथा च संस्कृतभारत्याः कार्यकर्तारः विविधप्रकारेण मम साहाय्यभूताः अभवन् तान् प्रति कार्तज्ञं प्रकटीकरोमि।

माधव गजानन केळकर

# अनुक्रमः


| विषयः | पृष्ठक्रमाङ्कः |
|---|---|
| अ) अनुक्रमः | १ |
| आ)प्रस्तावः | ३ |
| इ) उपयुक्ताः सङ्क्षेपाः | ६ |
| ई) विषयारम्भः | ७ |
| उ) गृह्यसंस्कारप्रायश्चित्तानि | १० |
| १) १.०) गर्भाधानम् | २३ |
| १.१) गर्भाधानम्(ऋतुशान्तिः) | २४ |
| १.२) गर्भाधानम्(संस्कारलोपः) | २६ |
| १.३) पुंसवनम् | २७ |
| १.४) अनवलोभनम् | २७ |
| १.५) सीमन्तोन्नयनम् | २८ |
| १.६) विष्णुबलिः | २९ |
| २) २.०) जातकर्म | ३१ |
| २.१) जातकर्म(नित्यहोमलोपः) | ३२ |
| २.२) जातकर्म(जननकालदोषप्रायश्चित्तम्) | ३३ |
| २.३) जातकर्म(जननवैकृतदोषप्रायश्चित्तम्) | ४० |
| २.४) नामकरणम् | ४५ |
| २.५) निष्क्रमणम् | ४५ |
| २.६) अन्नप्राशनम् | ४६ |
| २.७) चौलम् | ४७ |
| ३) ३.०) उपनयनम् | ४९ |
| ३.१) उपनयनम्(कालातिपत्यप्रायश्चित्तम्) | ५० |
| ३.२) उपनयनम्(ब्रह्मचारिव्रतलोपः) | ५३ |

३.३) उपनयनम्(पुनरुपनयनम्) ६४

३.४) समावर्तनम् ६८

४) ४.०) विवाहः ७०

४.१) विवाहः(अग्निनाशः/पुनराधानम्) ७१

४.२) विवाहः(कन्योद्वाहः) ८१

४.३) विवाहः(पुनर्विवाहः) ८३

४.४) विवाहः(सङ्कीर्णम्) ८५

५) ५.०) अन्त्येष्टिः ८८

५.१) अन्त्येष्टिः(देहनाशः) ८९

५.२) अन्त्येष्टिः(अनैसर्गिको मृत्युः) ९४

५.३) अन्त्येष्टिः(मृतशरीरस्य शुद्धिः) ९७

५.४) अन्त्येष्टिः(अशौचनिवृत्तिः/शुद्धिः) ९९

५.५) अन्त्येष्टिः(संकीर्णम्) १०१

६) ६.१) विविधनिमित्तेषु समानप्रायश्चित्तम् १०७

६.२) प्रायश्चित्तानि ११२

६.३) अद्भुतप्रायश्चित्तानि ११५

६.४) यज्ञीयप्रायश्चित्तानि १२५

७) उपसंहारः १४५

परिशिष्टम् १) सन्दर्भग्रन्थसूचिः १५४

परिशिष्टम् २) मन्त्रसूचिः १५९

परिशिष्टम् ३) शब्दसूचिः १६४

परिशिष्टम् ४) चित्रसङ्ग्रहः १६८

# प्रस्तावः

## विषयस्य महत्त्वम्

मानवः जन्मना केवलं मानवः भवति। संस्कारैः तस्मिन् विद्यमानं देवत्वं प्रकाशितं प्रकटितं भवति। मानवस्य देवत्वसिद्ध्यर्थं प्राचीनैः कतिचनसंस्काराः सूचिताः कृताः अनुभूताः च। आरम्भे संस्काराणां पद्धतिः तत्तत् देशानुसारिणी, कालानुसारिणी, ज्ञानानुसारिणी च आसीत्। यथा कालः अग्रतां गतः, तथा तेषु संस्कारेषु नियमितता, बद्धता, एकसूत्रता, कालसापेक्षता इत्यादयः गुणाः वर्धिताः। तेषां संस्काराणां परम्परा रक्षिता भवतु इति कारणेन संस्कारविधयः सूत्रबद्धपद्धत्या ग्रथिताः अभवन्। सूत्राणां विस्तृतविवरणाय स्मृतयः, कारिकाः, प्रयोगाश्च ग्रथिताः अभवन्। विभिन्नग्रन्थेषु विभिन्नाः संस्काराः उक्ताः सन्ति। तेषु षोडशाः सर्वेषु ग्रन्थेषु समानत्वं वहन्ति। अन्ये केचन ग्रन्थकाराः संस्काराणां गणनाविषये विभिन्नया पद्धत्या उपस्थापनं कुर्वन्ति। प्राचीनात् कालात् अद्यपर्यन्तम् उपनयन-विवाह-अन्त्येष्टिः इत्येतेषां त्रयाणां संस्काराणां प्रभावः समाजे विद्यते। उपनयनं नाम ब्रह्मचर्याश्रमस्य विद्याग्रहणस्य आरम्भः, विवाहः नाम गृहस्थाश्रमस्य आरम्भः, तथा च अन्त्येष्टिः नाम जीवनस्य समाप्तिः एतेषां त्रयाणां संस्काराणां महत्त्वं सर्वत्र दृश्यते।

## उद्देश्यम्

विभिन्नेषु ग्रन्थेषु उक्तानि प्रायश्चित्तानि तत्तत् संस्कारानुसारं उक्तानि सन्ति। परं समानसंस्काराय विभिन्नैः सूत्रकारैः यानि प्रायश्चित्तानि उक्तानि तेषां तौलनिकम् अध्ययनं भवेत्। तेषां विश्लेषणात्मकम् अध्ययनं भवेत्। धर्माचरणात् यदि कोपि भ्रष्टः भवति तर्हि तस्य मार्गदर्शनाय उपयुक्तता भवेत्। धर्माचरणे ये मार्गदर्शनं कुर्वन्ति तेषां साहाय्याय सङ्ग्रहोऽयं उपयुक्तः भवेत्। सूत्रवाङ्मये, स्मृतिवाङ्मये, प्रयोगग्रन्थेषु, प्रायश्चित्तविषयग्रन्थेषु च कीदृशः विस्तारः सङ्क्षेपश्च कृतोस्ति तस्य तौलनिकम् अध्ययनं भवेत्।

## सर्वेक्षणम्

प्रायश्चित्तविषयस्य पूर्वाध्ययनं केनापि कृतमस्ति वा? अथवा प्रायश्चित्तविषयस्य अध्ययनं कृतं स्यात् परं तस्मिन् अध्ययने गृह्यसंस्काराणाम् अध्ययनं कृतमस्ति न वा इति ज्ञातुं कतिचनशोधप्रबन्धानां सर्वेक्षणं कृतम्। तेषु कतिचनप्रबन्धेषु प्रायश्चित्तविषये द्वयोः मतानां तुलनात्मकम् अध्ययनं विद्यते। कतिचनप्रबन्धेषु विशिष्टस्य प्रायश्चित्तग्रन्थस्य समीक्षणं विद्यते। कतिचनप्रबन्धेषु पापप्रायश्चित्तयोः तुलनात्मकम् अध्ययनं विद्यते। एकस्मिन् प्रबन्धे श्रौतप्रायश्चित्तानां सङ्ग्रहो विद्यते। परं कुत्रापि गृह्यसंस्काराणां प्रायश्चित्तानां विशिष्य अध्ययनं कृतं न दृष्टम्। अतः गृह्यसंस्कारप्रायश्चित्तानि इत्यमुं विषयमधिकृत्य शोधनम् आरब्धम्।

कानिचन संशोधनानि अधोलिखितरूपेण उपलभ्यन्ते। तानि च

१) आचार्य गीताराणी, रघुनन्दन-कानूमिश्रमतयोः प्रायश्चित्तविषये तुलनात्मकम् अध्ययनम्, पुरी, १९९९

२) बिहारी गोलोका, गोपालन्यायपञ्चानन भट्टाचार्यप्रणीत प्रायश्चित्तनिर्णयस्य समीक्षणात्मकं सम्पादनम्, पुरी, १९८५

३) मिश्रा सङ्घमित्रा, विज्ञानेश्वर-शूलपाणिमतयोः प्रायश्चित्तविषये तुलनात्मकं समीक्षणम्, पुरी, १९९५

४) मुळे रवीन्द्र, श्रौतयागेषु उक्ताः प्रायश्चित्तयः, पुणे, १९९२

५) राय शुभश्री, विश्वरूप-विज्ञानेश्वरयोः प्रायश्चित्तविषये तुलनात्मकम् अध्ययनम्, दिल्ली, २००२

६) रॉय दीप्तिमयी, नागोजीभट्ट-कानूमिश्रग्रन्थेषु प्रायश्चित्तविषयकं तुलनात्मकम् अध्ययनम्, पुरी, १९९९

७) लोकान राजीव, कानूमिश्रप्रणीत प्रायश्चित्तमनोहरस्य समीक्षणात्मकं सम्पादनम्, दिल्ली, १९८८

८) शुक्ला रंजन, प्रमुख स्मृतियो मे वर्णित पाप, प्रायश्चित्त, एवं दण्ड के परिप्रेक्ष्य मे विशेष अध्ययन, आग्रा, १९८९

९) साहू मिनते, प्रायश्चित्तमयूख-प्रायश्चित्तनयनयोः तुलनात्मकम् अध्ययनम्, पुरी, २०००

१०) Gotani Lata Ramakrishnaji , Atonement: Study According to Dharmasastras, Nagapur, 1982

११) Sharma Mukundaram, Theories and Principles of Atonement and Punishment in Hindu Dharmasastras, Gauhati, 1973

## व्याप्तिनिश्चयः

संशोधनस्य आरम्भे गृह्यसूत्राणि, स्मृतयः, प्रायश्चित्तविषयकाः ग्रन्थाः, प्रयोगग्रन्थाश्च अध्येतव्याः इति धारणा आसीत्। परं यथाक्रमं गृह्यसूत्राणाम् अध्ययनम् आरब्धं, पर्याप्तमात्रेण सन्दर्भाः सङ्गृहीताः च। अतः गृह्यसूत्रपरिमितमेव अध्ययनम् इदानीं पर्याप्तं भवेत् इति निश्चित्य प्रबन्धेऽस्मिन् ऋग्वेदस्य त्रीणि (आश्वलायनम्, कौषीतकी, शाङ्खायनम्) शुक्लयजुर्वेदस्य एकं (पारस्करम्) कृष्णयजुर्वेदस्य नव (अग्निवेश्यम्, आपस्तम्बम्, काठकम्, बोधायनम्, भारद्वाजम्, मानवम्, वाराहम्, वैखानसम्, हिरण्यकेशीयम्) सामवेदस्य चत्वारि (कौथुमम्, खादिरम्, गोभिलम्, जैमिनीयम्) अथर्ववेदस्य एकम् (कौशिकम्) एवम् अष्टादशगृह्यसूत्राणां सन्दर्भाः स्वीकृताः सन्ति। यद्यपि मुख्यसन्दर्भाय केवलं गृह्यसूत्राणि स्वीकृतानि तथापि अवान्तरसन्दर्भाय विविधाः प्रयोगग्रन्थाः स्वीकृताः सन्ति।

## उपयुक्ताः सङ्क्षेपाः

१) अग्निवेश्यगृह्यसूत्रम् (अग्नि.गृह्य.)

२) आपस्तम्बगृह्यसूत्रम् (आप.गृह्य.)

३) आश्वलायनगृह्यसूत्रम् (आश्व.गृह्य.)

४) आश्वलायनगृह्यपरिशिष्टम् (आश्व.गृह्यपरि.)

५) काठकगृह्यसूत्रम् (काठ.गृह्य.)

६) कौथुमगृह्यसूत्रम् (कौथु.गृह्य.)

७) कौशिकगृह्यसूत्रम् (कौशि.गृह्य.)

८) कौषीतकगृह्यसूत्रम् (कौषी.गृह्य.)

९) खादिरगृह्यसूत्रम् (खादि.गृह्य.)

१०) गोभिलगृह्यसूत्रम् (गोभि.गृह्य.)

११) जैमिनिगृह्यसूत्रम् (जैमि.गृह्य.)

१२) पारस्करगृह्यसूत्रम् (पार.गृह्य.)

१३) बोधायनगृह्यसूत्रम् (बोधा.गृह्य.)

१४) बोधायनगृह्यपरिभाषासूत्रम् (बोधा.गृह्यपरि.)

१५) बोधायनगृह्यशेषसूत्रम् (बोधा.गृह्यशेष.)

१६) बोधायनपितृमेधसूत्रम् (बोधा.पितृमेध.)

१७) भारद्वाजगृह्यसूत्रम् (भार.गृह्य.)

१८) मानवगृह्यसूत्रम् (मान.गृह्य.)

१९) वाराहगृह्यसूत्रम् (वारा.गृह्य.)

२०) वैखानसगृह्यसूत्रम् (वैखा.गृह्य.)

२१) शाङ्खायनगृह्यसूत्रम् (शाङ्खा.गृह्य.)

२२) हिरण्यकेशिगृह्यसूत्रम् (हिर.गृह्य.)

२३) हिरण्यकेशिगृह्यशेषसूत्रम् (हिर.गृह्यशेष.)

## विषयारम्भः

न राज्यं नैव राजाऽसीत् न दण्डो न च दाण्डिकः।

धर्मेणैव प्रजास्सर्वाः रक्षन्ति च परस्परम्।।

प्राचीनवाङ्मये प्राचीनस्य समाजस्य चित्रणम् एवं प्रकारेण कृतं दृश्यते। सम्पूर्णः समाजः स्वयमनुशासनेन परस्परं नाम आत्मनः अन्यस्य च रक्षणं करोति स्म। तदा कोऽपि राजा नासीत् न राज्यं न दण्डः नैव दाण्डिकः। यदा समाजे पापपुण्ययोः सङ्कल्पनाः दृढमूलाः आसन् तदा अपराधानां सङ्ख्या समाजे न स्यात्, विरला च स्यात्। यथाक्रमं कालः अतीतः, समाजे काचित् अव्यवस्था आरब्धा। क्रमशः नियन्त्रकस्य आवश्यकता आपतिता। तदा राजा आगतः, तदा दण्डः आरब्धः। यथा लौकिके व्यवहारे तथैव धार्मिकेषु आचारेष्वपि आरम्भकाले दण्डः नाम प्रायश्चित्तं नासीत्। परं कालः अतीतः, समाजे शिथिलता, अनास्था, इत्यादयः दोषाः उद्भूताः। क्रमशः लौकिके व्यवहारे तथा धार्मिकेषु आचारेष्वपि अकरणं, कालातिपत्यता, कार्यस्य नाशः इत्यादयः दोषाः समुद्भूताः। तदा प्रायश्चित्तानि आरब्धानि। कदाचित् पराधीनैः कारणैः लौकिकव्यवहारे तथा धार्मिकेषु आचारेष्वपि दोषाः समुद्भूताः तदापि दण्डः नाम प्रायश्चित्तं कर्तव्यत्वेनापतितम्।

कदाचित् प्राचीनैः चिन्तकैः सामाजिकवैज्ञानिकव्यावहारिककारणानि धार्मिकस्य आधारेण योजितानि इति चिन्त्यते जनैः। यथा देवाय रक्षिते वने काष्ठनिमित्तं वृक्षच्छेदनं न कर्तव्यम्। अत्र पर्यावरणरक्षणस्य सन्देशो विद्यते। अत्र केवलं पर्यावरणरक्षणस्य कारणम् उक्त्वा समाजः आचरणं न कुर्यात् अतः देवाय रक्षितं वनम् इति किञ्चित् धार्मिकं भयं प्रतिपादितमस्ति।

प्रत्येकं संस्कारस्य निश्चितः कालः, निश्चितं दिनं, निश्चितः समयः, च भवति। यदि तदा संस्कारः न कृतः तर्हि प्रायश्चित्तं करणीयमेव। परं तत्र केवलं धार्मिकं कारणं नास्ति अपि तु सामाजिकं कारणं, वैद्यकीयं कारणं, मानसिकं कारणम् अपि स्यात्। यथा गर्भाधानस्य विशिष्टकाले गर्भाधाननिमित्तम् आवश्यकानां परिणामानां विचारो भवति यथा गर्भधारणयोग्यता, गर्भसंस्कारः, सुप्रजनत्वम्। तथैव उपनयने विद्याग्रहणयोग्यता, सामर्थ्यं, क्षमता, इत्यादयः विषयाः चिन्तिताः स्युः। विवाहे गृहस्थाश्रमस्यारम्भः भवति। गृहस्थाश्रमस्य आधारेण एव अन्ये त्रयः आश्रमाः सुस्थिताः

भवन्ति। पातिव्रत्यं तथा एकपत्नित्वं समाजस्य धारणाय अत्यावश्यकमेव। अतः समाजस्य व्यवस्था योग्यरीत्या भवतु इति धिया सर्वापि व्यवस्था निर्मिता व्यवस्थापिता इति चिन्त्यते।

उक्तमेव *धारणात् धर्ममित्याहुः धर्मो धारयते प्रजाः* नाम धर्मस्य कार्यमेव प्रजानां धारणम्। अत्र केवलम् रूढार्थेन धर्मः न ग्राह्यः, अपितु प्रत्येकं मनुष्यस्य विविधस्तरे विविधाः धर्माः भवन्ति। यथा छात्रस्य छात्रधर्मः, गृहस्थस्य गृहस्थधर्मः, पितुः पितृधर्मः, गुरोः गुरुधर्मः, नागरिकस्य नागरिकधर्मः। एवं प्रकारेण समानः मनुष्यः विविधस्तरे विविधानां धर्माणां नाम नियमानां पालनं करोति। सर्वेऽपि नियमाः परिणामतः तस्य तस्य मनुष्यस्य रक्षणाय एव निर्मिताः निश्चिताः।

यदा मनुष्यः स्वयमेव निर्मितानां निश्चितानां च नियमानां पालनम् आचरणं वा न करोति अथवा धार्मिकाचारेष्वपि स्वाधीनतया, पराधीनतया धर्मविरुद्धम् आचरणं करोति तदा समाजस्य धारणाय कटिबद्धाः चिन्तकाः दण्डस्य नाम प्रायश्चित्तस्य योजनां कुर्वन्ति। समाजस्य धारणाय विद्यमानः धर्मः क्रमशः ह्रासतां याति। उक्तमेव मनुस्मृत्यां

चतुष्पात्सकलो धर्मः सत्यं चैव कृते युगे।
चौरिकानृतमायाभिर्धर्मश्चापैति पादशः।। १.८१

सत्ययुगे यादृशं योग्यम् आचरणम् आसीत् तत् क्रमशः चौरिकया, अनृतेन, मायया ह्रासतां गतम्। कालः नाम वर्षाणि यथा अतीतानि तथा क्रमशः कालक्रमेण दण्डानां नाम प्रायश्चित्तानां सङ्ख्या वृद्धिं गता। सूत्रग्रन्थेषु ब्राह्मणग्रन्थेषु केवलं धार्मिकाचरणानां विषये प्रायश्चित्तानि उक्तानि परं प्रायश्चित्तमयूखादिग्रन्थेषु धार्मिकप्रायश्चित्तैस्सह लौकिकानि प्रायश्चित्तानि अपि उक्तानि सन्ति।

यानि प्रायश्चित्तानि विविधेषु ग्रन्थेषु सन्ति तेषां द्विधा त्रिधा विभाजनं कर्तुं शक्यते। यथा कृतस्य अपराधस्य, पापाचरणस्य शिष्टानां सभायां प्रकटनम् तदा मानसिकाः क्लेशाः भवन्ति। कृतस्य अपराधस्य, पापाचरणस्य क्षालनाय शारीरकाः क्लेशाः तदर्थं निराहारः, जले निम्मज्जनम् इत्यादयः। कृतस्य अपराधस्य, पापाचरणस्य क्षालनाय पुरोहितद्वारा यज्ञादिः। अत्र कतिचन प्रायश्चित्तानि स्वयं करणीयानि कतिचन अन्यद्वारा कारयित्वा फलं स्वयं स्वीकरणीयम्, प्राप्तव्यम्।

दण्डस्य नाम प्रायश्चित्तस्य व्यवस्था समाजाय निरन्तरं आवश्यकी भवति। समाजे विद्यमानाः सर्वेऽपि मानवाः कदापि बुद्ध्या पापाचरणं, धर्मविरुद्धम् आचरणं न कुर्वन्ति। परं पुनः यदि शुद्धाचरणं, योग्याचरणं कर्तुमिच्छा भवति तर्हि प्रायश्चित्तं कृत्वा शिष्टसम्मतमार्गे, धर्ममार्गे पुनः विचरणं शक्यं भवति। एतादृशी दण्डयोजना, प्रायश्चित्तयोजना यदि नास्ति तर्हि कालक्रमेण पुनः शिष्टसम्मतमार्गं, धर्ममार्गम् आगन्तॄणां मार्गः खण्डितो भवति। अतः एव दण्डस्य, प्रायश्चित्तस्य स्थानं समाजव्यवस्थायां निरन्तरं विद्यते। तस्य न्यूनाधिक्यं कालानुक्रमेण भवेत्।

# गृह्यसंस्कारप्रायश्चित्तानि

## गृह्यः ?

वेदकालात् विविधानाम् आचाराणां वर्णनं विविधेषु ग्रन्थेषु दृश्यते। तत्र महत्त्वपूर्णः आचारः यज्ञः। ऋग्वेदे उक्तं *यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।* अस्यार्थः यज्ञ एव प्रथमः आद्यः धर्मः। नाम यज्ञः महत्त्वपूर्णः आचारः। तेनैव सर्वं साधितं भवति। अत एव सर्वविधेषु आचारेषु यज्ञः भवत्येव। ब्राह्मणग्रन्थेषु विविधानाम् आचाराणां कथाः सन्ति। तत्रापि यज्ञसम्बधिन्यः कथाः अधिकाः विद्यन्ते। तासां कथानाम् उद्देशः नाम कस्मिन् कर्मणि मनुष्यः प्रवृत्तो भवतु, कस्मात् निवृत्तः इति। परं तत्रागतानि सर्वाण्यपि कर्माणि यज्ञसम्बन्धीनि एव। श्रौतसूत्रेषु अपि सर्वत्र अग्निहोत्राधारितानां दर्शपूर्णमासादीनां इष्टीनां नाम यज्ञानाम् एव विधयः वर्तन्ते। गृह्यसूत्रेष्वपि ये सर्वेऽपि विधयः उक्ताः, ते सर्वेऽपि यज्ञाधारिताः एव सन्ति।

सर्वविधानां यज्ञानां कर्ता यजमानः सपत्नीकः भवेत् इति प्रायः नियमः भवति। नाम यजमानः गृहिण्या सहितः भवेदिति। आश्वलायनगृह्यसूत्रस्य प्रथमसूत्रे उक्तम् *उक्तानि वैतानिकानि गृह्याणि वक्ष्यामः* इति। सूत्रस्यास्य नारायणवृत्तौ गृहशब्दः भार्यावाचकः इति स्पष्टम्। सुभाषितेष्वपि *न गृहं गृहमित्याहुः गृहिणी गृहमुच्यते* इति सूचितम्। गृहं नाम भवनम्। परं भवनेन गृहमिति संज्ञा पूर्णा न भवति। तत्र यदा गृहिणी उपस्थिता भवति तदा एव गृहमिति संज्ञा पूर्णा भवति। अन्यत्रापि *सगृहं गृहमागतः* इत्युक्ते सगृहं नाम भार्यया सह गृहमागतः नाम भवनमागतः इति। सर्वस्यास्यार्थः यावत् विवाहो नास्ति तावत् गृहं पूर्णं नास्ति। विवाहे प्रतिगृहीतायां वध्वां भार्यात्वसिद्धिः भवति तथा गृह्याग्नेः सिद्धिरपि भवति। विवाहानन्तरं भार्यया सह ये विधयः भवन्ति ते गृह्याः। भार्यासंयोगात् उत्पन्नाः नाम प्राप्ताः विधयः गृह्याः भवन्ति। अतः विवाहानन्तरमेव गृह्यविधीनाम् आरम्भो भवति। अत एव कतिचन गृह्यसूत्रकारैः ग्रन्थस्य आरम्भः विवाहसंस्कारेण एव कृतोऽस्ति।

**संस्कारः ?**

विश्वेऽस्मिन् मनुष्यजन्मनः सार्थकता भवतु इति धिया मनुष्यः सर्वदा प्रयत्नरतो भवति। केवलं जन्मना एव मनुष्यजन्मनः सार्थकता न भवति। सार्थकता तदा भवति यदा जन्मना जातः मनुष्यः संस्कारात् विशिष्टं कार्यं तथा विशिष्टं स्तरं साधयति, प्राप्नोति च। व्याकरणदृष्ट्या सम् उपसर्गपूर्वकस्य कृ (८ गण, प.प.) धातोः रूपमेतद्। सम्यक् कृतं तत् संस्कृतं भवति। सम्यक् करणं नाम संस्कारः। विविधेषु विषयेषु संस्कारः इति शब्दः उपयुक्तः भवति। धान्यादीनां संरक्षणाय सूर्यस्य आतपे धान्यानि तप्तानि कुर्वन्ति। अत्र धान्यस्य संस्कारः एव भवति। गणितेऽपि मेलनं वा व्यवकलनं नाम सङ्ख्यानां संस्कारः एव। एवं विविधानि उदाहरणानि भवितुमर्हन्ति। संस्कारः इति शब्दः गृह्यसूत्रेषु प्रायो न दृश्यते। तथापि संस्कारशब्दः भाष्यादिषु दृश्यते। संस्कारेण मनुष्ये वा धान्ये वा अन्यविधेषु पदार्थेषु वा अपेक्षिता योग्यता भवति। तथा च दोषाणां निराकरणमपि भवति। योग्यता नाम किम् इति विषये जैमिनिना तन्त्रवार्त्तिके उक्तं *योग्यता च सर्वत्र द्विप्रकारका दोषापनयनेन गुणान्तरोपजननेन च भवति।*(३.८.९) इत्युक्ते संस्काराणां द्वारा दोषाणां निराकरणं तथा गुणानां निर्मितिः एवं कार्यद्वयं भवति। मनुस्मृतावपि उक्तम्

स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः।

महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः।। २.२८

नाम विविधप्रकारेण स्वाध्यायादिना मनुष्यशरीरं शुद्धं निर्मलं ब्रह्मपदयोग्यं च भवति। तदर्थं मनुष्यस्य संस्काराः महत्त्वभूताः। संस्काराः मानवजीवने यथा महत्त्वभूताः तथैव परलोकमार्गेऽपि। अतः मनुष्यजन्मनः प्राक् यथा केचन संस्काराः सूचिताः केचन तथैव प्राणोत्क्रमणानन्तरं निर्जीवदेहस्यापि अन्त्यसंस्काराः सूचिताः सन्ति। यथा मनुस्मृतौ

निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः।

तस्य शास्त्रेऽधिकारोऽस्मिञ्ज्ञेयो नान्यस्य कस्यचित्।। २.१६.

वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम्।

कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च।। २.२६.

जन्मनः प्राक् गर्भाधानादयः, जन्मानन्तरं जातकर्मादयः, प्राणोत्क्रमणानन्तरम् अन्त्यसंस्कारादयः संस्काराः विधेयाः। निषेको नाम गर्भाधानम् तथा श्मशानान्तः नाम अन्त्यसंस्कारः। एतयोः मध्ये ये संस्काराः ते सर्वेऽपि यथाक्रमं करणीयाः। तस्यैव शास्त्रे नाम सर्वकर्मसु नाम धार्मिकेषु आचारेषु अधिकारः स्यादिति। इह नाम पृथिव्याम् इत्युक्ते जीवनकाले तथा च प्रेत्य नाम प्राणोत्क्रमणानन्तरं यस्य सर्वेऽपि शरीरसंस्काराः यथाक्रमं साधिताः सः मनुष्यः योग्यः भवेत् ब्रह्मपदं प्राप्तुम्।

संस्काराः द्विविधाः। तत्र ब्राह्माः नाम गर्भाधानादयः दैवाः नाम पाकयज्ञादयः। तत्र ब्राह्मसंस्काराः १)गर्भाधानम्, २)पुंसवनम्, ३)अनवलोभनम्, ४)सीमन्तोन्नयनम्, ५)जातकर्म, ६)नामकरणम्, ७)निष्क्रमणम्, ८)अन्नप्राशनम्, ९)चौलम्, १०)उपनयनम्, ११)महानाम्नीव्रतम्, १२)महाव्रतम्, १३)उपनिषद्व्रतम्, १४)गोदानव्रतम्, १५)समावर्तनम्, १६)विवाहः, १७)अन्त्यकर्म इति। अत्र विविधैः ग्रन्थकारैः स्वकीयमतानुसारम् इतोऽपि अन्ये संस्काराः सूचिताः सन्ति। ते यथा विष्णुबलिः, कर्णवेधः, उपवेशनम्, अक्षरारम्भः, उत्सर्जनम्, उपाकरणम्, वेदारम्भः इत्यादयः भवन्ति।

तत्र दैवाः संस्काराः त्रिविधाः १)पाकयज्ञाः, २)हविर्यज्ञाः, ३)सोमयज्ञाः। तत्र पाकयज्ञाः सप्त १)अष्टका, २)पार्वणः, ३)श्राद्धम्, ४)श्रवणाकर्म, ५)आग्रहायणी, ६)चैत्री, ७)आश्वयुजी इति। हविर्यज्ञाः सप्त १)अग्न्याधेयः, २)अग्निहोत्रम्, ३)दर्शपूर्णमासः, ४)आग्रयणम्, ५)चातुर्मास्यः, ६)निरूढपशुबन्धः, ७)सौत्रामणिः इति। सोमयज्ञाः सप्त १)अग्निष्टोमः, २)अत्यग्निष्टोमः, ३)उक्थ्यः, ४)षोडशी, ५)वाजपेयः, ६)अतिरात्रः, ७)अप्तोर्यामः। एवं प्रकारेण ब्राह्माः तथा दैवाः संस्काराः उक्तास्सन्ति। गौतमेन केवलं संस्काराः नोक्ताः किन्तु अष्टावात्मगुणाः उक्ताः सन्ति। १)दया, २)क्षान्तिः, ३)अनसूया, ४)शौचम्, ५)अनायासः, ६)माङ्गल्यम्, ७)अकार्पण्यम्, ८)अस्पृहा इति।

## प्रायश्चित्तम् ?

ऋग्वेदे उक्तं *यज्ञेन यज्ञमयजन्तदेवास्तानि धर्माणि प्रथमान्यासन्।* अस्यार्थः यज्ञ एव प्रथमः धर्मः। सः यज्ञः मखेति नाम्नापि उच्यते। मख इत्यस्य अर्थः गोपथब्राह्मणे एवं प्रकारेण दत्तः अस्ति। मा+ख नाम मास्तु छिद्रम् इति। (२.२.५) यज्ञे छिद्रं न भवतु एतदर्थं यजमानः सर्वदा प्रयत्नरतः भवति । प्रारब्धं कार्यं नाम यज्ञादिकं सम्पूर्णं भवतु। कृतस्य यज्ञस्य फलमपि पूर्णं भवतु तत्र किञ्चिदपि लेशः नाम छिद्रं मास्तु। तथापि प्रमादवशात्, अज्ञानवशात्, अकस्मात् यदि कश्चन दोषः वा भवति तर्हि प्रायश्चित्तं कर्तव्यं भवति। शब्दकल्पद्रुमकोषे प्रायश्चित्तशब्दस्य व्युत्पत्तिः एवं दत्तास्ति *प्रायस्य पापस्य चित्तं विशोधनं यस्मात्* इति। वाचस्पत्यम् कोषे शब्दस्यास्य व्युत्पतिः एवं दत्तास्ति *पापक्षयमात्मसाधनत्वेन विधिबोधिते कर्म* इति। आश्वलायनश्रौतसूत्रे उक्तं *विध्यपराधे प्रायश्चित्तिः* (३.१०.१) सूत्रस्यास्य भाष्ये नारायणभट्टेनोक्तं *विहितस्याकरणेऽन्यथाकरणे च प्रायश्चित्तिः कर्तव्या* इत्युक्ते यत् योग्यं यत् शिष्टसम्मतं यत् धर्मसम्मतं तत् नाम विहितम्। तादृशं कार्यं यदि न कृतम् अथवा अन्यप्रकारेण कृतं तर्हि प्रायश्चित्तं करणीयमेव। अत्र पुनः चिन्तयितुं शक्यते यत् कतिचन योग्यानि कार्याणि ज्ञात्वाऽपि न कुर्वन्ति अथवा विपरीतपद्धत्या कुर्वन्ति तत्र प्रायश्चित्तं कर्तव्यं भवति। यथा उपनीतेन प्रतिदिनं त्रिकालं सन्ध्यावन्दनं कर्तव्यम्। सन्ध्यावन्दनेन प्रतिदिनं कृतानां पापानां निरासो भवति। *पापेभ्यो रक्षन्तां मनसावाचाहस्ताभ्यां पद्भ्यामुदरेण शिश्ना।* (आश्वलायनगृह्यपरिशिष्टम् १.१)

प्रायश्चित्तम् इति शब्दविषये स्पष्टीकरणं तथा शब्दस्यास्य व्याख्यानं विविधप्रकारेण विविधैः कृतं दृश्यते। यथा मनुना उद्धृतेन अङ्गिरामतेन-

प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते।
तपो निश्चयसंयुक्तं प्रायश्चित्तमितिस्मृतम्।। ११.४७

प्रायः शब्दः तपः इत्यर्थे योजितः। तपः नाम निश्चितनियमानुसारं निश्चितकालावधौ आचरितव्यं वर्तितव्यमिति। चित्तं नाम निश्चयः। तपसः निश्चयः यदा भवति तदैव तपः सिध्यति। तपसः फलं भवति। अतः निश्चिततपसा यद् सिध्यति तद् प्रायश्चित्तमिति।

याज्ञवल्क्यस्मृत्यां प्रायश्चित्तविषये प्रोक्तम् -

विहितस्याननुष्ठानान्निन्दितस्य च सेवनात्।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति।।
तस्मात्तेनेह कर्तव्यं प्रायश्चित्तं विशुद्धये।
एवमस्यान्तरात्मा च लोकश्चापि प्रसीदति।। ३.२१९,२२०

वर्णाश्रमानुसारं प्रत्येकस्य किं कर्तव्यं किम् अकर्तव्यम् इति निश्चितम् अस्ति। तदनुसारमेव वर्तितव्यम्। नाम येन यत् कार्यं करणीयं तत् कार्यं तेन न कृतम्। तथा च इन्द्रियाणां निग्रहः नास्तीति कारणात् निन्दितपदार्थस्य सेवनं कृतम्। तस्मात् नरस्य पतनं भवति। नरो नाम मनुष्यः स्वस्थानात् च्युतः भवति। अतः तेन प्रायश्चित्तं करणीयं तेन तस्य आत्मा प्रसन्नो भवति। यतः समाजे कदाचित् असत्यमुक्त्वा समाजमान्यता भवेत् परं स्वयमेव स्वात्मानं वञ्चयितुं न शक्नोति। अतः आत्मनः सन्तोषः अनिवार्यः एव। तथा च लोकाः नाम समाजे विद्यमानाः जनाः प्रसन्नाः भवन्तीति। मनुनापि प्रोक्तं-

अकुर्वन्विहितं कर्म निन्दितं च समाचरन्।
प्रसक्तश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः।। ११.४४

अर्थात् वर्णाश्रमानुसारं विहितं निश्चितं कार्यं न कृतं तथा च इन्द्रियाणां वशं गत्वा निन्दितं कार्यं यदि कृतं तर्हि प्रायश्चित्तं करणीयं भवतीति।

प्रायश्चित्तं जानन् अपि यः जिज्ञासवे प्रायश्चित्तं न वदति सोऽपि पापभाग् भवति। यथा अङ्गिरामतेन

आर्तानां मार्गमाणानां प्रायश्चित्तानि ये द्विजाः।
जानन्तो न प्रयच्छन्ति तेऽपि तद्दोषभागिनः।।

अतः प्रायश्चित्तम् उपदिश्य समाजः योग्येन मार्गेण नेतव्यः इत्यपि महत्कार्यमेव। शब्दकल्पद्रुमकोषस्य तृतीयभागे ३२१ पृष्ठात् ३६४ पृष्ठपर्यन्तम् प्रायश्चित्तप्रसङ्गानां महान् सङ्ग्रहो विद्यते।

## प्रायश्चित्तिः प्रायश्चित्तं वा

विविधेषु ग्रन्थेषु प्रायश्चित्तिः इति शब्दो विद्यते, परं कुत्रचित् प्रायश्चित्तमिति। परं शब्दद्वयमपि समानार्थेनैव उपयुक्तम् अस्ति। ऐतरेयब्राह्मणे *सा तत्र प्रायश्चित्तिः* इति वाक्यं बहुवारं दृश्यते। (३२.१८) आश्वलायनश्रौतसूत्रेऽपि *विध्यपराधे प्रायश्चित्तिः* (पूर्वषट्क.३.१०.१) इति वाक्यं दृश्यते। कौथुमगृह्यसूत्रे *कर्तव्यं स्यात्प्रायश्चित्तिः* (४) इति वाक्यं बहुत्र दृश्यते। कौशिकगृह्यसूत्रेऽपि *सा तत्र प्रायश्चित्तिः* (१११.१०) इति वाक्यं विद्यते। प्रायः प्राचीनग्रन्थेषु प्रायश्चित्तिः इति शब्दो विद्यते। व्याकरणशास्त्रे समासाश्रयविधिप्रकरणे *पारस्करप्रभृतीनि च संज्ञायाम्*(६.१.१५७) इति सूत्रस्य विवरणे *प्रायस्य चित्तिचित्तयोः* इति वार्तिकम् उद्धृतमस्ति। तत्र प्रायश्चित्तिः प्रायश्चित्तम् वा द्वयोः शब्दयोः साधुप्रयोगत्वेन उल्लेखो विद्यते। तत्र प्रायः तपः चित्तिः निश्चयः एवं विवरणं विद्यते। आधिकांशस्थानेषु उत्तरकालीनग्रन्थेषु प्रायश्चित्तम् इत्येव शब्दो दृश्यते। यथा शब्दकल्पद्रुमकोषे प्रायश्चित्तम् इति नपुंसकः शब्दः अस्ति। वैखानसगृह्यसूत्रे *जातकाग्नौ समुत्सन्ने तद्भस्म पूर्वत्समिधमारोप्य लौकिकाग्नौ निधाय प्रायश्चित्तं हुत्वा तथैव जुहुयात्* (६.४) इति। जैमिनिना रचिते मीमासाशास्त्रे *अर्थसमवायात्प्रायश्चित्तमेकदेशेऽपि* (जैमिनीयन्यायमाला ६.४.१०) अत्र प्रायश्चित्तम् इति शब्दो दृश्यते। स्मृतिग्रन्थेषु अपि प्रायश्चित्तम् इति शब्दो दृश्यते। यथा मनुस्मृतौ

प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते।
तपो निश्चयसंयुक्तं प्रायश्चित्तमितिस्मृतम्।११.४७

याज्ञवल्क्यस्मृतौ अपि

तस्मात्तेनेह कर्तव्यं प्रायश्चित्तं विशुद्धये।३.२२०

अतः प्रायश्चित्तिः प्रायश्चित्तं वा शब्दार्थस्तु समान एव। अतः कर्तव्यमपि समानमेव।

## प्रायश्चित्तकारणानि

१) **कालातिक्रमे** -- *अष्टमे वर्षे ब्राह्मणमुपनयेत्*(आश्व.गृह्य.१.१९.१) नाम अष्टमे वर्षे ब्राह्मणस्य उपनयनं कर्तव्यम् इति तु स्पष्टमेव परं तस्मिन्काले उपनयनं नाभवत् तदा *आषोडशाद् ब्राह्मणस्यानतीतकालः* (आश्व.गृह्य.१.१९.५) इति सूत्रेण षोडशवर्षपर्यन्तं वा उपनयनं करणीयमेव परं तदपि न कृतं तदा प्रायश्चित्तं करणीयं भवेत्। *पतितसावित्रीकः उद्दालकव्रतं चरेत्* (आश्व.गृह्य.१.१९.६) इति भाष्यवाक्येन यस्य योग्ये विहितसमये उपनयनं नाभवत् सः पतितसावित्रीकः भवति। तेन उद्दालकव्रतं करणीयं तदेव प्रायश्चित्तं भवति। अत्र उपनयनस्य विहितकालं ज्ञात्वाऽपि उपनयनं न कृतं तस्मात् प्रायश्चित्तम्।

२) **अज्ञानवशात् जाते अपराधे** -- अज्ञानवशात् वा कश्चन अपराधः जातः तदापि प्रायश्चित्तं कर्तव्यमिति। विवाहाग्निः सर्वदा रक्षणीयः इति नियमः। हिरण्यकेशिगृह्यसूत्रे विवाहाग्निविषये उक्तं *नित्यो धार्यः। अनुगतो मन्थ्यः श्रोत्रियागाराद्वाहार्यः। उपवासश्चानुगते भार्यायाः पत्युर्वा।*(१.७.३-५) आश्वलायनगृह्यसूत्रे *यदि तूपशाम्येत्पत्न्युपवसेदित्येके।* (१.९.३) एवं विवाहाग्नेः रक्षणार्थं बहुधा यत्नः करणीयः अग्निः नित्यः रक्षणीयः  तथापि अकस्मात् अग्निः नष्टः शान्तः भवति अग्नेः उपशमः भवति तदा अग्निमन्थनं कृत्वा पुनः स्थापनीयः अथवा अन्यस्मात् अग्निरक्षकस्य गृहाद् आनेतव्यः तथा भार्यया यजमानेन उपवासः करणीयः। इत्येव प्रायश्चित्तमुक्तम्।

३) **अकस्मात् प्राप्ते कारणे** -- यत्र मनुष्यः सर्वथा पराधीनः तादृशानि कतिचनकारणानि भवन्ति। यथा बोधायनगृह्यसूत्रे उक्तं *भग्ननष्टदुष्टविपरीतस्फुटितद्विजश्वबिडालकाक-स्वरमृगपशुपक्षिसरीसृपाणामन्यत्कीटो वा ऋत्विजोऽग्नीन्तरा गच्छेत् दुर्गा, मनस्वती, महाव्याहृतीस्तिस्रस्तन्तुमतीर्जुहुयात् । सैव ततः प्रायश्चित्तिः।* (४.८.१) नाम अग्नेः तथा ऋत्विजः मध्यात् न गन्तव्यमिति। परं कश्चन कीटः प्राणिः अकस्मात् गच्छेत् तदा प्रायश्चित्तं करणीयमिति।

## प्रायश्चित्तप्रकाराः

१) **होमः** -- प्राधान्येन प्रायश्चित्तविषये होमः करणीयः इति दृश्यते। एतादृशानि बहूनि उदाहरणानि सन्ति यत्र होमः एव करणीयः भवति। अत्र कपोतः यदि यज्ञशालायां पतितो वा प्रविष्टः तदा *देवाकपोत* इति मन्त्रेण होमः करणीयः इति। आश्वलायनगृह्यसूत्रे उक्तं-*कपोतश्चेदगारमुपहन्यादनुपतेद्वा देवाः कपोत इति प्रत्यृचं जुहुयात्।* (३.८.७)

२) **उपवासः** -- विवाहाग्निः सर्वदा रक्षणीयः इति नियमः परं यदि अग्नेः उपशमः भवति तदा पत्न्या उपवासः करणीयः। आश्वलायनगृह्यसूत्रे उक्तं *यदि तूपशाम्येत्पत्न्युपवसेदित्येके*(१.९.३)

३) **समानं कार्यं पुनः कर्तव्यम्** -- विवाहाग्निः द्वादशदिनपर्यन्तं नष्टः तदा पुनः आधानं करणीयं नाम पुनः अग्निः स्थापनीयः। बोधायनगृह्यपरिभाषासूत्रे उक्तं *द्वादशाहं विच्छिन्नः पुनराधेयः इति* (१.१६.२८)

४) **मन्त्रजपः** -- यदि प्रणीतापात्रं भिद्यते तदा प्रणीतापात्रस्य अभिमन्त्रणं करणीयमिति, नाम उक्तस्य मन्त्रस्य जपः करणीयः। बोधायनगृह्यसूत्रे उक्तं *अथ यदि प्रणीतापात्रं भिद्येत तदभिमन्त्रयते - अभिन्नो घर्मो जीरदानुर्यत आत्तस्तदगन् पुनः इति* (४.१.५)

५) **शरीरशुध्यर्थं मन्त्रजपः** -- यज्ञकाले केवलं मन्त्राणाम् उच्चारणं सम्मतं भवति। अन्यत् सम्भाषणं यदि कृतं तर्हि विष्णुदैवतमन्त्रः उच्चरणीयः तेन शुद्धिः भवति। गोभिलगृह्यसूत्रे उक्तं *यद्ययज्ञियां वाचं वदेत् वैष्णवीमृचं यजुर्वा जपेत् इति* (१.६.१९)

६) **समानं साधनं पुनः स्वीकरणीयम्** -- यज्ञार्थं बहूनि साधनानि उपकरणानि आवश्यकानि भवन्ति। तेषां साधनानां यदि नाशः भवति अन्यत् स्वीकरणीयम्। अन्यस्य स्वीकरणेऽपि नियमः उक्तः यत् यथालिङ्गं नाम पूर्वतनस्य उपकरणस्य यथा आकारादिः आसीत् तथैव

नूतनस्यापि स्यादिति। बोधायनगृह्यसूत्रे उक्तं ***सर्वत्र दर्वीकूर्चप्रस्तरपरिधि-बर्हिःपवित्रेध्मद्रव्यसम्भाराणां चेद्दाहोपघातेषु नाशे विनाशे वाऽन्यं यथालिङ्गं कृत्वा यथालिङ्गमुपसाद्य इति***(४.२.१)

७) **स्नानं वा अभिषेकः** -- यदा यमलजननं भवति तदा चतुर्षु कलशेषु विशेषतया सिद्धीकृतेन जलेन स्नानं करणीयम्। तत्र प्रायश्चित्तस्वरूपं स्नानम् अभिषेकः वा। बोधायनगृह्यशेषसूत्रे उक्तं ***अथातो यमलकल्पं व्याख्यास्यामः पत्नी गावो वा यमलौ विजायेरन् तस्य संस्कारः प्राङ्नामकरणात् कार्यः। ब्राह्मणाननौज्ञाप्य चतुर्णां क्षीरवृक्षाणां कषायानाहरेयुः, प्लक्षन्यग्रोधाश्वत्थोदुम्बराणां चतुर उदकुम्भान् पूरयित्वा चतस्रो विधवा ब्रह्मचारिणो वा हिरण्यमन्तर्धाय स्नापयेयुश्शतधारेण वा कृत्वाऽभिषिञ्चति इति*** (३.४.१,२)

८) **जलेन सर्वं साधनीयम्** -- होमकालः सन्निहितः परम् अग्निः नास्ति, इन्धनं नास्ति, हवनीयद्रव्यं नास्ति तदा अन्यत् किमपि अकृत्वा जलेन सर्वं साधितं भवति। अत्र जलेन एव जले आहुतिः दातव्या इति। वैखानसगृह्यसूत्रे उक्तं ***प्रवासेऽध्वनि परस्य गेहे च भोक्ष्यन्लौकिकाग्नाविन्धनाभावे भस्मापोह्याङ्गारेऽङ्गाराभावे जले वा जुहोति। अन्नाभावे जलेनैव वैश्वदेवं कुर्यात्। वैश्वदेवान्ते यत्नेनातिथिमभ्यागतं च भोजयति इति*** (६.१८.३-५)

## प्रायश्चित्तकालाः

१) **कर्मणः समाप्तौ** -- यत् कार्यं यज्ञादिकम् आरब्धं तत्र यदि दोषो भवति अथवा तत्र दोषः जातः इति आशङ्कां मनसि निधाय यज्ञस्यान्ते प्रायश्चित्तं करणीयमिति। यज्ञे विविधाः दोषाः भवितुमर्हन्ति यथा यज्ञकुण्डसंस्कारे दोषः। अत्र विविधानि कारणानि उक्तानि सन्ति तानि कारणानि यदा भवन्ति तदा प्रत्येकं कारणस्य निमित्तं पृथक् पृथक् प्रायश्चित्तं नास्ति। सपदि प्रायश्चित्तम् अकृत्वा यज्ञस्यान्ते प्रायश्चित्तं कर्तव्यमिति।

बोधायनगृह्ये उक्तं *अथ विपरीतदर्भास्तरणपवित्रकरणपात्रासादनप्रोक्षणीसंस्कारब्रह्म प्रणीताहविर्निर्वापणआज्यसंस्कारस्त्रुक्सम्मार्जनपरिधिपरिषेचनइध्माभ्याधानविपरीतेषु प्रायश्चित्तं - ततं म आपः, यत्पाकत्रा, मनस्वती, मिन्दाहुती, महाव्याहृतीः, व्याहृतयश्च प्रायश्चित्तं जुहुयात् इति* (४.७.१)

२) **कर्मणः आरम्भे** -- अपेक्षिते विहिते काले नाम अष्टमे ब्राह्मणस्य, एकादशे क्षत्रियस्य, द्वादशे वैश्यस्य यदि उपनयनं नाभवत् तर्हि यदा कदापि उपनयनं कर्तुमिच्छा भवति तदा विलम्बितस्य उपनयनस्य आरम्भे एव कालातिपत्यदोषपरिहारार्थं प्रायश्चित्तं कृत्वा विलम्बितम् उपनयनं पूर्वोक्त विधिना कर्तुमर्हति। यथा वैखानसगृह्यसूत्रे उक्तं *गर्भाधानाद्यष्टमे वर्षे ब्राह्मणस्योपनयनं श्रेष्ठं तदसम्भवे नवमे दशमे वाप्याषोडशात्कुर्यात्। षोडशे वर्षेऽतीते पूर्वोक्तमुद्दालकप्रायश्चित्तं गर्भाधानादि च कृत्वा शुद्धे ब्राह्मणभोजनसुवर्णपशुदानानि कुर्यात्। पिता चान्द्रायणं चरित्वा तस्य जातकाग्निमाधायाघारं हुत्वा मिन्दाहुती पूर्णाहुती ब्राह्मं वैष्णवश्चाष्टशतमावर्त्य हुत्वा पूर्ववदुपनयनं कुर्यात् इति।*(६.७.५-७) इत्युक्ते विहिते निश्चिते काले उपनयनं न कृतम्। तदा उद्दालकप्रायश्चित्तं गर्भाधानादयः पूर्वसंस्काराः च कर्तव्याः। चान्द्रायणप्रायश्चित्तं कृत्वा होमं कृत्वा उपनयनं कुर्यात्।

३) **कर्मणः मध्ये** -- यज्ञकाले केवलं यज्ञसम्बन्धिनः मन्त्राः एव उच्चारणीयः इति नियमः। परं कदाचित् अयज्ञीया वार्ता भवति कदाचित् लौकिकः वार्तालापः भवति तदा विष्णुदैवतमन्त्रं उच्चार्य अग्रे यज्ञकार्यं कर्तव्यमिति। गोभिलगृह्यसूत्रे उक्तं *यद्ययज्ञियां वाचं वदेत् वैष्णवीमृचं यजुर्वा जपेत् इति।* (१.६.१९)

४) **अकस्मात् प्राप्ते कारणे/समये** -- अकस्मात् कश्चन दोषः आपत्तिः वा भवति तदा शीघ्रमेव प्रायश्चित्तं कर्तव्यं भवति। अत्र कोपि यज्ञः नारब्धः, न कोपि विलम्बितः संस्कारः करणीयः अस्ति। अकस्मादेव प्राप्तेन प्रसङ्गेन प्रायश्चित्तम् आपतितमस्ति।

कपोतस्य प्रवेशः अशुभसूचकः अरिष्टकारकः अतः कपोतः गृहे प्रविष्टः पतितो वा तदा देवाः कपोत इति मन्त्रेण होमप्रायश्चित्तम् करणीयमिति। यथा आश्वलायनगृह्यसूत्रे *कपोतश्चेत् अगारमुपहन्यादनुपतेद्वा देवाः कपोत इति प्रत्यृचं जुहुयाज्जपेद्वा इति।* (३.८.७)

## प्रायश्चित्तफलानि

१) **दोषनिराकरणं** -- प्रायश्चित्तेन कृतस्य दोषनिराकरणं भवति। बुद्ध्या कृतः दोषः अथवा अकस्मात् प्राप्तकारणात् जातः दोषः स्यात्। सर्वेषां दोषाणां निराकरणं कृत्वा अग्रे मार्गक्रमणं कुर्यात्।

२) **मनसः समाधानम्** -- मया कश्चन अपराधः कृतः इति मानसिकभावनया कोऽपि मनुष्यः जीवितुं न शक्नोति। अतः अपराधस्य प्रायश्चित्तं कृत्वा मनसः समाधानं प्राप्तुं शक्नोति।

३) **भीतिनाशः** -- अकस्मात् घटितेन कारणेन मनुष्यस्य मानसं भीतियुक्तं भवति। यदि प्रायश्चित्तं कृतं तर्हि मनुष्यस्य भीतिनाशः भवितुमर्हति। अग्रे सधैर्यं कार्यं कर्तुं शक्नोति।

## प्रायश्चित्तविषये अनुवृत्तिः

पाणिनेः अष्टाध्याय्याम् अनुवृत्तिः इति काचित् व्यवस्था दृश्यते। तस्याः व्यवस्थायाः स्वरूपम् एवं प्रकारेण अस्ति। क्रमशः यानि सूत्राणि विद्यन्ते तेषु उत्तरोत्तरविद्यमानेषु सूत्रेषु यदि कश्चन शब्दः न दृष्टः तर्हि पूर्वसूत्रात् अपेक्षितस्य शब्दस्य अनुवर्तनं कृत्वा तस्य सूत्रस्य अर्थावबोधः साधनीयः। व्याकरणशास्त्रस्य वार्तिके उक्तं सूत्रेष्वदृष्टं पदं सूत्रान्तरात् अनुवर्तनीयं सर्वत्र इति। एषा एव व्यवस्था श्रौतसूत्रात् गृह्यसूत्रेषु अनुवर्तनम् इति प्रकारेण दृश्यते।

आश्वलायनगृह्यसूत्रस्य आरम्भः एव *उक्तानि वैतानिकानि गृह्याणि वक्ष्यामः* इति वाक्येन अस्ति। तेन स्पष्टमेव यत् श्रौतसूत्राणां अनुवर्तनं कृत्वा एव गृह्यसूत्राणि उक्तानि सन्ति। आश्वलायनगृह्यसूत्रे *चरवः* (आश्व.गृह्य.३.६.२,३) इति सूत्रस्य

स्पष्टीकरणं नारायणवृतौ एवं प्रकारेण उक्तमस्ति *ये पुरोडाशास्तेषां स्थाने चरवः कार्याः तानेव कामानाप्नोति।* नाम श्रौतसूत्रे यत्र यत्र पुरोडाशाः हविरूपेण उक्ताः तत्र चरुः हविरूपेण स्वीकर्तव्यः देवताः ताः एव।

अग्निवेश्यगृह्यसूत्रेऽपि उक्तं *य आहिताग्नेर्धर्मस्य धर्मो य आहिताग्नेः लोकस्य औपासनिकस्य इति शाट्यायनीयं ब्राह्मणं भवति। तत्र ये पुरोडाशास्त इह चरवः।*(अग्नि.गृह्य.२.७.९)

भारद्वाजगृह्यसूत्रेऽपि उक्तं *अथ गृह्यप्रायश्चित्तानि यानि स्मर्यन्ते तानि वक्ष्यामः शेषाणि वैतानिकानि स्युर्होमदेवतायाः समाम्नानात्फलश्रुतेश्च या एवाग्निहोत्रे देवतास्ता औपासने य एवाहिताग्नेर्धर्मः स एव धर्मो य एवाहिताग्नेर्लोक स एवौपासनिकस्येति शाट्यायनिब्राह्मणं भवति तत्र ये पुरोडाशास्त इह चरवः पयोदधिपृषदाज्यानामाज्यवत्संस्कारो न।* (भार.गृह्य.३.१८)

बोधायनगृह्यपरिभाषासूत्रेऽपि उक्तं *येऽमुत्र पुरोडाशास्त इह चरवो यथादैवतं याज्यापुरोनुवाक्याः योऽमुत्र वषट्कारस्स इह स्वाहाकार इति। (बोधा.गृह्यपरि.२.१.३७)

अतः श्रौतसूत्रेषु यादृशाः केचन प्रसङ्गाः यज्ञाः होमाः वर्णिताः सन्ति तादृशाः एव प्रसङ्गाः यज्ञाः होमाः यदि गृह्यसूत्रे प्राप्ताः तर्हि समानं कार्यं, समानाः देवताः, वषट्कारस्य स्थाने स्वाहाकारः परं हविस्तु पुरोडाशः न भवेत् अपि तु चरुः भवेत्।

आश्वलायनश्रौतसूत्रे उक्तं *शिष्टाभावेप्रतिनिधिः* इति (आश्व.श्रौत.पूर्वषट्क. ३.१०.२) अनेन ज्ञायते यत् श्रौतसूत्रे यानि कारणानि उक्तानि तान्येव कारणानि यदि गृह्यसन्दर्भेण भवन्ति तदा पुरोडाशस्य अभावे चरुं स्वीकुर्यात्। गृह्यकर्मणि पुरोडाशः नोपलब्धः अतः प्रतिनिधिरूपेण चरुः स्वीकर्तव्यः। श्रौतयागकाले तथा च गृह्यसंस्कारकाले कतिचनसमानप्रसङ्गाः भवितुमर्हति। एवं श्रौतसूत्रेषु यादृशाः प्रसङ्गाः यानि च कारणानि उक्तानि तादृशाः प्रसङ्गाः तानि च कारणानि गृह्यसन्दर्भे घटितानि भवन्ति तदा श्रौतसूत्रात् अनुवृत्तिः कर्तव्या मार्गदर्शनं च प्राप्तव्यम्।

कतिचनकारणानि यानि श्रौतेषु गृह्येषु च समानानि भवितुमर्हन्ति। ब्राह्मणग्रन्थात् तथा श्रौतसूत्रात् कतिचन उदाहरणानि तत्तत् स्थाने उल्लिखितानि सन्ति।

१) यदि यमलयोः जननम् भवेत्।

२) यदि व्रतभङ्गः भवेत्।

३) यदि व्याधिरहितोऽपि विलम्बेन उत्थितो भवेत्।

४) यदि अग्नेः उपशमः/नाशः भवेत्।

५) यदि अग्निद्वयसंसर्गः भवेत्।

६) यदि अन्यग्रामगमनम् आपतितम्।

७) यदि दहनाय अग्निसंस्काराय मृतशरीरं न प्राप्तम्।

८) यदि विविधानां ज्ञाताज्ञातानां प्रमादानां परिमार्जनम् आवश्यकम्।

९) यदि विविधाः अद्भुतप्रसङ्गाः भवेयुः।

१०) यदि यज्ञे जातं न्यूनं समाप्तं भवितुमिच्छति।

११) यदि सर्वविधयज्ञानां पूर्णता भवतु।

१२) यदि यज्ञसाधनानि नष्टानि भग्नानि ज्वलितानि भवेयुः।

१३) यदि विपरीतं कार्यं भवेत्।

१४) यदि अन्तरागमनं भवेत्।

१५) यदि अयज्ञियं भाषणं भवेत्।

१६) यदि अशुद्धं मन्त्रपठणं भवेत्।

१७) यदि होमकाले अग्निः होमकुण्डात् बहिरागतः।

१८) यदि अग्नि स्वयमेव प्रज्वलितः भवेत्।

१९) यदि प्रायश्चित्तस्य स्पष्टोल्लेखः न स्यात्।

२०) यदि कश्चन प्राणिः पक्षिः वा यज्ञस्य नाशं कुर्यात्।

२१) यदि होमाय स्वीकृतम् हविर्द्रव्यम् अव्यवस्थितं भवेत्।

२२) यदि होमः मध्ये एव विच्छिन्नः भवेत्।

२३) यदि होमस्य मध्ये जलेन अग्निनाशः भवेत्।

२४) यदि प्रायश्चित्तम् अकृत्वा अग्रिमः होमः प्राप्तः।

## १) गर्भाधानम्

विवाहनन्तरं पतिगृहे दम्पत्योः प्रथमसंयोगात्पूर्वमयं संस्कारो भवति। योग्ये शुद्धे दिने शुभे नक्षत्रे मासिकधर्मानन्तरं (रजोदर्शनान्तरम्) पञ्चमे षष्ठे वा दिने संस्कारोऽयं भवति। परं रजोदर्शनात् षोडशदिनपर्यन्तमेव भवति। वैद्यकीयशास्त्रानुसारं षोडशदिनपर्यन्तमेव गर्भधारणायाः शक्यता वर्तते। यथा बीजवपनात्पूर्वं भूम्याः योग्यतासम्पादनार्थं कर्षणादीनि कार्याणि कृषीवलः करोति। तथैव दम्पत्योः प्रथमसंयोगात्पूर्वमयं संस्कारो भवति। तत्र धार्मिकविधिना यज्ञादि कृत्वा पत्न्याः दक्षिणनासापुटे अश्वगन्धारससेचनं दूर्वारससेचनं वा मुख्यभूतं भवति। अश्वगन्धारससेचनं दूर्वारससेचनं वा अपेक्षितस्य गर्भस्य वर्धनाय रक्षणाय च लाभदायकं भवति। अत्र न केवलं धार्मिकसंस्कारः विद्यते अपि तु तेन सह वैद्यकीयोपचारोऽपि विद्यते। संस्कारोऽयं न गर्भस्य अपि तु क्षेत्रस्य। यस्यां गर्भधारणा भवेदिति अपेक्षा अस्ति तस्याः संस्कारः। सुप्रजा यदा भवति तदैव स्वकीयपरम्परायाः, कुलपरम्परायाः रक्षणं भवति। अत एव जननानन्तरं संस्काराणामारम्भः न भवति अपि तु जननात्पूर्वं क्षेत्रस्य संस्कारं कृत्वैव बीजवपनं करोति पतिः। मनुना निषेकः(नि+सिच्) इति शब्दः योजितः अस्ति। तदर्थं गर्भाधानसंस्कारः महत्त्वभूतः।

## १.१) गर्भाधानम् (ऋतुशान्तिः)

⇒ **यदि अयोग्य(दूषित)समये प्रथमं रजोदर्शनं भवेत्।**

पत्न्याः प्रथमरजोदर्शनसमये कश्चन अशुभः कालः नाम कश्चन अशुभः मासः यथा पौषमासः, काचित् अशुभा तिथिः यथा अमावास्या, कश्चन अशुभः वासरः यथा शनिवासरः, किमपि अशुभं नक्षत्रम् यथा विशाखा, कश्चन अशुभः योगः यथा वैधृतिः, कश्चन अशुभः करणः यथा विष्टिः, अशुभं लग्नं यथा मेषलग्नम् एवं यदि भवति तर्हि गर्भाधानसमये किमपि काठिण्यं न भवतु तदर्थं गर्भाधानसंस्कारात् प्राक् ऋतुशान्तिः कर्तव्या भवति। अत्र मासादिः उदाहरणरूपेण एकैकं स्वीकृतमस्ति। अत्र चिन्तनीयः विषयः नाम गर्भाधाने दोषः न भवेदिति धिया शान्तिः क्रियते। अनया शान्त्या नारी नाम पत्नी दोषमुक्ता भवति। दोषमुक्ते स्थले गर्भाधानं कर्तव्यमिति। भारतीयपरम्परायां विवाहस्य उद्देश्यः केवलं लैङ्गिकसुखमिति न, अपि तु सुप्रजननम् इति। अत एव गर्भाधानात् प्रागेव कीदृशी प्रजा भवेदितिविषये प्रगाढं चिन्तनं कृतमस्ति पूर्वजैः। अतः क्षेत्रसंस्कारः मुख्यः। अतः तत् क्षेत्रं निर्दुष्टं शुद्धं च भवेत्। एषा ऋतुशान्तिः पत्न्याः रजोदर्शनानन्तरं चतुर्थे वा पञ्चमे दिवसे वा करणीया भवति। विवाहात् प्राक् यद्यपि रजोदर्शनम् अभवत् तथापि ऋतुशान्तिः विवाहानन्तरम् एव कर्तव्या। ऋतुशान्तिः दुष्टमासादिसूचितसर्वारिष्टं दूरीकरोति। एषा शान्तिः प्रायश्चित्तमेव। शान्तिरेषा सर्वेषु गृह्यसूत्रेषु न दृश्यते। परं सर्ववेदशाखापरम्परावलम्बिनः तत् तत् शाखीयानां मन्त्राणां द्वारा कुर्वन्ति।

बोधायनगृह्यशेषसूत्रे हिरण्यकेशीगृह्यशेषसूत्रे च शान्तिविधाने देवताः होमादिकं सर्वं विस्तरेण उक्तमस्ति। अत्र केवलं शान्तिविधानस्य आरम्भः तथा च अन्तः स्वीकृतः अस्ति।

➢ अथ ऋतुशान्तिं व्याख्यास्यामः तिथिवारनक्षत्रयोगकरणलग्नदोषशान्त्यर्थं चतुर्थे वा पञ्चमेऽह्नि वा शान्तिस्नानं प्रकुर्वीत।.......एवं यदि शान्तिं कुर्यात्ततो नारी दोषान्मुच्यते सर्वारिष्टशान्तिरस्तु। (बोधा.गृह्यशेष.५.३.१-२०) (हिर.गृह्यशेष.१.३.११)

वैखानसगृह्यसूत्रे रजोदर्शनस्य चतुर्थ्यां नवप्रायश्चित्तानि कर्तव्यानि इति उल्लेखो विद्यते।

- ततोऽपरस्यां रात्रौ चतुर्थ्यामलंकृत्याग्निमुपसमाधाय नव प्रायश्चित्तानि जुहुयात्। (वैखा.गृह्य.३.८.२)

हिरण्यकेशीगृह्यसूत्रे चतुर्थ्यां नवप्रायश्चित्तानि कर्तव्यानि एवं सूचितमस्ति।

- चतुर्थ्यामपरात्रेऽग्निमुपसमाधाय प्रायश्चित्तिपर्यन्तं कृत्वा नव प्रायश्चित्तीर्जुहोति। (हिर.गृह्य.१.७.२३)

एवं प्रकारेण त्रिषु गृह्येषु दुष्टकाले रजोदर्शनस्य निवारणाय उपायाः सूचिताः सन्ति।

⇒ **यदि ऋतुकाले मैथुनं न कृतम्।**

विवाहस्य उद्देश्यः वंशसातत्यम्, वंशसातत्येन कुलपरम्परा रक्षिता भवति। अतः योग्यया भावनया गृहस्थेन ऋतुकाले मैथुनं कर्तव्यमेव। परं ऋतुकाले मैथुनं न कृतं तर्हि प्रायश्चित्तं कुर्यात्। यावन्तः ऋतुकालाः त्यक्ताः भवन्ति तावन्तः सन्ततिशक्यताः नष्टाः भवन्ति। तेन वंशवर्धने विलम्बः भवति अतः प्रायश्चित्तं कुर्यात्। बोधायनगृह्यसूत्रे एतदर्थं प्रायश्चित्तं सूचितमस्ति। वसन्ते, ग्रीष्मे, वर्षायां, शरदि, हेमन्ते, शिशिरे वा यदा ऋतुमैथुनं न कृतं तद्विषये प्रायश्चित्तहोमं कृत्वा अवशिष्टं जलं तथा च आज्यं पतिः पत्नी च प्राश्नीयाताम्।

- अथ गृहस्थस्य ऋतुसंवेशनविच्छेद प्रायश्चित्तं व्याख्यास्यामः। वसन्तो ग्रीष्मो वर्षाश्शरद्धेमन्तश्शिशिरेणर्तुकालमुक्त्वा ब्राह्मणेभ्यो निवेदयित्वा चीर्णव्रतान्तेनाथ प्रदोषे देवयजनमुदानयति। अथ देवयजनोल्लेखनप्रभृत्याग्निमुखात्कृत्वा पक्वाज्जुहोति यस्त्वा हृदाकीरिणा मन्यमानः इति पुरोनुवाक्यामनूच्य - यस्मै त्वं सुकृते जातवेदः इति याज्यया जुहोति। अथाज्याहुतीरुपजुहोति -मधुश्च स्वाहा। माधवश्च स्वाहा इत्याऽन्तादनुवाकस्य। स्विष्टकृत्प्रभृतिसिद्धमाधेनुवरप्रदानात्। अपरेणाग्निम् आज्यशेषमुदकशेषं चोभौ जायापती प्राश्नीयाताम्। ऋतुसंवेशनविच्छेद प्रायश्चित्तं व्याख्यातम्। (बोधा.गृह्य.४.१२.१-७)

## १.२) गर्भाधानम्(संस्कारलोपः)

⇒ **यदि गर्भाधानसंस्कारं विना गर्भधारणा भवेत्।**

गर्भाधानसंस्कारस्य महत्वं पूर्वं वर्णितमस्ति। अतः गर्भाधानसंस्कारः भवेदेव। परं यदि गर्भाधानसंस्कारम् अकृत्त्वैव गर्भधारणाभवत् तर्हि गर्भाधानसंस्कारस्य कालः अतीतः अतः प्रायश्चित्तं कर्तव्यमिति। गर्भिण्यः गर्भकालस्तु अग्रे गच्छत्येव अतः एतेषां विलम्बितानां संस्काराणां समये यदि पतिः निकटे न भवति तर्हि पत्युः पिता, भ्राता अन्यः सपिण्डः वा संस्कारान् कर्तुमर्हति।

वैखानसगृह्यसूत्रे सूचितं यत् गर्भाधानस्य कालः अतीतः अतः सुवर्णस्य गर्भवत् प्रतीकं कृत्वा स्त्रियः कुक्षौ निधाय विहितं होमं कुर्यात्। सुवर्णगर्भं निष्कास्य पूर्ववत् गर्भाधानसंस्कारं कुर्यात्। विनासंस्कारं गर्भधारणां कृत्वा पत्युः यदि मृत्युः भवति तदा अन्येन नाम भर्तुः पित्रा भ्रात्रा वा अयं संस्कारः कर्तव्यः।

➢ गर्भाधानकालेऽतीते क्रियाहीने विपर्यासे च पूर्ववदाघारान्ते सुवर्णेन गर्भवत्कृत्वा तस्याः कुक्षौ संन्यस्य दर्भेण बन्धयेत्। परिषिच्य वैष्णवं ब्राह्मं रौद्रमैन्द्रमाग्नेयं बार्हस्पत्यमङ्गहोमं च हुत्वा पूर्ववद्गर्भाधानं कुर्यात्। विष्णुसूक्तेनोदरमभिमृशति। सुवर्णगर्भमादाय ब्राह्मणेभ्यो दत्वा तान्भोजयति। लौकिकाग्नौ गर्भसंस्काराञ्जुहोति। पितुरौपासनाग्नावित्येके। भर्तुर्मरणे तत्पिता भ्राता सपिण्डो योनिबन्धुर्वा कुर्यात्। (वैखा.गृह्य.६.३.१-४,९,१०)

वैखानसगृह्यसूत्रे अन्यत्र अन्यत् प्रायश्चित्तमुक्तमस्ति। रजोदर्शनस्य चतुर्थ्यां प्रायश्चित्तहोमं कृत्वा मैथुनं कुर्यात् इति शिष्टाचारः। परं चतुर्थ्यां प्रायश्चित्तहोमम् अकृत्वा मैथुनं कृतं तदा प्रायश्चित्तरूपेण चान्द्रायणव्रतं चरित्वा होमं कृत्वा पुनः चतुर्थीहोमं कुर्यात्।

➢ चतुर्थीव्रतक्रियाहीने संगमने कृते चान्द्रायणं चरित्वाग्निमौपासनमाधाय वैष्णवं ब्राह्ममार्षमाग्नेयं बार्हस्पत्यं च हुत्वा पुनश्चतुर्थीहोमं कुर्यात्। (वैखा.गृह्य.६.१८.८)

## १.३) पुंसवनम्

गर्भधारणानन्तरं गर्भस्य द्वितीये चतुर्थे षष्ठे मासि संस्कारोऽयं भवति। अनेन संस्कारेण वीर्यवत्, पराक्रमवत् अपत्यं भवेद् इतीच्छया संस्कारोऽयं विद्यते। केचन चिन्तयन्ति यत् अनेन संस्कारेण पुरुषापत्यं जायेदिति। यद्यपि पुरुषो स्त्री वा किमपत्यं भवेदिति परमेशाधीनं तथाप्यमुं संस्कारं कुर्वन्ति। गर्भधारणानन्तरं गर्भस्य लिङ्गपरिवर्तनं नैव भवति। अतः पुरुषापत्येच्छया पुंसवनसंस्कारकरणे नास्ति कापि सङ्गतिः। अत्र तृतीयप्रकृत्याः अपत्यं न भवेदिति अपेक्षा योग्या भवेत्।

⇒ **यदि पुंसवनसंस्कारः नाभवत्।**

वैखानसगृह्यसूत्रे गर्भाधानवत् प्रायश्चित्तं हुत्वा सुवर्णगर्भं पुरुषसूक्तेन उदरे अभिमृशति नाम स्पर्शं करोति।

- पुंसवनसीमन्तयोश्च गर्भाधानवत्प्रायश्चित्तं हुत्वा तौ करोति। अन्तःपुंवद्रूपयुतं सुवर्णगर्भं पुरुषसूक्तेनोदरमभिमृशतीति विशेषः। (वैखा.गृह्य.६.३.५,६)

## १.४) अनवलोभनम्

गर्भरक्षणार्थं संस्कारोऽयं भवति। गर्भधारणानन्तरं गर्भस्य षष्ठे मासि संस्कारोऽयं भवति अवलोभनं नाम पतनं, गर्भस्य पतनं न भवतु तदर्थम् अनवलोभनम्। अनेन संस्कारेण पूर्णदिनानन्तरमेव जननं भवति। धार्मिकविधिना यज्ञादि कृत्वा पत्न्याः दक्षिणनासापुटे अश्वगन्धारससेचनं दूर्वारससेचनम् एतस्मिन् संस्कारेऽपि भवति। अनवलोभनसंस्कारलोपविषये स्वतन्त्रतया नास्ति प्रायश्चित्तम्। सामुहिकप्रायश्चित्ते उल्लेखो वर्तते।

## १.५) सीमन्तोन्नयनम्

अनवलोभनसंस्कारेण सह संस्कारोऽयं भवति। अत्र गर्भिण्याः मस्तके केशानां सीमन्तस्य उन्नयनं नाम विभागः कर्तव्यः भवति। मस्तकस्य समीकरणेन मस्तिष्कं जागृतं संस्कृतं च भवेत्। मस्तिष्कस्य जागृतत्वात् जनिष्यमाणमपत्यं बुद्धिमत् भवेदित्याशयः संस्कारेऽस्मिन् विद्यते।

⇒ **यदि सीमन्तोन्नयनसंस्कारः नाभवत्।**

वैखानसगृह्यसूत्रे गर्भाधानवत् प्रायश्चित्तं हुत्वा सुवर्णगर्भं पुरुषसूक्तेन उदरे अभिमृशति नाम स्पर्शं करोति।

➢ पुंसवनसीमन्तयोश्च गर्भाधानवत्प्रायश्चित्तं हुत्वा तौ करोति। अन्तःपुंवद्रूपयुतं सुवर्णगर्भं पुरुषसूक्तेनोदरमभिमृशतीति विशेषः। (वैखा.गृह्य.६.३.५,६)

⇒ **यदि सीमन्तोन्नयनसंस्कारं विना प्रसूतिः भवेत्।**

शाङ्खायनगृह्यसूत्रे सूचितं सीमन्तोन्नयनसंस्कारम् अकृत्वैव यदि प्रसूतिः भवति, जातकर्मसंस्कारश्च जन्मानन्तरं नाभवत्, तर्हि दशदिनानन्तरं नाम जननाशौचस्य समाप्त्यनन्तरं जाताय शिशवे मातुः अङ्के निधाय महाव्याहृतिभिः होमं कृत्वा पूर्ववद् संस्कारहोमः करणीयः।

➢ सीमन्तोन्नयनम्, अकृतसीमन्तोन्नयने चेत् प्रजायेत। अकृतजातकर्माऽसीत्। ततोऽतीते दशाह उत्सङ्गे मातुः कुमारकं स्थापयित्वा महाव्याहृतिभिर्हुत्वा पूर्ववद्धोमः। (शाङ्खा.गृह्य.१.प्रायश्चित्तयः.१-४)

## १.६) विष्णुबलिः

विष्णुः रक्षणकर्ता पालनकर्ता अतः स एव गर्भस्य रक्षणं पालनं वर्धनं च कुर्यात् इति भावनया विष्णुबलिः भवति। सुलभप्रसूतिनिमित्तं सुखप्रसूतिनिमित्तं संस्कारोऽयं भवति। अत्र चतुरङ्गक्रीडासदृशं आरेखनं कृत्वा तेषु चतुष्षष्टिपदेषु चतुष्षष्टिवारं वैष्णवमन्त्रस्य पठनं कृत्वा पायसेन हवनं बलिदानं च भवति।

विष्णुबलिनिमित्तम् उपयुक्तं चतुरस्रं मण्डलं तथा च बलिदानस्य क्रमः अत्र आरेखितः अस्ति।

ईशानी प्राची

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| १ ⇒ | २ | ३ | ४ | ५ | ६ | ७ | ८ ⇓ |
| २८ ⇒ | २९ | ३० | ३१ | ३२ | ३३ | ३४ ⇓ | ९ |
| २७ | ४८ | ४९ | ५० | ५१ | ५२ | ३५ | १० |
| २६ | ४७ | ६० | ६१ | ६२ | ५३ | ३६ | ११ |
| २५ | ४६ | ५९ | ६४ | ६३ | ५४ | ३७ | १२ |
| २४ | ४५ | ५८ | ५७ | ५६ | ५५ | ३८ | १३ |
| २३ | ४४ ⇑ | ४३ | ४२ | ४१ | ४० | ३९ ⇐ | १४ |
| २२ ⇑ | २१ | २० | १९ | १८ | १७ | १६ | १५ ⇐ |

प्रतीची

⇒ **यदि विष्णुबलिः नाभवत्।**

वैखानसगृह्यसूत्रे उक्तमस्ति यदि विष्णुबलिः नाभवत् तर्हि विष्णुसूक्तं चतुर्वारं पठित्वा विष्णुबलिं कुर्यात्। अत्र बलिदानस्य आरम्भः ईशानीमारभ्य प्रदक्षिणं भवति। अत्र तैरेव मन्त्रैः होमः च भवति। अन्ते अवशिष्टं पायसं गर्भिणी प्राश्नाति।

- विष्णुबलौ हीने वैष्णवं विष्णुसूक्तं चतुरावर्त्य हुत्वा विष्णुबलिः कर्तव्यः। (वैखा.गृह्य.६.३.७)

⇒ उपसंहारः - **प्रथमप्रकरणम् (गर्भाधानम्, ऋतुशान्तिः, संस्कारलोपः, पुंसवनम्, अनवलोभनम्, सीमन्तोन्नयनम्, विष्णुबलिः)**

अस्मिन् प्रकरणे संस्कारेषु गर्भाधानात् जननपर्यन्ताः संस्काराः वर्णिताः सन्ति। पुंसवनम्, अनवलोभनं, सीमन्तोन्नयनं, विष्णुबलिः एते चत्वारः संस्काराः गर्भसंस्काराः। एते संस्काराः जननात् प्राक्तनाः। प्रथमः गर्भाधानसंस्कारो नाम स्त्रीसंस्काररूपः क्षेत्रसंस्कारः। गर्भधारणायाः प्राक्तनः संस्कारः। अनेन संस्कारेण क्षेत्रं शुद्धं संस्कारितं भवति। गर्भधारणा तदा एव योग्या भवेत् यदा ऋतुकालः योग्ये समये भवेत्, परं यदि अयोग्यसमये ऋतुकालः आरब्धः तर्हि ऋतुशान्तिं कृत्वा तदनन्तरमेव गर्भाधानं कुर्यात्। यदि गर्भाधानसंस्कारम् अकृत्वा एव स्त्रीगमनं कृतं गर्भधारणा च अभवत् तर्हि गर्भाधानसंस्कारस्य लोपकारणात् जातस्य दोषस्य निवारणाय प्रायश्चित्तं कुर्यात्। गर्भधारणायाः लक्षणानि यदा दृश्यन्ते तदा द्वितीये चतुर्थे गर्भमासे पुंसवनसंस्कारो भवति। षष्ठे मासि अनवलोभनं तथा सीमन्तोन्नयनं भवति। एते संस्काराः यदि नाभवन् तर्हि प्रायश्चित्तं कुर्यात्। विष्णुबलिः गर्भस्य अष्टमे मासि भवति। तस्य अकरणे किमपि स्वतन्त्रं प्रायश्चित्तं नोपलभ्यते।

## २) जातकर्म

शिशोः जन्मना आनन्दितः पिता नूतनाय जाताय शिशवे मधुना घृतेन सह हिरण्यप्राशनं कारयति।

प्राङ्नाभिवर्धनात् पुंसो जातकर्म विधीयते।

मन्त्रवत् प्राशयेदस्य हिरण्यमधुसर्पिषम्।। मनुस्मृतिः २.२९

अत्र घृतं नाम दुग्धस्य दध्यादिप्रक्रियानन्तरं प्राप्तोऽयम् अन्तिमः सारभूतो भागः। मधु नाम सर्वेषां वनस्पतीनां मक्षिकाभिः सङ्गृहीतः सारभूतः भागः। सुवर्णं नाम धातुषु अत्युत्तमः धातुः। अत्र मधोः तथा घृतस्य विषमप्रमाणं भवेत्। यावत् घृतं ततो द्विगुणं मधु इति। त्रयाणां मिश्रणस्य प्राशनेन शरीरं दृढं, कान्तियुतं च भवति। सम्पूर्णे शरीरे सुवर्णांशः गच्छेत् तदर्थं प्रवाहकरूपेण मधुघृतयोरुपयोगो भवति। एतस्मिन्समये एव जातस्य शिशोः कर्णे सुवर्णं निधाय मेधासूक्तस्य आयुष्यसूक्तस्य च पिता जपं करोति। शिशुः बुद्धिमान्, आयुष्मान् भवेत् इतीच्छया जपं करोति। अत्र शिशुः सुदृढः, शुद्धः, अपराजितः, दीर्घायुः भवेदितीच्छया शिशोः स्कधद्वयं स्पृशति। सर्वमिदं कृत्वा अनन्तरमेव माता स्तनपानं कारयति। जातकर्मसंस्कारलोपविषये स्वतन्त्रतया नास्ति प्रायश्चित्तम्। सामुहिकप्रायश्चित्ते उल्लेखो वर्तते।

## २.१) जातकर्म(नित्यहोमलोपः)

⇒ **यदि जननाशौचकारणात् नित्यहोमस्य लोपः भवेत्।**

वैखानसगृह्यसूत्रे एतत् विषये विस्तरेण उक्तमस्ति। गृहे यदा प्रसूतिः भवति तदा जननाशौचं भवति। अशौचकाले होमादि दैवकार्यं न कुर्वन्ति। तस्मात् नित्यहोमस्य लोपः भवति। नित्यहोमाय स्थापितः अग्निरपि शान्तः भवति। तदर्थं पूर्वतनस्य स्थापितस्य अग्नेः भस्म लौकिकाग्नौ निधाय प्रातःकालीनहोमः यदि नाभवत् तर्हि सायङ्काले द्विगुणः होमः करणीयः। यदि सायङ्कालस्य होमः लुप्तः तदर्थं प्रातः द्विगुणः होमः करणीयः। दशमेऽहनि यदा अशौचं समाप्तं भवति तदा जातकाग्निः अरण्याम् इध्मे वा समारोप्य पुनः अग्निं मथित्वा आधानं नाम अग्निस्थापनां कृत्वा प्रायश्चित्तहोमः करणीयः। अशौचानन्तरं पुनः यदि अधिकः कालः अतीतः वैष्णवं ब्राह्मं रौद्रं प्रायश्चित्तं हुत्वा अग्रिमः संस्कारः इत्युक्ते नामकरणं करणीयम्। नामकरणेऽपि वैष्णवादिदैवतहोमं कृत्वा नामकरणं कुर्यात्।

➢ कुमारे जाते जातकाग्नौ प्रातर्होमे हीने व्याहृतीश्चतुरावर्त्य हुत्वा सायं द्विगुणं सायं हीने प्रातर्द्विगुणं पूर्ववदादशाहाज्जुहोत्यतीतेऽप्येवं जातकर्म कुर्यात्। जातकाग्नौ समुत्सन्ने तद्भस्म पूर्ववत्समिधमारोप्य लौकिकाग्नौ निधाय प्रायश्चित्तं हुत्वा तथैव जुहुयात्। दशमेऽहनि जातकाग्निमरण्यामिध्मे वा समारोप्य तमेवाग्निं मथित्वाधाय वास्तुहोमोत्थानहोमौ हुत्वाग्निं समारोप्याप्रमादं निदधाति। उत्थानस्य कालेऽतीते वैष्णवं ब्राह्मं रौद्रं प्रायश्चित्तं हुत्वा पूर्ववत् कुर्यान्नामकरणस्य वैष्णवं ब्राह्मं रौद्रं प्रायश्चित्तं हुत्वा पूर्ववदुत्थानं कुर्यात्। नामकरणस्य वैष्णवं मूलहोमं यद्देवादिदिग्दैवत्यं च हुत्वा नामकरणं करोति। (वैखा.गृह्य.६.४.४-९)

## २.२) जातकर्म (जननकालदोषप्रायश्चित्तम्)

मनुष्यस्य जन्मकालः यद्यपि परमेशाधीनः तथापि ज्योतिषशास्त्रानुसारं अयोग्ये जन्मकाले जातस्य शिशोः जीवने तथा परिवारसदस्यानां जीवने काचित् हानिः, कश्चन विपरीतप्रसङ्गः भवेदिति भीत्या शान्तिं कुर्वन्ति। आकाशस्थानां चन्द्रसूर्यादिग्रहनक्षत्रतारकादीनां मानवीये जीवने कश्चन परिणामः कश्चन सम्बन्धः वा स्यादेव। द्वयोः पदार्थयोः परस्पराकर्षणं भवति इति वैज्ञानिकं सत्यम्। तथैव चन्द्रसूर्यादिग्रहनक्षत्रतारकादीनां पृथिव्यां जातानां मानवानां परस्पराकर्षणसम्बन्धः स्यादेव। अत्र चिन्तनीयः विषयः नाम किं प्रमाणं विषयस्यास्य? अत्र प्रत्यक्षप्रमाणेन न वक्तुं शक्यते परम् आप्तप्रमाणेन शक्यते। अस्माकं पूर्वजैः ज्ञानेन अनुभवबलेन आत्मशक्त्या च यद्यद् मार्गदर्शनं कृतं तत्तु आप्तवाक्यमेव। यतः आप्तस्तु यथार्थवक्ता। अतः पूर्वजैः कृतं मार्गदर्शनमेव मुख्यभूतम्। अत्रापि चिन्तनीयं यत् पूर्वजैः कतिचनानुभवाः प्राप्ताः स्युः। कतिचन मनुष्याणां जीवनानि दृष्ट्वा तेषु किं साम्यं कश्च भेदः इत्यादिविषये अभ्यस्य पूर्वजैरुक्तं स्यात्। कस्यां तिथौ, कस्मिन् नक्षत्रे, कस्मिन् योगे जातः मनुष्यः कीदृशः भवेत् तस्य जीवने कीदृशाः प्रसङ्गाः भवेयुः। तेषु विपरीतानाम् अयोग्यानां प्रसङ्गानां परिणामानां निवारणाय शान्तिः नाम प्रायश्चित्तं सूचितम्। प्रत्येकतिथेः, प्रत्येकनक्षत्रस्य, प्रत्येकयोगस्य काचित् देवता निश्चितास्ति। प्रत्येकशान्तिनिमित्तम् प्रत्येकं दोषस्य निवारणाय तत्तत् शान्त्यनुसारं पृथक् पृथक् देवताविधानम् विद्यते। तेषु यस्याः तिथेः, यस्य नक्षत्रस्य, यस्य योगस्य च शान्तिः कर्तव्या स्यात् तत्तत् देवतापूजनं तथा च तदर्थं हवनं च कर्तव्यं भवति। ताः देवताः तस्य मनुष्यस्य दुरितं दूरीकुर्वन्ति। इति भावना, श्रद्धा, अनुभवश्च विद्यते।

⇒ **यदि अयोग्यकाले प्रसूतिः भवेत्।**

अयोग्ये काले जातस्य शिशोः तत्तत् तिथिनक्षत्रयोगादीनाम् शान्तिकरणात् प्राक् गोप्रसवशान्तिः करणीया। अयोग्ये काले जाताय शिशवे गवा अवघ्राणेन शुद्धं करोतीति भावना विद्यते। अतः गोमुखप्रसवशान्तिः कर्तव्येति। अत्र गोमुखप्रसवः इत्यनेन शब्देन ज्ञायते यत् गोमुखात् आगतं सर्वमपि पवित्रं शुद्धं भवतीति।

हिरण्यकेशीगृह्यशेषसूत्रे उक्तं यत् जननात् द्वादशे दिवसे पुण्यकारके नदीतीरे देवालये गवां गोष्ठे वा शान्तिं कुर्यात्। मूलम्, आश्लेषा, ज्येष्ठा एतेषु नक्षत्रेषु जाते। वैधृतिः गण्डादियोगेषु जाते शान्तिरेषा कर्तव्या। सूत्रे विस्तरेण शान्तिः उक्तास्ति। गोप्रसवशान्तिं कृत्वैव तत्तत् नक्षत्रयोगादिशान्तिं कुर्यात्। अत्रापि विस्तारभयात् शान्तिविधानस्य आरम्भवाक्यानि एव अत्र स्वीकृतानि।

➢ अथातो गोप्रसवशान्तिं व्याख्यास्यामः।

जननादेकादशे द्वादशे वा पुण्ये नक्षत्रे पुण्यनद्यादौ देवालये गोष्ठे वा। मूलाश्लेषाज्येष्ठान्यतमनक्षत्रेष्वतिगण्डे वैधृतौ पातेऽमाविष्ट्युपरागादिषु च जनने गोप्रसवशान्तिं विधाय तत्तच्छान्तिं कुर्यादिति विज्ञायते। (हिर.गृह्यशेष.१.५.१)

⇒ **यदि मूलनक्षत्रे जननं भवेत्।**

हिरण्यकेशीगृह्यशेषसूत्रे उक्तं यत् जन्मकाले यदि मूलनक्षत्रम् अस्ति तर्हि शान्तिः कर्तव्या। नक्षत्रेषु मूलनक्षत्रं जन्मकाले अत्यन्तम् अयोग्यमिति चिन्तयन्ति। मूलनक्षत्रस्य देवतास्ति निर्ऋतिः अतः निर्ऋतिदेवतानिमित्तं होमादिकं कुर्यात्। सूत्रे विस्तरेण शान्तिः उक्तास्ति। अत्र सन्दर्भाय केवलम् आरम्भसूत्राणि स्वीकृतानि सन्ति।

➢ अथातो मूलनक्षत्रजननशान्तिं व्याख्यास्यामः।

अभुक्तमूलोत्पतौ वर्षाष्टकान्ते भुक्तमूलोत्पत्तावव्यवहितागामिमूलर्क्षे एकादशाहे द्वादशाहे वाऽन्यतमे वा शुभनक्षत्रे गोमुखप्रसवशान्तिं विधाय मूलशान्तिमारभते। एवं ज्येष्ठाश्लेषैकनक्षत्रजनने च शान्तिं मूलवत्कुर्यादिति विज्ञायते। (हिर.गृह्यशेष.१.५.२)

मूलनक्षत्रशान्तिविषये कौशिकगृह्यसूत्रेऽपि उल्लेखो दृश्यते। तत्र मूलनक्षत्रं पापनक्षत्रमिति सूचितमस्ति। तेनैव ज्ञायते यत् मूलनक्षत्रे जाताय शिशवे तथा च तस्य गृहसदस्येभ्यः बाधा न भवतु अतः शान्तिं कुर्यात्।

➢ प्रत्नो हि इति पापनक्षत्रे जाताय मूलेन। (कौशि.गृह्य.४६.२५)

⇒ **यदि आश्लेषानक्षत्रे जननं भवेत्।**

हिरण्यकेशीगृह्यशेषसूत्रे उक्तं यत् जन्मकाले यदि आश्लेषानक्षत्रम् अस्ति तर्हि शान्तिः कर्तव्या। नक्षत्रेषु आश्लेषानक्षत्रं जन्मकाले अयोग्यमिति चिन्तयन्ति। आश्लेषानक्षत्रस्य देवतास्ति सर्पः। अतः तद्दोषनिवारणाय शान्तिं कुर्यात्। सूत्रे विस्तरेण शान्तिः उक्तास्ति। अत्र सन्दर्भाय केवलम् आरम्भश्लोकाः स्वीकृताः सन्ति।

➢ आश्लेषायां तु जातानां शान्तिं वक्ष्याम्यतः परम्। जातस्य द्वादशाहे च शान्तिहोमं समाचरेत्। (हिर.गृह्यशेष.१.५.३)

⇒ **यदि नक्षत्रगण्डान्ते जननं भवेत्।**

हिरण्यकेशीगृह्यशेषसूत्रे उक्तं यत् रेवती तथा अश्विनी, आश्लेषा तथा मघा, ज्येष्ठा तथा मूलम् एवं द्वयोः द्वयोः नक्षत्रयोः सन्धिकाले जातस्य शिशोः शान्तिः कर्तव्या। नक्षत्रयोः सन्धिकालः नक्षत्रगण्डान्तम् इति उच्यते। पितुः तथा मातुः हानिकारकं कदा भवेत् तत् सूचितम् अस्ति। विविधप्रकारकस्य गण्डान्ताः उक्ताः सन्ति। एतादृशः गण्डान्तः यदि दिने भवति तदा एव जननं भवेत् तर्हि पितुः हानिः भवेत्। यदि गण्डान्तः रात्रौ भवेत् तदा एव जननं भवेत् तर्हि मातुः हानिः भवेत्। सन्धिकाले यदि गण्डान्तः भवेत् तदा एव जननं भवेत् तर्हि जाताय शिशवे हानिकारकं भवेत्। अतः शान्तिः कर्तव्या। सूत्रे विस्तरेण शान्तिः उक्तास्ति। अत्र सन्दर्भाय केवलम् आरम्भश्लोकाः स्वीकृताः सन्ति।

➢ अथातो नक्षत्रगण्डान्तजन्मशान्तिं व्याख्यास्यामः।

अश्विनीमघमूलादौ त्रिषट्कनवनाडिकाः। रेवतीसार्पशाक्रान्ते मासाश्च ऋतुसायकाः। अश्विनीमघमूलादौ नाडिकाद्वितयं तथा। रेवतीसार्पशाक्रान्ते नाडिकाद्वितयं तथा। अश्विनीमघमूलानां पूर्वार्धे बाध्यते पिता। पूषादिशाक्रपश्वार्धे जननी बाध्यते शिशोः। पितृहातु दिवाजातो रात्रिजातस्तुमातृहा। आत्मधक्संध्ययोर्जातो नास्ति गण्डो निरामयः। (हिर.गृह्यशेष.१.५.४)

⇒ **यदि एकनक्षत्रे जननं भवेत्।**

हिरण्यकेशीगृह्यशेषसूत्रे उक्तं यत् जन्मकालस्तु परमेशाधीनः परं यदि मातापुत्रयोः, पितृपुत्रयोः, भ्रात्रोः, भ्रातृभगिन्योः वा योगायोगावशात् जन्मनक्षत्रम् एकमेव भवेत् तर्हि तयोर्मध्ये एकस्य मृत्युः सम्भवति अतः शान्तिः कर्तव्या। सूत्रे विस्तरेण शान्तिः उक्तास्ति। अत्र सन्दर्भाय केवलम् आरम्भश्लोकः स्वीकृतः अस्ति।

➢ अथैकनक्षत्रजननशान्तिं व्याख्यास्यामः।

एकस्मिन्नेव नक्षत्रे भ्रात्रोर्वा पितृपुत्रयोः। प्रसूतिश्च तयोर्मृत्युर्भवेदेकस्य निश्चयः। तद्दोषनाशाय तदा प्रशस्तां शान्तिं च कुर्यादभिषेचनं च। (हिर.गृह्यशेष.१.५.५)

⇒ **यदि कृष्णचतुर्दश्यां जननं भवेत्।**

हिरण्यकेशीगृह्यशेषसूत्रे उक्तं यत् जन्मकाले यदि कृष्णचतुर्दशी तिथिः विद्यते तर्हि पितुः, मातुः, मातुलस्य, धनस्य, वंशस्य हानिः भवेदिति भीत्या शान्तिं कुर्वन्ति। सूत्रे विस्तरेण शान्तिः उक्तास्ति। अत्र सन्दर्भाय केवलम् आरम्भश्लोकाः स्वीकृताः सन्ति।

➢ अथ कृष्णचतुर्दशीजननशान्तिं व्याख्यास्यामः।

कृष्णपक्षे चतुर्दश्यां प्रसूतेः षड्विधं फलम्। चतुर्दशीं च षड्भागां कुर्यादादौ शुभं स्मृतम्। द्वितीये पितरं हन्ति तृतीये मातरं तथा। चतुर्थे मातुलं हन्ति पञ्चमे वंशनाशनम्। षष्ठे तु धनहानिः स्यादात्मनो वंशनाशनम्। तस्मात्सर्वप्रयत्नेन शान्तिं कुर्याद्विधानतः। (हिर.गृह्यशेष.१.५.९)

⇒ **यदि ग्रहणसमये जननं भवेत्।**

हिरण्यकेशीगृह्यशेषसूत्रे उक्तं यत् सूर्यस्य वा चन्द्रस्य ग्रहणकाले यदि प्रसूतिः भवति तदा स्त्रियः व्याधिपीडा भवितुमर्हति। अतः शान्तिः कर्तव्या। अत्र चिन्तनीयः विषयः नाम सूर्यचन्द्रयोः प्रकाशेण मानवीयजीवनं प्रकाशमयं भवति। तयोः ग्रहणकालः

नाम अनिष्टकालः तदा यदि जननं भवति शान्तिः कर्तव्या। सूत्रे विस्तरेण शान्तिः उक्तास्ति। अत्र सन्दर्भाय केवलम् आरम्भश्लोकाः स्वीकृताः सन्ति।

➢ अथातो ग्रहणजननशान्तिं व्याख्यास्यामः।

ग्रहणे चन्द्रसूर्यस्य प्रसूतिर्यदि जायते। व्याधिपीडा भवेत्स्त्रीणामादौ तु ऋतुदर्शनात्। इत्थं सञ्जायते यस्तु तस्य मृत्युर्न संशयः। व्याधिपीडा च दारिद्र्यं शोकश्च सततं भवेत्। शान्तिं तेषां प्रवक्ष्यामि नराणां हितकाम्यया। (हिर.गृह्यशेष.१.५.१०)

**⇒ यदि दर्श अमावास्यायां जननं भवेत्।**

हिरण्यकेशीगृह्यशेषसूत्रे उक्तं यत् अमावास्यायाः मध्ये विद्यमानाः पञ्चप्रहराः दर्श इति नाम्ना उच्यन्ते। तस्मिन्काले यदि जननं भवति तदा शान्तिं कुर्यात्। सूत्रे विस्तरेण शान्तिः उक्तास्ति। अत्र सन्दर्भाय केवलम् आरम्भश्लोकः स्वीकृतः अस्ति।

➢ अथातो दर्शशान्तिं व्याख्यास्यामः।

अथातो दर्शजातस्य मातापित्रोर्दरिद्रता। तद्दोषपरिहारार्थं शान्तिं वक्ष्यामि साम्प्रतम्। (हिर.गृह्यशेष.१.५.१२)

**⇒ यदि सिनीवाली तथा कुहु अमावास्यायां जननं भवेत्।**

हिरण्यकेशीगृह्यशेषसूत्रे उक्तं यत् अमावास्यायाः प्रथमप्रहरः सिनीवाली इति नाम्ना उच्यते। अमावास्यायाः अन्तिमप्रहरद्वयं कुहु इति नाम्ना ज्ञायते। सिनीवाली तथा कुहू अमावास्यायाः कस्मिन्नपि भागे जाते शान्तिः कर्तव्या। अत्र न केवलं भार्यायाः अपि तु गोः महिष्याः वा प्रसूतिर्भवति तदा आयुषः धनस्य हानिर्न भवतु इति धिया शान्तिः कर्तव्या। सूत्रे विस्तरेण शान्तिः उक्तास्ति। अत्र सन्दर्भाय केवलम् आरम्भश्लोकाः स्वीकृताः सन्ति।

➢ अथातो सिनीवालीकुह्वोर्जन्मनि शान्तिं व्याख्यास्यामः।

सिनीवाल्यां प्रसूतास्याद्यस्य भार्यापशुस्तथा। गवाश्वंमहिषी चैव शक्रस्यापि श्रियं हरेत्। ये च सन्ति द्विजाश्चान्ये स्वप्रसादोपजीविनः। वर्जयेत्तानशेषांस्तु पशुपक्षिमृगादिकान्।

कुहूप्रसूतिरित्यर्थं सर्वदोषकरी नृणाम्। यस्य प्रसूतिरत्र स्यात्तस्याऽऽयुर्धननाशनम्। सर्वगण्डसमस्तत्र दोषस्तु प्रबलो भवेत्। नारीं विनाऽवशेषाणां परित्यागो विधीयते। परित्यागात्तत्र शान्तिं कुर्याद्धीमान्विचक्षणः। (हिर.गृह्यशेष.१.५.११)

⇒ **यदि सङ्क्रान्तिसमये तथा दुष्टयोगसमये जननं भवेत्।**

हिरण्यकेशीगृह्यशेषसूत्रे उक्तं यत् जन्मकाले सूर्यसङ्क्रान्तिः, दिनक्षयः तथा च व्यतीपातः, व्याघ्यातः, विष्टिः, वैधृतिः, शूलः, गण्डः, परिघः, वज्रः, यमघण्टः, कालगण्डः, मृत्युः, दग्ध एते योगाः यदि भवन्ति तर्हि सर्वपीडापरिहारार्थं शान्तिः कर्तव्या। सूत्रे विस्तरेण शान्तिः उक्तास्ति। अत्र सन्दर्भाय केवलम् आरम्भश्लोकाः स्वीकृताः सन्ति।

- अथातः सम्प्रवक्ष्यामि जन्मकाले विशेषतः। गण्डान्तानां च नामानि महादोषकराणि च। दिनक्षये व्यतीपाते व्याघाते विष्टिवैधृतौ। शूले गण्डे च परिघे वज्रे च यमघण्टके। कालगण्डे मृत्युयोगे दग्धयोगे सुदारुणे। तस्मिन् गण्डदिने प्राप्ते प्रसूतिर्यदि जायते। अतिदोषकरी प्रोक्ता तत्र पापयुते सति। विचार्य तत्र दैवज्ञ शान्तिं कुर्याद्यथाविधि। (हिर.गृह्यशेष.१.५.१३)
- अथातः सूर्यसङ्क्रान्तिव्यतीपातवैधृतियोगेषु जन्मनि शान्तिं व्याख्यास्यामः।
  अथातः सम्प्रवक्ष्यामि जन्मकाले विशेषतः। वैधृतौ हि व्यतीपाते महादोषोऽभिजायते। कुमारजन्मकाले तु व्यतीपातश्च वैधृतिः। सङ्क्रान्तिश्चरवेस्तत्र जातो दारिद्र्यकारकः। दरिद्राणां महादुःखं व्याधिपीडा महद्भयम्। अश्रियं मृत्युमाप्नोति नात्र कार्या विचारणा। स्त्रीणां च शोको दुःखं च सर्वनाशकरं भवेत्। शान्तिर्वा पुष्कलाचेत्स्यात्तत्र दोषो न कश्चन। (हिर.गृह्यशेष.१.५.१४)

⇒ **यदि पञ्चमारिष्टसमये जननं भवेत्।**

हिरण्यकेशीगृह्यशेषसूत्रे उक्तं यत् जातस्य पञ्चमे लग्ने रविः यदि भवति पित्रे हानिकारकं भवति। एवं पञ्चमे लग्ने चन्द्रः मात्रे हानिकारकः, मङ्गलः भ्रात्रे, बुधः

मातुलाय, गुरुः मातामहाय, शुक्रः पितामहाय, शनिः राहुश्च शिशवे, केतुः भ्रात्रे हानिकारकः भवति। अतः शान्तिः कर्तव्या। सूत्रे विस्तरेण शान्तिः उक्तास्ति। अत्र सन्दर्भाय केवलम् आरम्भश्लोकाः स्वीकृताः सन्ति।

- अथ पञ्चमारिष्टजननशान्तिं व्याख्यास्यामः।

जातस्य पञ्चमे लग्ने सूर्यादिग्रहसंस्थिते। पित्रादीनामरिष्टं तु कुर्वन्ति च यथाक्रमम्। रविश्च पितरं हन्ति मातरं च शशी तथा। भ्रातरं भूमिपुत्रस्तु मातुलं चन्द्रजस्तथा। गुरुर्मातामहं तद्वद्भृगुस्तद्वत्पितामहम्। शनी राहुः शिशुं हन्ति शिखि भ्रातरमेव च। तद्दोषपरिहारार्थं शान्तिं वक्ष्याम्यशेषतः। (हिर.गृह्यशेष.१.५.१७)

## २.३) जातकर्म (जननवैकृतदोषप्रायश्चित्तम्)

जातेषु आधिकांशेषु बालेषु यद् अप्राकृतिकं यत् अनैसर्गिकं दृश्यते तत् दोषनिवारणार्थं शान्तिः कर्तव्येति। अत्र चिन्तनीयः विषयः नाम अधिकांशजननप्रसङ्गेषु यादृशं जननं दृश्यते तत् प्राकृतिकम्। परं तद् विपरीतं जननं यदि भवति तर्हि शान्तिः कर्तव्येति। यद्यपि जननं तु परमेशाधीनं तथापि प्राचीनकाले विद्यमानकालेऽपि वा यत्किमपि अप्राकृतिकं दृश्यते तत् विषये औत्सुक्यं भयं वा दृश्यते लोकेषु। एतादृशं किमपि निसर्गविरुद्धम् अप्राकृतिकं दृष्ट्वा काचित् हानिः कश्चन दुःखप्रसङ्गः भवेदिति भीत्या वा प्राचीनानुभवेन शान्तिः कर्तव्येति सूचितं स्यात्। अत्रापि आप्तवाक्यप्रमाणमेव। शान्तिः नाम प्रायश्चित्तं कृतं तेन सर्वं सुकरं योग्यं भवेदिति भावना श्रद्धा च विद्यते।

⇒ **यदि त्रयाणां पुत्राणां कन्यानां वा जननानन्तरं कन्या पुत्रः वा जायेत।**

हिरण्यकेशीगृह्यशेषसूत्रे उक्तं यत् यदि त्रयाणां पुत्राणां जननानन्तरं कन्या जायेत अथवा तिसृणां कन्यानां जननानन्तरं पुत्रः जायेत तर्हि धनहानिः ज्येष्ठापत्यानां नाशः अन्यत् किमपि अरिष्टं भवेदिति भीत्या शान्तिः कर्तव्या भवति। सूत्रे विस्तरेण शान्तिः उक्तास्ति। अत्र सन्दर्भाय केवलम् आरम्भश्लोकाः स्वीकृताः सन्ति।

➢ अथातस्त्रिकप्रसवशान्तिं व्याख्यास्यामः।

सुतत्रये सुता चेत्स्यात्तत्त्रये वा सुतो यदि। मातापित्रोः कुलस्यापि तदाऽरिष्टं महद्भयम्।
ज्येष्ठनाशो धने हानिर्दुःखं वा सुमहद्भवेत्। तत्र शान्तिं प्रकुर्वीत वित्तशाठ्यविवर्जितः।
जातस्यैकादशाहे वा द्वादशाहे शुभे दिने। (हिर.गृह्यशेष.१.५.६)

⇒ **यदि प्रसवे विकृतिः भवेत्।**

हिरण्यकेशीगृह्यशेषसूत्रे उक्तं यत् नवमासानां कालः नातीतः ततः पूर्वमेव प्रसूतिः अभवत् । साधारणरीत्या नवमासानां गर्भावासं समाप्य दशमेमासि प्रसूतिः भवति परं प्रसवकालः अतीतः ततोऽपि प्रसूतिः नाभवत्। विकृतप्रसूतिः अभवत्। अमानुषी प्रसूतिः अभवत्। हीनाङ्गप्रसूतिः अभवत् नाम मनुष्यशरीरस्य यावन्तः अवयवाः अपेक्षिताः तेभ्यः कश्चन न्यूनः । अधिकाङ्गप्रसूतिः अभवत् नाम मनुष्यशरीरस्य यावन्तः अवयवाः

अपेक्षिताः तेषु कश्चन अधिकः। एवं प्रकारेण यदि प्रसूति भवति कुलस्य देशस्य विनाशसूचकं भवति। एतादृशं विकृतप्रसवं न केवलं मनुष्येषु अपि तु पशुषु अथवा पक्षिषु सरीसृपेषु वा भवति आपत्तिकारकमेव अतः शान्तिः कर्तव्या भवति। सूत्रे विस्तरेण शान्तिः उक्तास्ति। अत्र सन्दर्भाय केवलम् आरम्भश्लोकाः स्वीकृताः सन्ति।

➢ अथ प्रसववैकृतजननशान्तिः।

अकालप्रसवा नार्यः कालातीतप्रजास्तथा। विकृतप्रसवाश्चैव धूमप्रसवनास्तथा। अमानुषांश्चखण्डांश्चअज्ञातव्यञ्जनांस्तथा। हीनाङ्गानधिकाङ्गाश्च जनयन्ति यदि स्त्रियः। पशवः पक्षिणश्चैव तथैव च सरीसृपाः। विनाशं तस्य देशस्य कुलस्य च विनिर्दिशेत्। निर्वासियेत्तान्नृपतिः स्वराष्ट्रात् स्त्रियश्च पूज्याश्च ततो द्विजेद्राः। चिकित्सनैर्ब्राह्मणतर्पणैश्च ततोऽस्य शान्तिं समुपैति पापात्। (हिर.गृह्यशेष.१.५.१५)

⇒ **यदि दन्तसहितं जननं भवेत्।**

हिरण्यकेशीगृह्यशेषसूत्रे उक्तं यत् अधिकांशजननप्रसङ्गेषु दन्तैर्विहीनाः एव शिशवः जायन्ते परं यदि दन्तसहितः शिशुः जायेत तथा च प्रायः अधस्तनः दन्ताः प्रथमं जायन्ते परं उपरितनः दन्ताः प्रथमं जाताः तर्हि आपत्तिसूचकं भवति। मात्रे पित्रे वा शिशवे आपत्तिकारकं भवेत् अतः शान्तिः कर्तव्या। सूत्रे विस्तरेण शान्तिः उक्तास्ति। अत्र सन्दर्भाय केवलम् आरम्भश्लोकाः स्वीकृताः सन्ति।

➢ अथातो सदन्तजननशान्तिं व्याख्यास्यामः।

दन्तजन्मनि बालानां लक्षणं तन्निबोध मे। उपरि प्रथमं यस्य जायन्ते च शिशोर्द्विजाः। दन्तैर्वा सह यस्य स्याज्जन्म भार्गवसत्तम। मातरं पितरं वाऽथ खादेदात्मानमेव वा। तत्र शान्तिं प्रवक्ष्यामि तन्मे निगदतः शृणु। (हिर.गृह्यशेष.१.५.१६)

⇒ **यदि यमलयोः जननम् भवेत्।**

यमलयोः सम्भवे विभिन्नाः शक्यताः वर्णितास्सन्ति। तत्र कदाचित् समानलिङ्गकौ, कदाचित् भिन्नलिङ्गकौ, कदाचित् समानगुणकौ, कदाचित् भिन्नगुणकौ भवतः। अधिकप्रसङ्गेषु मनुष्यजातौ एकमेव अपत्यं जायते परं यमलजननं तु विरलम् अतः यमलजननविषये प्रायश्चित्तम् सूचितमस्ति। विविधेषु ग्रन्थेषु एतदर्थं प्रायश्चित्तं दृश्यते। तथापि एतदर्थं प्रायश्चित्तं किमर्थमिति प्रश्नो भवति। किमेषा घटना नैसर्गिकी उत् अनैसर्गिकी? नात्र मनुष्यो बुध्या पापभाग् भवति। तर्हि किमर्थं प्रायश्चित्तम्? परं चिन्तनीयं यत् यमलजननं वैकृतप्रसवमेव। अत्र न केवलं पत्नी अपि तु गौः, दासी, महिषी वा यमलौ प्रसवेत् तत्र तेन स्वामिना प्रायश्चित्तं करणीयमिति। समाजे शतेषु नवतिप्रतिशतं यत् दृश्यते यदनुभूयते तदेव प्रमाणमिति चिन्त्यते। तदेव समाजमान्यमपि भवति। अतः यमलजननं विकृतमेव। तस्मात् प्रायश्चित्तं करणीयमिति। विविधेषु गृह्यसूत्रेषु किञ्चित् भेदेन प्रायश्चित्तस्य प्रकाराः वर्णिताः सन्ति। कुत्रचित् केवलं हवनं, कुत्रचित् प्लक्ष-न्यग्रोध-अश्वत्थ-उदुम्बराणां चतुर्णां वृक्षाणां कषायेण अभिषेकः कुत्रचित् उभयमपि।

यमलजनने न केवलं गृह्यसूत्रेषु उल्लेखो दृश्यते अपि तु ऐतरेयब्राह्मणेऽपि दृश्यते। अनेन ज्ञायते यत् ब्राह्मणकालात् यमलयोः जननविषये भीतिः औत्सुक्यम् वा आसीत्। यथा ऋग्वेदस्य ऐतरेयब्राह्मणे *यस्य भार्या गौर्वा यमौ जनयेत्का तत्र प्रायश्चित्तिरिति सोऽग्नये मरुत्वते त्रयोदशकपालं पुरोळाशं निर्वपेत्तस्य याज्यानुवाक्ये मरुतो यस्य हि क्षयेऽरा इवेदचरमा अहेवेत्याहुतिर्वाऽऽहवनीये जुहुयादग्नये मरुत्वते स्वाहेति सा तत्र प्रायश्चित्तिरिति।* (३२.८)

हिरण्यकेशीगृह्यशेषसूत्रे यमलयोः त्रिविधाः प्रकाराः दत्ताः सन्ति। द्वौ बालकौ, द्वे बालिके, एकः बालकः एका बालिका च। तत्र द्वौ बालकौ, द्वे बालिके विनाशाय कारणभूतौ तथा च एकः बालकः एका बालिका एवं यदि जाते तर्हि मध्यमहानिकारकौ। परं यः कोऽपि प्रकारः भवतु शान्तिस्तु समाना एव। सूत्रे विस्तरेण शान्तिः उक्तास्ति। अत्र सन्दर्भाय केवलम् आरम्भश्लोकाः स्वीकृताः सन्ति।

- अथातो यमलोत्पत्तिविधानं व्याख्यास्यामः।

त्रिविधा यमलोत्पत्तिर्जायते योषितामिह। सुतौ च सुतकन्ये च कन्ये एव तथा पुनः। एकलिङ्गो विनाशाय द्विलिङ्गौ मध्यमौ स्मृतौ। पित्रोर्विरोधिनौ ज्ञेयौ तत्र शान्तिर्विधीयते। (हिर.गृह्यशेष.१.५.१८)

कौषीतकगृह्यसूत्रे केवलं महाव्याहृतिभिः होमप्रायश्चित्तं सूचितम्।

- यदि यमौ प्रजायेत महाव्याहृतिभिर्हुत्वा यमसूं दद्यात्। (कौषी.गृह्य.३.६.१०)

बोधायनगृह्यशेषसूत्रे न केवलं मनुष्ये अपि तु गोषु यदि यमलौ जायेरन् तर्हि शान्तिः कर्तव्या इति सूचितमस्ति। अनेन ज्ञायते यत् गृहे न केवलं मनुष्येषु अपि तु प्राणिषु अपि यदि अद्भुता घटना घटिता भवति तदा तत् गृहस्वामिना प्रायश्चित्तं करणीयमिति।

- अथातो यमलकल्पं व्याख्यास्यामः

पत्नी गावो वा यमलौ विजायेरन् तस्य संस्कारः प्राङ्नामकरणात् कार्यः। ब्राह्मणाननौज्ञाप्य चतुर्णां क्षीरवृक्षाणां कषायानाहरेयुः, प्लक्षन्यग्रोधाश्वत्थोदुम्बराणां चतुर उदकुम्भान् पूरयित्वा चतस्रो विधवा ब्रह्मचारिणो वा हिरण्यमन्तर्धाय स्नापयेयुश्शतधारेण वा कृत्वाऽभिषिञ्चति। (बोधा.गृह्यशेष.३.४.१,२)

पारस्करगृह्यसूत्रे तु न केवलं पत्न्याः गावः वा यमलजनने प्रायश्चित्तमुक्तम् अपि दास्याः महिष्याः अथवा अश्व्याः यमलजनने प्रायश्चित्तमुक्तमस्ति। अत्र अभिषेकेण सह होमः अपि उक्तः।

- अथातो यमलजनने प्रायश्चित्तं व्याख्यास्यामः।

यस्य भार्या गौर्दासी महिषी वडवा वा विकृतं प्रसवेत् प्रायश्चित्ती भवेत्। पूर्णे दशाहे चतुर्णां क्षीरवृक्षाणां कषायमुपसंहरेत् प्लक्षवटौदुम्बराश्वत्थशमीदेवदारु-गौरसर्षपास्तेषामपोमिश्रं हिरण्यदूर्वाङ्कुराम्रपल्लवैरष्टौ कलशान् प्रपूर्य सर्वौषधीनां च

दम्पती स्नापयित्वापोहिष्ठेति तिसृभिः कयानश्चित्र इति द्वाभ्यां पञ्चैन्द्रेण पञ्च वारुणेनेदमापः प्रवहतेत्यापाद्यमिति स्नापयित्वालङ्कृत्य तौ दर्भेषूपवेश्य तत्र मारुतं स्थालीपाकं श्रपयित्वाज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति पूर्वोक्तैः स्नपनमन्त्रैः। (पार.गृह्य.१.१६. )

कौशिकगृह्यसूत्रे उक्तं यदि गावः, अश्व्याः, गर्दभ्याः वा यमलौ भवेतां *एकैकयैषा सृष्ट्वा सं बभूव* इति सूक्तेन होमपूर्वकं प्रायश्चित्तं कुर्यात्। मनुष्येऽपि यदि यमलौ भवेतां समानरीत्या समानसूक्तेन होमपूर्वकं प्रायश्चित्तं कुर्यात्।

- अथ यत्रैतदयमसूर्यमौ जनयति तां शान्त्युदकेनाभ्युक्ष्य दोहयित्वा तस्या एव गोर्दुग्धे स्थालीपाकं श्रपयित्वा प्राञ्चमिध्ममुपसमाधाय परिसमुह्य पर्युक्ष्य परिस्तीर्य बर्हिरुदपात्रमुपसमासाद्य एकैकयैषा सृष्ट्वा सं बभूवेत्येतेन सूक्तेनाज्यं जुह्वन् उदपात्रे सम्पातानानयति उत्तमं सम्पातमोदने प्रत्यानयति ततो गां च प्राशयति वत्सौ चोदपात्रादेनानाचामयति च सम्प्रोक्षति च तां तस्यैव दद्यात् सा तत्र प्रायश्चित्तिः। अथ चेद्वडवा वा गर्दभी वा स्यादेवमेव प्राञ्चमिध्ममुपसमाधाय एवं परिस्तीर्य एवमुपसमासाद्य एतेनैव सूक्तेनाज्यं जुह्वन् उदपात्रे सम्पातानानयति उदपात्रादेतानाचामयति च संप्रोक्षति च तां तस्यैव दद्यात् सा तत्र प्रायश्चित्तिः। अथ चेन्मानुषी स्यादेवमेव प्राञ्चमिध्ममुपसमाधाय एवं परिस्तीर्य एवमुपसमासाद्य उपस्थे जातकवाधाय एतेनैव सूक्तेनाज्यं जुह्वन् अमीषां मूर्धि स मातुः पुत्रयोरित्यनुपूर्वं सम्पातानानयति उदपात्रादेतानाचामयति च सम्प्रोक्षति च तां तस्यैव दद्यात् सा तत्र प्रायश्चित्तिः। (कौशि.गृह्य.१०९-१११)

## २.४) नामकरणम्

शिशोः लौकिकव्यवहारसिद्ध्यर्थं नामकरणं भवति। प्रत्येकं मनुष्यस्य विभिन्नजातिप्राणिनः व्यक्तिनिश्चयाय नामकरणम् अनिवार्यमेव। तेन व्यक्तिज्ञाने व्यक्तिसम्बोधने च सौकर्यं भवति। नाम्ना आवाहनसमये यदि दैवी नामधेयं स्यात् तर्हि परमेशस्य नामोच्चारणं भवेत्। नाम्ना व्यक्तेः व्यक्तित्वं बोधितं भवेत्। अतः कतिचन विशेषणानि एव व्यक्तिनामधेयानि सन्ति। नामकरणसमये जातस्य शिशोः जन्मनक्षत्रं ज्ञात्वा तदाधारेणापि तस्य नक्षत्रस्य बोधकं यत् अक्षरं भवति तदनुसारमपि नामधेयं कुर्वन्ति। यस्मिन् कुले तस्य शिशोः जननम् अभवत् तस्य कुलस्य कुलदेवताभक्तरूपेणापि नामकरणं कुर्वन्ति। प्रायः जन्मनः द्वादशे दिवसे नामकरणं कुर्वन्ति। अतः प्रादेशिकभाषायां बारस इति लोके रूढः शब्दः। नामकरणसंस्कारलोपविषये स्वतन्त्रतया नास्ति प्रायश्चित्तम्। सामूहिकप्रायश्चित्ते उल्लेखो वर्तते।

## २.५) निष्क्रमणम्

निष्क्रमणसंस्काराय सूर्यावलोकनम् इत्यपि वदन्ति। प्रायः चतुर्थे मासि शिशवे प्रथमवारं गृहाद् बहिः माता नयति। जन्मनः प्रभृति गृहात् बहिः शिशुं न नयन्ति। बहिः विद्यमानः सूर्यप्रकाशः, बहिः विद्यमानं वातावरणं सोढुं शिशुः यदा प्रायः समर्थः भवति तदा शिशुं गृहात् बहिः नयन्ति। बालकः बहिः विद्यमानं विश्वम् अवलोकयति। जन्मनः प्रभृति बालकः केवलं मातरं वा प्रसूतिगृहे येषां प्रवेशः तानेव पश्यति। निष्क्रमणानन्तरं क्रमशः सर्वं विश्वं पश्यति। संस्कारेस्मिन् गृहात् बहिर्गमनं देवतावन्दनं च भवति। निष्क्रमणसंस्कारलोपविषये स्वतन्त्रतया नास्ति प्रायश्चित्तम्। सामूहिकप्रायश्चित्ते उल्लेखो वर्तते।

## २.६) अन्नप्राशनम्

जाताय शिशवे षष्ठे मासि अन्नस्य भक्षणं प्रारब्धं भवति। तावत् पर्यन्तं केवलं दुग्धपानं द्रवपदार्थस्य वा पानं भवति। मानवीयदेहस्य पाचनसंस्थायाः संपूर्णः विकासो यदा भवति तदा एव अन्नप्राशनसंस्कारः भवति। प्रायः षष्ठे मासि दन्तोद्भवः प्रारब्धो भवति। तदा बालोऽपि यत्किमपि खादितुं चर्वयितुं स्वयमेव उद्युक्तः भवति। अतः जन्मनः षष्ठेमासि अन्नप्राशनं कारयन्ति। संस्कारसमये प्रथमतया दधिमधुघृतसहितस्य चरोः भक्षणं कुर्वन्ति। अनेन संस्कारेण सह बालस्य जीविकायाः अनुमानमपि कुर्वन्ति। बालस्य पुरतः विविधानि वस्तूनि स्थापयित्वा ततः बालः यस्य स्पर्शं करोति सा तस्य जीविका भवेदिति चिन्तयन्ति, भावयन्ति। (तस्मिन् काले स्थापयेत्तत् पुरस्तात् वस्त्रं शस्त्रं पुस्तकं लेखनीं च। स्वर्णं रौप्यं यच्च गृह्णाति बालः तैराजीवं तस्य वृत्तिः प्रदिष्टा)

⇒ **यदि अन्नप्राशनसंस्कारं विना अन्नप्राशनं भवेत्।**

वैखानसगृह्यसूत्रे सूचितम् अन्नप्राशनस्य वास्तविकः कालः जन्मनः षष्ठः मासः। परं संस्कारपूर्वकम् अन्नप्राशनं नाभवत्। तथापि बालेन स्वयमेव अन्नं भुक्तं तदा जातकर्मवत् प्रायश्चित्तं हुत्वा अष्टमे दशमे द्वादशे वा मासि अन्नप्राशनसंस्कारं कृत्वा ब्राह्मणभोजनं कर्तव्यम्।

➢ अन्नप्राशने कालेऽतीते बालेनैवान्ने भुक्ते च जातकाग्नौ वैष्णवं ब्राह्ममाग्नेयमैन्द्रं सौम्यं बार्हस्पत्यं च हुत्वाष्टमे दशमे द्वादशे वा मासेऽन्नप्राशनं ब्राह्मणभोजनं च कुर्यात्। तत्तत्काले प्रवासगमनपिण्डवर्धनयोर्हीने मूलहोमं जुहोति (वैखा.गृह्य.६.५.२,३)

## २.७) चौलम्

चौलं नाम चूडाकरणं चूडा नाम शिखा। बालस्य मस्तके विद्यमानान् सर्वानपि केशान् न कर्तयन्ति। मस्तकस्य यत्र शिरासन्धीनां समुच्चयः तत्र मस्तके मस्तिष्कस्यावरणं यथा भवेत् तथा तत्र विद्यमानान् केशान् तथैव रक्षयित्वा अन्यान् केशान् कर्तयन्ति। रक्षितानां केशानां बन्धनं कुर्वन्ति। सैव शिखेत्युच्यते। चतुर्थे वर्षे चौलसंस्कारं कुर्वन्ति। केचन उपनयनेन सहैव चौलं कुर्वन्ति।

⇒ **यदि चौलसंस्कारः न भवेत्।**

वैखानसगृह्यसूत्रे उक्तं चौलं यदि योग्यकाले नाभवत् अथवा अमन्त्रकम् अभवत् तर्हि जातकर्मवत् प्रायश्चित्तं कृत्वा यथाशक्ति सुवर्णदानं पशुदानं ब्राह्मणभोजनं कृत्वा पुनः चौलं कर्तव्यम्।

- **चौडके कालेऽतीते मन्त्रवर्जं कृते च जातकाग्नौ वैष्णवं मूलहोमं ब्राह्मं वारुणमाग्नेयं रौद्रं च हुत्वा यथाशक्ति सुवर्णपशुदानब्राह्मणभोजनानि कृत्वा चौडकं कुर्यात्। (वैखा.गृह्य.६.५.४)**

⇒ **उपसंहारः - द्वितीयप्रकरणम् (जातकर्म, नित्यहोमलोपः, जननकालदोषप्रायश्चित्तम्, जननवैकृतदोषप्रायश्चित्तम्, नामकरणम्, निष्क्रमणम्, अन्नप्राशनम्, चौलम्)**

अस्मिन् प्रकरणे जननात् चौलान्ताः संस्काराः स्वीकृताः सन्ति। जातकर्म, नामकरणं, निष्क्रमणम्, अन्नप्राशनं, चौलम् एते संस्काराः बाल्यावस्थायां क्रियमाणाः सन्ति। जननकारणात् यत् जननाशौचं भवति तेन नित्यहोमस्य लोपो भवति, तदर्थं प्रायश्चित्तम् उक्तमस्ति। जननसमये यदि अयोग्यसमयः नाम अयोग्या तिथिः, अयोग्यं नक्षत्रम्, अयोग्यः योगः भवेत् तर्हि शान्तिः नाम प्रायश्चित्तं सूचितमस्ति। जनने यदि कापि विकृतिः भवेत् तर्हि प्रायश्चित्तं सूचितमस्ति। त्रयाणां पुत्राणां कन्यानां वा जन्मानन्तरं चतुर्थमपत्यं कन्या पुत्रो वा भवेत् प्रायश्चित्तं कुर्यात्। यदि हीनाङ्गम्, अधिकाङ्गं, दन्तसहितं, अपूर्णकालं, यमलम् एवं विविधप्रकारेण विकृतजननं भवेत् तर्हि प्रायश्चित्तं सूचितमस्ति। नामकरणनिष्क्रमणयोः विषये प्रायश्चित्तं नोक्तम्। अन्नप्राशनसंस्कारेण विना यदि बालेन अन्नं भक्षितं तर्हि प्रायश्चित्तं कर्तव्यम्। चौलसंस्कारस्य राहित्येऽपि प्रायश्चित्तं सूचितमस्ति।

## ३) उपनयनम्

जन्मना जातः मनुष्यः उपनयनसंस्कारेण द्वितीयवारं यदा पुनः जातः भवति तदा सः द्विज इति संज्ञया बोधितः भवति। निसर्गेऽपि अण्डजाः द्विजा इति संज्ञया ज्ञाताः सन्ति। आश्रमेषु प्रथमाश्रमः ब्रह्मचर्याश्रमः। ब्रह्मचर्याश्रमस्यारम्भः उपनयनसंस्कारेण भवति। उपनयनं नाम गुरुसमीपनयनम्। उप(समीपे)+नी(नयनम्)(१ प.प.) इति। ज्ञानग्रहणार्थं गुरुगृहे वासोऽनेन संस्कारेणारब्धो भवति। उपनयनं विभिन्नवर्णानां विभिन्नकाले विभिन्ने वयसि करणीयमिति सूत्रकाराः वदन्ति। यथा अष्टमे ब्राह्मणस्य, एकादशे क्षत्रियस्य, द्वादशे वैश्यस्य। अन्यत्र यथा कामना तथा वयः इत्यपि अन्यस्मिन् सूत्रे सूचितम् अस्ति। छात्राय अध्ययनार्थं पर्याप्तः समयः तथा छात्रस्य ज्ञानग्रहणसामर्थ्यं चिन्तितं स्यात्। प्रायः द्वादशवर्षाणि अध्ययनकालः तावत्पर्यन्तं ब्रह्मचर्यं गुरुसमीपे वासश्च सूचितोऽस्ति। परं यावत्पर्यन्तम् अध्ययनं समाप्तं न भवति तावत्पर्यन्तं ब्रह्मचर्यं गुरुसमीपे वासश्च करणीयः इति। अत्र वर्षाणां कालनिश्चयो नास्ति। आजीवनम् अपि ब्रह्मचर्यं शक्यम्। यदि बालस्य ग्रहणधारणबुद्धिः प्रबला स्यात् तर्हि बालस्याध्ययने विलम्बो मास्तु इति धिया पञ्चमे ब्राह्मणस्य षष्ठे क्षत्रियस्य अष्टमे वैश्यस्य उपनयनं शक्यते।

ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे।
राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे। मनुः २.३७

संस्कारेणानेन बालस्य नाम छात्रस्य व्रतत्वम् आरब्धं भवति अतः संस्काराय व्रतबन्ध इति नाम्नाऽपि वदन्ति। संस्कारे मुञ्ज इति नाम्नः तृणस्य रज्ज्वा छात्रस्य कटिबन्धनं कुर्वन्ति अतः संस्काराय मौञ्जीबन्धनमिति नाम्नाऽपि वदन्ति।

## ३.१) उपनयनम् (कालातिपत्यप्रायश्चित्तम्)

⇒ **यदि योग्यसमये उपनयनं न भवेत्।**

उपनयनस्य कालविषये गृह्यसूत्रेषु समानता दृश्यते। यथा आरम्भकालः समानः तथैव समाप्तिकालोऽपि समानो एव। परं सर्वेषु सूत्रेषु कालातिपत्यतादोषनिवारणार्थं प्रायश्चित्तं सूचितं नास्ति।

गोभिलगृह्यसूत्रे तथा च वाराहगृह्यसूत्रे उक्तं निश्चितसमये येषाम् उपनयनं नाभवत् तेषाम् उपनयनं न करणीयम्, तेभ्यः न अध्यापनीयं, तेषां द्वारा यजनं न करणीयं, तैस्सह व्यवहारो न करणीयः इति। योग्यसमये ये नोपनीताः ते पतितसावित्रिकाः भवन्ति। एवं प्रकारेण सूत्रे प्रायश्चित्तं न सूचितं परं मृदुलाव्याख्यायां व्रात्यस्तोमप्रायश्चित्तं सूचितम्।

- आषोडशाद् वर्षाद् ब्राह्मणस्यानतीतः कालो भवति आद्वाविंशात्क्षत्रियस्याचतुर्विंशाद्वैश्यस्य। अत ऊर्ध्वं पतितसावित्रिका भवन्ति। (नोपनयेयुः व्रात्यस्तोमात् क्रतोर्विना) नैनानुपनयेयुर्नाध्यापयेयुर्न याजयेयुर्नैभिर्विवहेयुः। (गोभि.गृह्य.२.१०.४-६)
- प्राङ्षोडशाद्वर्षाद् ब्राह्मणस्यापतिता सावित्री द्वाविंशात्क्षत्रियस्य चतुर्विंशाद्वैश्यस्य। अत ऊर्ध्वं पतितसावित्रिका भवन्ति। नैनान्याजयेयुर्नाध्यापयेयुर्न विवहेयुर्न विवाहयेयुः। (वारा.गृह्य.५.३)

आश्वलायनगृह्यसूत्रे प्रायश्चित्तं न सूचितं परं सूत्रस्य नारायणभाष्ये पतितसावित्रिकाः उद्दालकव्रतं चरित्वा शुद्धाः भूत्वा उपनयनं कर्तुमर्हन्ति इति सन्दर्भो दृश्यते।

- आषोडशाद् ब्राह्मणस्यानतीतः कालः। आद्वाविंशात्क्षत्रियस्याचतुर्विंशाद्वैश्यस्यात ऊर्ध्वं पतितसावित्रिका भवन्ति। (पतितसावित्रिका उद्दालकव्रतं चरेत्) नैनानुपनयेन्नाध्यापयेन्न याजयेन्नैभिर्व्यवहरेयुः। (आश्व.गृह्य.१.१९.५-७)

बोधायनगृह्यसूत्रे तु व्रात्यस्तोमप्रायश्चित्तम् उक्तम्।

- आषोडशात् ब्राह्मणस्यानात्यय इत्याद्वाविंशात् क्षत्रियस्याचतुर्विंशाद्वैश्यस्यात ऊर्ध्वं पतितसावित्रिका भवन्ति। नैनानुपनयेयुर्नाध्यापयेयुर्न याजयेयुः। तांस्त्रिवृता व्रात्यस्तोमेन याजयित्वा विवहयेयुः। (बोधा.गृह्य.३.१३.५-७)

पारस्करगृह्यसूत्रे तु केवलं विद्यमानस्य पुरुषस्य कालविषये नोक्तम् नाम केवलं तात्कालिकं नोक्तम् अपि तु त्रयाणां पुरुषाणां पितृपितामहप्रपितामहानामपि उपनयनं नाभवत् तदा किं करणीयमित्यपि चिन्तितमस्ति। तदर्थं व्रात्यस्तोमं कृत्वा व्रात्यतां निवार्य उपनयनं कर्तुमर्हन्ति इति।

- आषोडशाद्वर्षाद् ब्राह्मणस्य नातीतः कालो भवति। आ द्वाविंशाद्राजन्यस्य। आचतुर्विंशाद्वैश्यस्य। अत उर्ध्वं पतितसावित्रिकाः भवन्ति। नैनानुपनयेयुर्नाध्यापयेयुर्न याजयेयुर्न चैभिर्व्यवहरेयुः। कालातिक्रमे नियतवत् प्रायश्चित्तम्। त्रिपुरुषं पतितसावित्रिकाणामपत्ये संस्कारो नाध्यापनं च। तेषां संस्कारेप्सुर्व्रात्यस्तोमेनेष्ट्वा काममधीयीरन्व्यवहार्या भवन्तीति वचनात्। (पार.गृह्य.२.५.३६-४३)

वैखानसगृह्यसूत्रे स्थानद्वये उपनयनविषये उल्लेखो विद्यते। विद्याग्रहणाय बुद्धिमतः छात्रस्य विलम्बः मास्तु इति धिया यो बालः ब्रह्मवर्चसकामः नाम अध्ययनाय यस्य तीव्रा इच्छा तस्य पञ्चमे वर्षेऽपि उपनयनं कुर्यात्। अष्टमेनवमे श्रीकामस्य उपनयनं कुर्यात्। अत्र विशेषतया उल्लेखो विद्यते *वसन्ते ब्राह्मणस्य ग्रीष्मे राजन्यस्य(क्षत्रियस्य) शरदि वैश्यस्य उपनयनं कर्तव्यम्* इति। यदि उपनयनं नाभवत् तर्हि नवमे दशमेपि शक्यं परं षोडशं वर्षमतीतं चेत् उद्दालकव्रतं प्रायश्चित्तं कृत्वा अथवा श्रौतयागस्य समाप्तिसमये या अवभृतेष्टिः यत्र भवति तत्र उपस्थाय स्नानं कृत्वा अथवा व्रात्यस्तोमं कृत्वा गर्भाधानादिपूर्वान् संस्कारान् कृत्वा चान्द्रायणप्रायश्चित्तं कृत्वा शुद्धाः भूत्वा उपनयनं कर्तव्यमिति।

- अथ गर्भाधानादिवर्षे पञ्चमे ब्रह्मवर्चसकाममष्टमे नवमे श्रीकामं वसन्ते ब्राह्मणमुपनयीत। एकादशे ग्रीष्मे राजन्यम्। द्वादशे शरदि वैश्यम्। आषोडशाद्ब्राह्मणमाद्वाविंशात्

क्षत्रियमा चतुर्विंशावैश्यमिति वा। अतीते सावित्रीपतिता भवन्ति। तेषामुद्दालकप्रायश्चित्तम्। द्वौ मासौ यावकेन, मासं क्षीरेण, आमिक्षयार्धमासम्, अष्टरात्रं घृतेन, अयाचितं षड्रात्रं, त्रिरात्रमुदकेन, उपवासमहोरात्रं वर्तत इत्येतदुद्दालकम्, अनेन वा अश्वमेधावभृथस्नानेन वा व्रात्यस्तोमेन वेष्ट्वा पुनर्गर्भाधानादिसंस्कारान् करोति शुद्धाउपनेयाः सावित्रीपतिता भवन्तीति विज्ञायते। (वैखा.गृह्य.२.३.१-७)

- गर्भाधानाद्यष्टमे वर्षे ब्राह्मणस्योपनयनं श्रेष्ठं तदसम्भवे नवमे दशमे वाप्याषोडशात्कुर्यात्। षोडशे वर्षेऽतीते पूर्वोक्तमुद्दालकप्रायश्चित्तं गर्भाधानादिसंस्कारं च कृत्वा शुद्धे ब्राह्मणभोजनसुवर्णपशुदानानि कुर्यात्। पिता चान्द्रायणं चरित्वा तस्य जातकाग्निमाधायाघारं हुत्वा मिन्दाहुती ब्राह्मं वैष्णवञ्चाष्टशतमावर्त्य हुत्वा पूर्ववदुपनयनं कुर्यात्। (वैखा.गृह्य.६.७.५-७)

## ३.२) उपनयनम् (ब्रह्मचारिव्रतलोपः)

उपनीतेन ब्रह्मचारिणा व्रताचरणं करणीयम्। तदर्थम् उपनयनसमये ब्रह्मचारिणे व्रतोपदेशं करोति आचार्यः। व्रतोपदेशानुसारं व्रताचरणे यदि दोषः न्यूनता वा भवति तर्हि प्रायश्चित्तं कर्तव्यं भवति। ब्रह्मचारिणा येषां नियमानां नाम व्रतानां पालनं करणीयं तेषां पालनेन ब्रह्मचारिणः कतिचनलाभाः भवन्ति। अध्ययने न्यूनता न भवतु अध्ययनं योग्यरीत्या पूर्णं भवतु अत एव सर्वेऽपि नियमाः बोधिताः सन्ति।

⇒ **यदि ब्रह्मचारिणः व्रतभङ्गः भवेत्।**

बोधायनगृह्यसूत्रे उक्तं यस्मिन् दिने उपनयनं भवति ततः व्रताचरणं कृत्वा चतुर्थे दिने मेधाजननं कर्तव्यम्। तावन्ति चत्वारिदिनानि यदि व्रतभङ्गः कृतः तर्हि प्रायश्चित्तं कुर्यात्। तथा च अध्ययनसमये ये नियमाः सूचिताः सन्ति। तथा च यानि महानाम्न्यादीनि व्रतानि उक्तानि सन्ति तानि यदि न कृतानि प्रायश्चित्तं कुर्यात्। व्रतस्य कालः सूचितः अस्ति। द्वादशवर्षाणि अथवा अध्ययनसमाप्तिपर्यन्तम् तावत्पर्यन्तं व्रताचरणं भवेत्।

- ➢ तस्याग्रेण उत्तरेण वाऽग्निमुपसमाधाय सम्परिस्तीर्याऽथाव्रत्यप्रायश्चित्ते जुहोति - यन्म आत्मनो मिन्दाऽभूत्, पुनरग्निश्चक्षुरदात्। इति द्वाभ्याम्। (बोधा.गृह्य.२.५.६५)
- ➢ अथ देवयजनोल्लेखनप्रभृत्याग्निमुखात्कृत्वाऽथाव्रत्यप्रायश्चित्तं जुहोति- यन्म आत्मनो मिन्दाऽभूत्, पुनरग्निश्चक्षुरदात् इति द्वाभ्याम्। (बोधा.गृह्य.३.२.१७,४२)
- ➢ अथ देवयजनोल्लेखनप्रभृत्याग्निमुखात्कृत्वाऽथाव्रत्यप्रायश्चित्तं जुहोति- नाहं करोमि कामः करोति कामः कर्ता कामः कारयितैतत्ते काम कामाय स्वाहा, नाहं करोमि मन्युः करोति मन्युः कर्ता मन्युः कारयितैतत्ते मन्यो मन्यवे स्वाहा। (बोधा.गृह्य.३.३.६)

⇒ **यदि ब्रह्मचारिणः व्रतभङ्गः भवेत्।**

शाङ्खायनगृह्यसूत्रे, कौषीतकगृह्यसूत्रे, कौशिकगृह्यसूत्रे च उक्तं ब्रह्मचारिणः हस्ते उपनयनसमये दण्डः प्रदत्तो भवति। तथा मेखलया कटिबन्धनमपि कुर्वन्ति। तत्र केन वर्णेन कस्य वृक्षस्य दण्डः स्वीकार्यः तथा केन वर्णेन कया मेखलया कटिबन्धनं कर्तव्यम् इति पृथक् पृथक् सूचितमस्ति। विविधेषु गृह्यसूत्रेषु तथा सूचितमस्ति। (तेषां मेखलाः। मौञ्जी ब्राह्मणस्य धनुर्ज्या क्षत्रियस्य आवी वैश्यस्य। तेषां दण्डाः। पालाशो ब्राह्मणस्य औदुम्बरः क्षत्रियस्य बैल्वो वैश्यस्य केशसम्मितो ब्राह्मणस्य ललाटसम्मितः क्षत्रियस्य प्राणसम्मितो वैश्यस्य। आश्व.गृह्य१.१९.१०-१३) ब्रह्मचारिणा सर्वदा दण्डः स्वसमीपे नाम हस्ते धर्तव्यः। यद्यपि कारणवशात् दण्डः अन्यत्र स्थापितः तथापि आत्मनः दण्डस्य च मध्यात् केनापि न गन्तव्यम्। दण्डः, मेखला, उपवीतम् एतेषु किमपि जीर्णमभवत् अथवा छिन्नमभवत् तदा अन्यत् स्वीकरणीयं तथा विवाहोत्तरं कन्यायाः उद्वाहसमये यदि रथाङ्गं छिन्नं भवति तर्हि यत् प्रायश्चित्तं कर्तव्यं भवति समानं प्रायश्चित्तम् अत्रापि कर्तव्यम्।

- अथातो दण्डनियमः। न अन्तरागमनं कुर्यादात्मनो दण्डस्य। अथ चेद्दण्डमेखलोपवीतानामन्यतमद्विशीर्येत छिद्येत वा तस्य तत्प्रायश्चित्तं यदुद्वाहे रथस्य। मेखला चेदसन्धेया भवत्यन्यां कृत्वानुमन्त्रयते, मेध्यामेध्यविभागज्ञे देवि गोप्त्री सरस्वति। मेखलेस्कन्नविच्छिन्ने सन्तनुष्व व्रतं मम।(शाङ्खा.गृह्य.२.दण्डनियमाः.१-५)
- अथातो दण्डनियमः। नान्तरागमनं कुर्यादात्मनो दण्डस्य च। अथ चेद् दण्डमेखलोपवीतानामन्यतमद्विशीर्येत छिद्येत वा तस्य तत्प्रायश्चित्तिः यदुद्वाहे रथस्य। मेखला चेदसन्धेया भवति अन्यां कृत्वानुमन्त्रयते, मेध्यामेध्यविभागज्ञे देवि गोप्त्री सरस्वति। मेखले स्कन्नविच्छिन्ने सन्तनोषि व्रतं मम। इति। एतयैव यथार्थमुपवीते। (कौषी.गृह्य.२.८.१-५)
- यद्यस्य दण्डो भज्येत य ऋते चिदभिश्रिष इत्येतयालभ्याभिमन्त्रयते। सर्वत्र शीर्णे भिन्ने नष्टेऽन्यं कृत्वा पुनर्मैत्विन्द्रियम् इत्यादधीत। (कौशि.गृह्य.५७.७,८)

⇒ **यदि व्याधिरहितोऽपि विलम्बेन उत्थितो भवेत्।**

आश्वलायनगृह्यसूत्रे उक्तं व्याधिरहितो भूत्वाऽपि विलम्बेन नाम सूर्योदयानन्तरम् उत्थितं तर्हि *येन सूर्य ज्योतिषा बाधसे तम* इत्यादिभिः पञ्चभिः सूर्योपस्थानं कुर्यात्। अयोग्यकर्मणा नृत्यादिना श्रान्त्या यदि विलम्बः स्यात् तदा *यस्य ते विश्वा* इत्यादिभिः चतसृभिः सूर्योपस्थानं कुर्यात्।

➢ अव्याधितं चेत्स्वपन्तमादित्योऽभ्यस्तमियाद्वाग्यतोऽनुपविशन् रात्रिशेषं भूत्वा येन सूर्य ज्योतिषाबाधसे तम इति पञ्चभिरादित्यमुपतिष्ठेत्।। अभ्युदियाच्चेदकर्मश्रान्तमनभिरूपेण कर्मणा वाग्यत इति समानमुत्तराभिश्चतसृभिरुपस्थानम्। (आश्व.गृह्य.३.७.१,२)

⇒ **यदि सूर्योदयानन्तरं ब्रह्मचारी उत्थितः भवेत्।**

जैमिनीयगृह्यसूत्रे, हिरण्यकेशीगृह्यसूत्रे, तथा च कौशिकगृह्यसूत्रे च उक्तं ब्रह्मचारिणा सूर्योदयात् पूर्वमेव उत्थानं कर्तव्यम् इति नियमः परं यदि सूर्योदयानन्तरं ब्रह्मचारी उत्थितः तर्हि न किमपि खादेत् न किमपि वदेत् सावित्रीं मनसा ध्यायेत्।

➢ स यदि सूर्योभ्युदितः सूर्याभिनिम्रुक्तो वा तच्छेषं सावित्रीं मनसा ध्यायेत्सैव तत्र प्रायश्चित्तिः। (जैमि.गृह्य.१.१३)

➢ सूर्याभ्युदितोऽहनि नाश्नीयाद्वाग्यतोऽहस्तिष्ठेत्। सूर्याभिनिम्रुक्तो रात्रावेवम्। (हिर.गृह्य.१.५.१५,१६)

➢ बृहस्पते सवित इत्यभ्युदितं ब्रह्मचारिणं बोधयति। (कौशि.गृह्य.५९.१८)

⇒ **यदि सूर्योदयसमये उपस्थानं न कृतम्।**

मानवगृह्यसूत्रे सूचितं यत् सूर्योदयसमये करणीयम् उपस्थानं न कृतं तर्हि निश्चितानां मन्त्राणां पठनं कुर्यात्। सूर्यास्तसमये करणीयम् उपस्थानं न कृतं तर्हि निश्चितानां मन्त्राणां पठनं कुर्यात्। अथवा द्वयोः मन्त्रयोः पठनं कुर्यात्। यदि अनाचरणीयम् आचरेत्, अभोज्यम् अन्नं खादेत्, अक्षिस्पन्दनं भवेत्, चिति आरोहणं

स्मशानगमनं वा भवेत् अथवा विविधैः कारणैः वा व्रतभङ्गः भवेत् तर्हि समानमन्त्रद्वयेन हवनं कुर्यात् केवलं मन्त्रपठनं वा कुर्यात्।

- यमेवं विद्वांसमभ्युदियाद्वाभ्यस्तमियाद्वा प्रतिबुध्य जपेत्। पुनर्मामैत्विन्द्रियं पुनरायुः पुनर्भगः। पुनर्द्रविणमैतु मां पुनर्ब्राह्मणमैतु माम्। अथो यथेमे धिष्ण्यासो अग्नयो यथास्थानं कल्पयन्तामिहैव। इत्यभ्युदितः। पुनर्म आत्मा पुनरायुरैतु पुनः प्राणः पुनराकूतिरैतु। वैश्वानरो वावृधानो वरेणान्तस्तिष्ठतो मे मनो अमृतस्य केतुः। इत्यभ्यस्तमितः। उभावेव वाभ्युदितो जपेदुभावेव वाभ्यस्तमितः। यद्यचरणीयान्वाचरेदनाक्रोश्यान्वाक्रोशेदभोज्यस्य वान्नमश्नीयादक्षि वा स्पन्देत्कर्णो वा क्रोशेदग्निं वा चित्यमारोहेत् श्मशानं वा गच्छेद्यूपं वोपस्पृशेद्रेतसो वा स्कन्देदेताभ्यामेव मन्त्राभ्यामाहुती जुहुयात्। अपि वाज्यलिप्ते समिधावादध्यादपि वा मन्त्रावेव जपेत्। एवमधर्ममाचर्याऽस्थूलम्। (मान.गृह्य.१.३.१-५)

⇒ **यदि कश्चनदोषः स्यात्।**

कौषीतकगृह्यसूत्रे शाङ्खायनगृह्यसूत्रे च उक्तं यदि कश्चन दोषः भवेत् तर्हि त्रिरात्रम् उपोषणं कुर्यात् अथवा सावित्रीमन्त्रस्य यावत् शक्यम् आवर्तनं कुर्यात्। दण्डस्य तथा स्वस्य मध्यात् यदि कोपि गच्छति तर्हि ब्राह्मणाय किञ्चित् दत्वा अतः परं योग्यरीत्या वर्तेत।

- यदि चेत् दोषः स्यात् त्रिरात्रमुपोष्याहोरात्रं वा सावित्रीं चाभ्यावर्तयित्वा यावच्छक्नुयात्। दण्डस्यान्तरागमने ब्राह्मणाय यत् किञ्चिद्दद्यात् अतः परमधीयीत। (कौषी.गृह्य.३.९.५९,६०)
- यदि चेद्दोषः स्यात् त्रिरात्रमुपोष्याहोरात्रं वा सावित्रीमभ्यावर्तयेद्यावच्छक्नुयाद्। ब्राह्मणेभ्यः किञ्चिद्दद्यादहोरात्रमुपरम्य प्राध्ययनम्। (शाङ्खा.गृह्य.४.उपरमकर्म.२०)

⇒ **यदि ब्रह्मचारिणा यूपस्पर्शः कृतः।**

हिरण्यकेशीगृह्यसूत्रे, खादिरगृह्यसूत्रे उक्तं यज्ञकर्मणि यत्र पशोः बन्धनं भवति स स्तम्भः यूप इत्यनेन उच्यते। तस्य यूपस्य स्पर्शः ब्रह्मचारिणा न कर्तव्यः इति नियमः। परं यदि एकस्य यूपस्य स्पर्शः कृतः तर्हि *एष ते वायो* इति मन्त्रजपं कुर्यात्। द्वयोः यूपयोः स्पर्शः कृतः *एतौ तौ वायू* इति मन्त्रजपं कुर्यात्। यदि त्रयाणां यूपानां स्पर्शः कृतः *एते ते वायव* इति मन्त्रजपं कुर्यात्।

➢ न यूपमुपस्पृशेद्यद्युपस्पृशेद्दुरिष्टं यज्ञस्य प्रतिमुञ्चीत यद्येकमुपस्पृशेदेष ते वायो इति ब्रूयाद्यदि द्वावेतौ तौ वायू इति यदि बहूनेते ते वायव इति। (हिर.गृह्य.१.५.१७)

➢ चितियूपोपस्पर्शनकर्णक्रोशाक्षिवेपनेषु सूर्याभ्युदितस्सूर्याभिनिर्मुक्त इन्द्रियैश्च पापस्पर्शैः पुनर्मामित्येताभ्यामाहुतिं जुहोति। आज्यलिप्ते वा समिधौ। जपेद्वा लघुषु। (खादि.गृह्य.२.५.३५-३७)

⇒ **यदि यज्ञोपवीतेन विना ब्रह्मचारी भवेत्।**

हिरण्यकेशीगृह्यशेषसूत्रे उक्तं यत् एकं दिनमपि यज्ञोपवीतेन विना ब्रह्मचारी न भवेत्। यज्ञोपवीतं सर्वदा शरीरे एव भवेत्। तथापि प्रमादवशात् तथा भवति तर्हि प्रायश्चित्तं कुर्यात्।

➢ दिनमेकमपि यज्ञोपवीतेन विना स्थितः शूद्रत्वमाप्नोति मृतः सूकरतां व्रजेत्। कायस्थमेव धार्यम्। कदाचन नोद्धरेत्। तस्य सकृदुद्धरणेन प्रायश्चित्ती भवेत्। (हिर.गृह्यशेष.१.१.७)

⇒ **यदि उपनयनाग्निः नष्टः भवेत्।**

कौशिकगृह्यसूत्रे उक्तम् उपनयनसमये यस्य अग्नेः स्थापना कृताऽस्ति सोऽग्निः नाम उपनयनाग्निः यदि नष्टः भवेत् तर्हि मय्यग्रे इत्यादि पञ्चप्रश्नेन होमं कुर्यात्।

➢ मय्यग्रे इति पञ्चप्रश्नेन जुहोति । (कौशि.गृह्य.५७.२१)

⇒ **यदि ब्रह्मचारीव्रतलोपः स्यात्।**

कौशिकगृह्यसूत्रे उक्तम् ब्रह्मचारिव्रतलोपः नाम स्त्रीसङ्गेन व्रतभङ्गः यदि स्यात् तर्हि प्रायश्चित्तं कुर्यात्। दर्भरज्ज्वा बन्धनं कृत्वा उदकेन प्रोक्षणं कुर्यात्।

➢ अवकीर्णिने दर्भशुल्बमासज्य यत्ते देवी इत्यावपति। एवं सम्पातवतोदपात्रेणावसिच्य। मन्त्रोक्तं शान्त्युदकेन संप्रोक्ष्य। (कौशि.गृह्य.४६.१९-२१)

⇒ **यदि सध्यावन्दनेन विना ब्रह्मचारी भवेत्।**

हिरण्यकेशीगृह्यशेषसूत्रे उक्तम् उपनीतः मनुष्यः प्रातः सायं च सन्ध्यावन्दनं कुर्यात्। यदि न कृतं तर्हि राज्ञा एतादृशः आचारहीनः हीनकर्मणि योजनीयः। सन्ध्यावन्दनं नाम प्रायश्चित्तमेव। मनसावाचाहस्ताभ्यां पद्भ्यामुदरेण शिश्ना यानि पापकर्माणि कृतानि तानि सन्ध्यावन्दनेन दूरीभवन्ति। प्रातः कृतेन सन्ध्यावन्दनेन रात्रौ कृतानि पापानि दूरीभवन्ति, सायं सन्ध्यावन्दनेन दिने कृतानि पापानि दूरीभवन्ति। प्रातःकालः अतीतः तथापि सन्ध्यावन्दनं न कृतं तदा आदिनम् उपवासः करणीयः। सायङ्कालः अतीतः तथापि सन्ध्यावन्दनं न कृतं तदा आरात्रि उपवासः करणीयः।

➢ अनागतां तु ये पूर्वामनतीतां तु पश्चिमाम्।
सन्ध्यां नोपासते विप्राः कथं ते ब्राह्मणाः स्मृताः।
सायं प्रातः सदा सन्ध्यां ये विप्रा न ह्युपासते।
कामं तान्धार्मिको राजा शूद्रकर्मसु योजयेत्। इति। तत्र सायमतिक्रमे रात्र्युपवास प्रातरतिक्रमेऽहरुपवासः। स्थानासनफलमवाप्नोति। अथाप्युदाहरन्ति-
यदुपस्थकृतं पापं पद्भ्यां वा यत्कृतं भवेत्।
बाहुभ्यां मनसा वाऽपि वाचा वा यत्कृतं भवेत्।
सायं सन्ध्यामुपस्थाय तेन तस्मात्प्रमुच्यते। रात्र्या चापि सन्धीयते। न चैनं वरुणो गृह्णाति। एवमेव प्रातरुपस्थाय रात्रिकृतात्पापात्प्रमुच्यते। अह्ना चापि सन्धीयते। (हिर.गृह्यशेष.१.२.५)

⇒ **यदि ब्रह्मचारी स्नानविहीनः स्यात्।**

वैखानसगृह्यसूत्रे उक्तं नित्यस्नानविहीनेन पूर्ववत् स्नानं कृत्वा नारायणस्मरणं कृत्वा अघमर्षणसूक्तेन अघमर्षणं, विष्णुदैवताकमन्त्राणां जपं च कुर्यात्। सन्धावन्दनं न कृतं तदा स्नानं, दशवारं प्राणायामः, अष्टशतवारं सावित्रीजपः, सन्ध्यावन्दनं, वैष्णवान्सौरमन्त्रान् जप्त्वा अनशनं कुर्यात्। तर्पणं न कृतं तर्हि द्विवारं तर्पणं कुर्यात्। ब्रह्मयज्ञः न कृतः तदा पुरुषसूक्तपूर्वकं यजुःसंहितायाः स्वाध्यायः कर्तव्यः। प्रातःकाले समिध्होमः न कृतः तदा सायङ्काले द्विगुणं कुर्यात्। सायङ्काले समिध्होमः न कृतः तदा प्रातःकाले द्विगुणं कुर्यात्। दिनत्रयं स्नानादिः न कृतं तदा स्नानं कृत्वा सूर्याय अग्नये च समिद्भिः होमः समाचरणीयः। यदि सप्तरात्रौ स्नानादिः न कृतं तदा सर्वदा बाह्यः भवति। तदा अवकीर्णप्रायश्चित्तं कर्तव्यम्।

➢ नित्यस्नानविहीने पूर्ववत्स्नात्वा जुम्बकाय स्वाहेति निमज्ज्य नारायणं ध्यायन्सजुम्बकेनाघमर्षणसूक्तेनाघमर्षणं कृत्वा वैष्णवमन्त्राञ्जपति। सन्ध्योपासनविहीने स्नात्वा दश प्राणायामान्कृत्वाष्टशतं सावित्रीमधीत्य सन्ध्यामुपास्य वैष्णवान्सौरमन्त्रांश्च जपति। पुनःसन्ध्यागमादनशनं कृत्वा सन्ध्यामुपासीतेत्येके। तर्पणहीने द्विगुणं तर्पयति। ब्रह्मयज्ञविहीने पुरुषसूक्तपूर्वं यजुःसंहितां स्वाध्यायं करोति। प्रातःसमिध्होमे हीने सायं द्विगुणं सायं हीने प्रातर्द्विगुणम्। दिनत्रये स्नानादौ हीने पूर्ववत्स्नानजपं कृत्वा सौरमाग्नेयं च हुत्वा समिद्भिर्जुहुयात्। सप्तरात्रौ हीने नित्यकर्मण्यवकीर्णो भवति। (वैखा.गृह्य.६.८.२-९)

⇒ **यदि विविधप्रकारेण ब्रह्मचारिणः व्रतभङ्गः भवेत्।**

वैखानसगृह्यसूत्रे उक्तं नित्यपारायणं न कृतं, व्रतस्य बन्धनं त्यक्तं, व्रतेषु कालः अतीतः, तदा उपनयनाग्निं पुनः संस्थाप्य आघाराहुतिं हुत्वा यानि व्रतानि न कृतानि तानि व्रतसूक्तानि वैष्णवसूक्तं च चतुरावृत्य तेन होमं कृत्वा वेदव्रतानां बन्धनं विसर्गं नाम मोचनं च कर्तव्यम्। उपाकर्मणः न कृते चतुर्वेदादिमन्त्रान्ब्राह्ममार्षं चतुरावृत्य होमं कृत्वा उपाकर्म कुर्यात्। श्रावणहोमं न कृते उपाकर्मवत् प्रायश्चित्तं करणीयम्। वेदव्रतानि आचरन्

वेदानाम् अध्ययनं कुर्यात्। परं यदि वेदानाम् अध्ययनं न कृतं तर्हि सर्वकर्मबहिष्कृतो भवति अतः अशक्तेनापि किञ्चित् वेदाध्ययनं कर्तव्यम्। समावर्तनं कृत्वा समावृतेन स्नातकेन विवाहपर्यन्तं नित्यम् आज्यहोमः कर्तव्यः।

➢ पारायणव्रतबन्धविसर्गे च कालेऽतीते हीनेऽप्युपनयनाग्निमाधायाघारान्ते तत्तद्व्रतसूक्तं वैष्णव चतुरावर्त्य हुत्वा वेदव्रतानां बन्धं विसर्गं च कुर्यात्। उपाकर्मणि चतुर्वेदादिमन्त्रान्ब्राह्ममार्षं चतुरावर्त्य हुत्वोपाकर्म कुर्वीत। श्रावणहोमं हुत्वान्ते सावित्र्या सहस्रसमिधो जुहोति। श्रावणे चोपाकर्मवत्प्रायश्चित्तं विधीयते। प्राजापत्यादिवेदव्रतान्याचरन् वेदानधीयीत। अनधीयानः सर्वकर्मबहिष्कार्यो भवति। अशक्तोऽपि यत्किञ्चिच्छाखामधीयीत। समावर्तनं कृत्वा स्नातको व्याहृत्याग्नावाज्यमापाणिग्रहणन्नित्यं जुहोति (वैखा.गृह्य.६.११.१-८)

⇒ **यदि विविधप्रकारेण ब्रह्मचारिणः व्रतभङ्गः भवेत्।**

अग्निवेश्यगृह्यसूत्रे उक्तं विविधप्रकारेण यदि ब्रह्मचारिणः व्रतलोपो भवेत्। कूश्माण्डमन्त्रैः होमं कृत्वा प्रायश्चित्तं कुर्यात्।

➢ अथ कूश्माण्डैर्जुहुयाद् योऽपूत इव मन्येत यथा स्तेनो यथा भ्रूणहैवमेष भवति योऽयोनौ रेतः सिञ्चति। अत्र स्वप्नान्तरे रेतः पतेदपिवा स्त्रीकामो वा । अमावास्यायां पौर्णमास्यां वा केशश्मश्रुलोमनखानि वापयित्वा स्नातः शुद्धवासा ब्रह्मचारिकल्पेन व्रतमुपैति वत्सरं मासं चतुर्विंशतिमहोरात्रं द्वादशरात्रं षड्रात्रं त्रिरात्रं वा। न मांसमश्नीयान्न स्त्रियमुपेयान्नोपर्यासीत जुगुप्सेतानृतात्। पयोभक्ष इति प्रथमः कल्पः। कृच्छ्रं द्वादशरात्रं चरेत्। भिक्षेद्वा। (अग्नि.गृह्य.२.४.३)

⇒ **यदि विविधप्रकारेण ब्रह्मचारिणः व्रतभङ्गः भवेत्।**

अग्निवेश्यगृह्यसूत्रे उक्तं स्त्रीसङ्गेन, रेतःपातेन, सन्ध्यालोपेन, उदकुम्भलोपेन, अग्निकार्यलोपेन ब्रह्मचारिणः व्रतलोपो भवति। अन्यैः कारणैः वा ब्रह्मचारिणः व्रतलोपः भवति चेत् शुष्कं शुभ्रं वस्त्रं धृत्वा उपवासः कर्तव्यः। नियमाचरणं कृत्वा अमावास्यायां

रात्र्यां अग्निस्थापनां कृत्वा व्याहृतिहोमं कृत्वा *कामावकीर्णोऽस्म्यवकीर्णोऽस्मि कामकामाय स्वाहा*, *कामाभिद्रुग्धोऽस्म्यभिद्रुग्धोऽस्मि कामकामाय स्वाहा* इति मन्त्रद्वयेन होमः कर्तव्यः। पुनर्मामैत्विन्द्रियम् इत्येतमनुवाकं प्रत्यृचमाज्यस्य जुहुयात्। यद्देवा देवहेळनम् इत्येतमनुवाकं प्रत्यृचमाजस्य जुहुयात्। वारुण्यादिजयाप्रभृति होमं कुर्यात्। गुरवे गोदानं कुर्यात्।

➢ अथ ब्रह्मचार्यवकीर्णी भवति योऽयोनौ रेतःपातेन वा सन्ध्यालोपेन वोदकुम्भलोपेनाग्निकार्यलोपेन वा। अन्यानि निमित्तानि भवन्ति चेच्छुक्लमनार्द्रमाच्छाद्य कृतोपवासः कृतनियमयन्त्रोऽमावास्यायां रात्र्यामग्निमुपसमाधाय व्याहृतिपर्यन्तं कृत्वा द्विराजस्योपघातं जुहोति कामावकीर्णोऽस्म्यवकीर्णोऽस्मि कामकामाय स्वाहा, कामाभिद्रुग्धोऽस्म्यभिद्रुग्धोऽस्मि कामकामाय स्वाहा इति। पुनर्मामैत्विन्द्रियम् इत्येतमनुवाकं प्रत्यृचमाज्यस्य जुहुयात्। यद्देवा देवहेळनम् इत्येतमनुवाकं प्रत्यृचमाजस्य जुहुयात्। वारुण्यादिजयाप्रभृति सिद्धमाधेनुवरप्रदानात्। गुरवे गां ददाति। (अग्नि.गृह्य.२.७.५)

⇒ **यदि स्वप्ने ब्रह्मचारिणः व्रतभङ्गः भवेत्।**

अग्निवेश्यगृह्यसूत्रे उक्तं स्वप्नावस्थायां वीर्यपतनं भवेत्। वस्त्राणि परिवर्त्य समुद्रादि तीर्थेषु स्नात्वा विशिष्टं मन्त्रपठनं कृत्वा शुद्धः पूतः भवति।

➢ अथ स्वप्ने शुक्लं पतेद् वासांसि विसृज्यान्यत् परिदधाति। उपव्युषसि ग्रामात् प्राचीमुदीचीं दिशमुपनिष्क्रम्य नदीषु स्नायात्। समुद्रगानदीस्नानात् त्रिरात्रं फलमश्नुते। समुद्रगानदीस्नानात् पक्षोपोषणमेव च। सरित्पतेस्त्वमावास्यामनन्तमयने विषौ। इत्येवं स्नानं यथाविधि तथा करोति। पुनर्मामैत्विन्द्रियम् इत्येतमनुवाकेन जप्त्वा पूतो भवति। (अग्नि.गृह्य.२.७.५)

⇒ **यदि ब्रह्मचारिणः व्रतभङ्गः भवेत्।**

काठकगृह्यसूत्रे उक्तं यदि सप्तदिनपर्यन्तं भिक्षाचरणे दोषः भवति, अग्निकार्यस्य लोपः च भवति तर्हि प्रायश्चित्तं करणीयम्।

➢ भैक्षस्याचरणे दोषः पावकस्यासमिन्धने। सप्तरात्रमकृत्वैतदवकीर्णिव्रतं चरेत्। (काठक.गृह्य.१.३२.)

⇒ **यदि स्त्रीसङ्गेन ब्रह्मचर्यस्य व्रतलोपः भवेत्।**

पारस्करगृह्यसूत्रे उक्तम् यदि ब्रह्मचर्यस्य व्रतलोपो भवति तर्हि अमावास्यायां गर्दभपशोः आलम्भनं कुर्यात्। निर्ऋतये पाकयज्ञेन यागं कुर्यात्। अप्सु अवदानहोमं कुर्यात्। भूमौ पशोः तथा पुरोडाशस्य श्रपणं कुर्यात्। एकवर्षपर्यन्तं भिक्षाचरणं कृत्वा स्वस्य अपराधस्य कथनं कुर्यात्। तथा च कामावकीर्णोऽस्मि इत्यादिभिः मन्त्रैः होमं कुर्यात्। तथा सं मा सिञ्चतु इति मन्त्रेण उपस्थानं कुर्यात्।

➢ अथातोऽवकीर्णिप्रायश्चित्तम्। अमावास्यायां चतुष्पथे गर्दभं पशुमालभते। निर्ऋतिं पाकयज्ञेन यजेत। अप्स्ववदानहोमः। भूमौ पशुपुरोडाशश्रपणम्। तां छविं परिदधीत। ऊर्ध्वबालामित्येके। संवत्सरं भिक्षाचर्यं चरेत्स्वकर्म परिकीर्तयन्। अथापरमाज्याहुतीः जुहोति। कामावकीर्णोऽस्मि कामकामाय स्वाहा। कामाभिदुग्धाऽस्म्यभिदुग्धोऽस्मि कामकामाय स्वाहेति। अथोपतिष्ठते सं मासिञ्चन्तु मरुतः सम्बृहस्पतिः । संमायमग्निः सिञ्चतु प्रजया च धनेन चेति। एतदेव प्रायश्चित्तम्। (पार.गृह्य.३.१२.१-११)

⇒ **यदि ब्रह्मचर्यस्य विच्छेदः भवेत्।**

कौथुमगृह्यसूत्रे उक्तं प्रातराहुतिः तथा च ब्रह्मचर्यविच्छेदनिमित्तं होमं कुर्यात्।

➢ ब्रह्मचर्यविच्छिन्ने लौकिकेऽग्नौ प्रातराहुतिपूर्वकं नैमित्तिकं कार्यम्। (कौथु.गृह्य.१)

⇒ **यदि ब्रह्मचारिणः व्रतभङ्गः भवेत्।**

वैखानसगृह्यसूत्रे उक्तं ब्रह्मचारिणा योग्यप्रकारेण गुरुणा उपदिष्टेन मार्गेण आचरणं कर्तव्यं परं यदि ब्रह्मचारी तथा योग्यरीत्या आचरणं न करोति तर्हि गुरुणा दण्डेन दुष्टवाक्यैः ताडनं न कर्तव्यं शिष्येण कृच्छ्रप्रायश्चित्तम् आदिष्टव्यं कारयितव्यं च।

➢ चोदितातिक्रमे दण्डेन न हन्यात्। दुष्टवाक्यैर्न शपति। अतिक्रमानुरूपं कृच्छ्रमादिशति। (वैखा.गृह्य.२.८.१०-१२)

## ३.३) उपनयनम् (पुनरुपनयनम्)

उपनीतेन कीदृशम् आचरणं करणीयम् इति तु निश्चितमेव। आचरणे यदि कश्चन दोषः भवति तर्हि किं प्रायश्चित्तं करणीयं तदपि सूचितम्। परं यदा अत्यन्तम् अयोग्यम् आचरणं भवति। प्रायश्चित्तेनापि समाधातुम् अशक्यम् आचरणं भवति तदा पुनरुपयनं पुनस्संस्कार एव करणीयः भवति। अत्र चिन्तनीयः विषयः नाम यावत् शक्यं प्रायश्चित्तेन कार्यं साधयितुं प्रयत्नः कृतः अस्ति। परं ततोऽपि हीनं निद्यं कार्यं कृतम्। येन पूर्वं कृतः संस्कारः अपि बाधितः अभवत् तदा पुनस्संस्कारः एव करणीयः भवति।

⇒ **यदि विविधप्रकारेण ब्रह्मचारिणा नियमभङ्गः कृतः।**

बोधायनगृह्यपरिभाषासूत्रे हिरण्यकेशीगृह्यशेषसूत्रे च उक्तम् उपनीतेन कथमाचरणं करणीयम् इति। यथा उच्छिष्टभोजनं न करणीयम्, स्त्रियासह भोजनं न करणीयम्, मधुमांसभक्षणं, श्राद्धान्नभक्षणं, मृतात् दशाहे सूतकान्नभक्षणं, अकाले दुग्धायाः गवः दुग्धप्राशनं, छत्राकनिर्यासयोः विलयनं, गणे अन्नभक्षणं, गणिकायाः गृहे अन्नभक्षणं एतानि निषिद्धकार्याणि यदि कृतानि तर्हि पुनः उपनयनं कर्तव्यम्। सौराष्ट्रं, सिन्धुं, सौवीरं, अवन्तिं, दक्षिणापथं एतानि स्थानानि निषिद्धानि। तत्र यदि गतं तर्हि पुनः उपनयनसंस्कारः करणीयः। विधिवत् अग्निं संस्थाप्य पालाशीं समिद् आज्येन आर्द्रां कृत्वा *पुनस्त्वादित्या रुद्रा* इति मन्त्रेण समिद्धोमः कर्तव्यः। अव्रत्यप्रायश्चित्ताहुतिद्वयेन होमः, तथा पक्वाहुत्या होमः, पुनः आज्याहुत्या होमः स्विष्टकृतादि होमः कर्तव्यः। अन्यस्य मतेन पालाशीं समिद् होमः तथा व्याहृत्या होमः कर्तव्यः। अन्यस्य मतेन सावित्रीमन्त्रेण शतवारं घृतस्य अभिमन्त्रणं कृत्वा तद् घृतं प्राश्नीयात्। गुरोः उच्छिष्टं भोक्तव्यम्। एवं प्रायश्चित्तं कृत्वा पुनस्संस्कारः कर्तव्यः। पुनस्संस्कारे केशवपनं, दक्षिणादानं, मेखलादण्डमजिनधारणं, भिक्षाचर्यं च भवति।

- अथ उपनीतस्य अव्रत्यानि भवन्ति। नान्यस्योच्छिष्टं भुञ्जीत। न स्त्रिया सह भुञ्जीत। मधुमांसश्राद्धसूतकान्ननिर्दशाहं सन्धिनीक्षीरं छत्राकनिर्यासौ विलयनं गणान्नं गणिकान्नमित्येतेषु पुनस्संस्कारः। प्रतिषिद्धदेशगमनमित्येकेषाम्। अथाप्युदाहरन्ति- सौराष्ट्रं सिन्धुसौवीरमवन्ती दक्षिणापथम्। एतानि ब्राह्मणो गत्वा पुनस्संस्कारमर्हतीति।

अथ पुनस्संस्कारान् व्याख्यास्यामः।

अथ देवयजनोल्लेखनप्रभृत्याग्निमुखात्कृत्वा पालाशीं समिधमाज्येनाक्त्वाऽभ्याधापयन् वाचयति पुनस्त्वादित्या रुद्रा वसवस्समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः। घृतेन त्वं तनुवो वर्धयस्व सत्यास्सन्तु यजमानस्य कामास्वाहा। अथाव्रत्यप्रायश्चित्ते जुहोति यन्म आत्मनो मिन्दाऽभूत्, पुनरग्निश्चक्षुरदात् इति द्वाभ्याम् । अथ पक्वाज्जुहोति सप्त ते अग्ने समिधस्सप्त जिह्वा इति। अथाज्याहुतीरुपजुहोति- येन देवाः पवित्रेण इति तिसृभिरनुच्छन्दसम्। स्विष्टकृत्प्रभृति सिद्धमाधेनुवरप्रदानात्। अथापरः आपरिधानात्कृत्वा पालाशीं समिधमाधायाव्रत्यप्रायश्चित्ते जुहोति। अथ व्याहृतिभिर्जुहोति। अथापरः ब्राह्मणवचनादेव सावित्र्या शतकृत्वो घृतमभिमन्त्र्य प्राश्य कृतप्रायश्चित्तो भवति। गुरोर्वोच्छिष्टं भुञ्जीत। अथाप्युदाहरन्ति वपनं दक्षिणादानं मेखलादण्डमजिनं भैक्षाचर्याव्रतानि चैतानि निवर्तन्ते पुनस्संस्कारकर्मणि। एते पुनस्संस्कारा व्याख्याताः। (बोधा.गृह्यपरि.१.१२.१-१८)(हिर.गृह्यशेष.१.३.१८)

⇒ **यदि विविधप्रकारेण ब्रह्मचारीव्रतलोपः भवेत्।**

अग्निवेश्यगृह्यसूत्रे उक्तं यदि गुरुं विहाय अन्यस्य उच्छिष्टं भक्षितं, मधुमांसं भक्षितं, सन्ध्यावन्दनं न कृतं, उदकुम्भो न रक्षितः, अग्निकार्यं लुप्तं, गुरुम् अथवा सम्बधिनं विहाय अन्यस्य प्रेतस्य अनुगमनं कृतं, प्रेतं दग्धं तर्हि ब्रह्मचर्यस्य क्षतिः भवति। एतैः अथवा अन्यैः निमित्तैः वा ब्रह्मचर्यस्य लोपो भवति। पूर्वपक्षे पुण्यकारके नक्षत्रे गोमयेन स्थण्डिलम् उपलिप्य यमनियमैः व्रतोपवासैश्च प्रायश्चित्तं कुर्यात्। तेन पूतो भवति, पवित्रो भवति।

➢ पुनरुपनयनं व्याख्यास्यामः।

अगुरोरुच्छिष्टभक्षी मधुमांसभक्षी भवति। सन्ध्याकार्यं उदकुम्भेऽग्निकार्ये चिरलोपी भवति। अगुरोःप्रेतमनुगच्छेद् दहेद्वा। उभयत्र दशाहानि कुलान्यन्नवेजञ्च ब्रह्मचर्यक्षतिर्भवति। एतैश्चान्यैश्च निमित्तानि भवन्ति चेत् पूर्वपक्षे पुण्ये नक्षत्रे गोमयेन गोचर्ममात्रं स्थण्डिलमुपलिप्य यमनियमैः व्रतोपवासैश्च प्रायश्चित्तं

कृत्वा अग्निमुपसमाधाय सम्परिस्तीर्य दण्डप्रदानात् पूर्ववदुपनयनं कृत्वा सावित्रीं वाचयति।

भिक्षां न कुर्वन्नश्नाति न च श्मश्रूणि वापनम्। शिरोमुण्डं न कुर्वन्न वाससः परिधापनम्। नालङ्कारं ततः कुर्वन् ब्रह्मसूत्रस्य धारणम्। मेखलाधारणं चैव न चैवाम्बरधारणम्। न चाभिमन्त्रणं कुर्वन् नाजिनस्य च धारणम्। न प्रदानं च दण्डस्य न भैक्षाचरणं तथा। वाससो ग्रहणं नास्ति व्रतोपनयनं तथा। एवं हि विधिवत् कृत्वा पूतो भवति मानवः। पुनस्संस्कारं कृत्वा पूतो भवति। (अग्नि.गृह्य.२.७.१)

⇒ **यदि विविधप्रकारेण ब्रह्मचारीव्रतलोपः भवेत्।**

वैखानसगृह्यसूत्रे सूचितं यदि सप्तरात्रपर्यन्तं स्नानं, सन्ध्योपासनं, स्वाध्यायः, समिद्धोमः एवं भिक्षाचर्यं न कृतं, उच्छिष्टभोजनं कृतं, मधुमत्स्यमांससूतकप्रेतकान्नभोजनं कृतं तर्हि उपवासं कृत्वा अग्निस्थापनां कृत्वा आज्यहोमः कर्तव्यः, तदनन्तरं पुनरुपनयनं कर्तव्यम्।

- अथावकीर्णप्रायश्चित्तम्। सप्तरात्रं स्नानसन्ध्योपासनस्वाध्यायसमिद्धोमभैक्षाचर्यादिहीने मेखलोपवीताजिनदण्डधारणादिब्रह्मचर्यवर्जिते च पादकृच्छ्रमुपवासं वा कृत्वा अग्निमाधाय परिस्तीर्य परिषिच्य आज्येन पाहि नो अग्न एनसे, पाहि नो विश्ववेदसे, यज्ञं पाहि, सर्वं पाहि इति चतसृभिः कामावकीर्णः, कामाभिद्रुग्धः, सं मा सिञ्चतु, समुद्रादूर्मि इति चतसृभिः हुत्वा पुनरुर्जा, सहरय्या, अतो देवा, इदं विष्णुः इति जुहुयात्। पितृज्येष्ठयोरन्येषामुच्छिष्टभोजने मधुमत्स्यमांससूतकप्रेतकान्नाद्यभोज्यभोजने च पुनरुपनयनं करोति। (वैखा.गृह्य.६.९.१-३)

⇒ **यदि विविधप्रकारेण ब्रह्मचारीव्रतलोपः भवेत्।**

वैखानसगृह्यसूत्रे सूचितं यदि ब्रह्मचारिणः व्रतस्य लोपः भवेत् तदा पुनरुपनयनं कुर्यात्। अत्र उपवासं कृत्वा विविधैः मन्त्रैः होमः कर्तव्यः तदनन्तरं पुनः उपनयनं कुर्यात्। पुनस्संस्कारे केशवपनं, मेखलादण्डमजिनधारणं, भिक्षाचर्यं च न भवति। अथवा

सावित्रीमन्त्रेण अष्टशतवारं घृतम् अभिमन्त्र्य तस्य घृतस्य प्राशनं कर्तव्यम्। अथवा गुरोः उच्छिष्टं भोक्तव्यम्। तेन पवित्रः भवति।

- अथातः पुनरुपनयनम्। पादकृच्छ्रमुपवासं वा कृत्वाग्निमाधायाघारान्ते व्याहृत्या पलाशसमिधो हुत्वा आज्येन विष्णुसूक्तं मिन्दाहुत्याश्राविताादीन् पूर्णाहुती व्याहृतीश्च हुत्वा पूर्ववदुपनयनं करोति। वपनमेखलाजिनदण्डधारणव्रतभैक्षाचरणानि पुनःसंस्कारे वर्ज्यन्ते। अथवा सावित्रीमष्टशतमावर्त्याभिमृश्य तथैव घृतं प्राश्नीयात्। गुरोरुच्छिष्टं वा भुञ्जीत ततः पूतो भवति। (वैखा.गृह्य.६.१०.१-६)

## ३.४) समावर्तनम्

उपनयनात् ब्रह्मचर्याश्रमस्यारम्भः भवति। द्वादशवर्षाणि अध्ययनसमाप्तिपर्यन्तं वा ब्रह्मचर्यस्याचरणं कृत्वा तदन्ते समावर्तनं कृत्वा गुरुगृहात् निर्गन्तव्यम्। समावर्तनेन ब्रह्मचर्याश्रमस्य समाप्तिः भवति। आश्रमरहितेन अधिककालेन न भवितव्यम्। अतः अध्ययनानन्तरमेव समावर्तनं कर्तव्यम्। समावर्तनं कृत्वा निकटसमये विवाहः भवेत्। समावर्तनपर्यन्तं निश्चितेन व्रतेन भवितव्यम्। परं यदि कुत्रचित् व्रतलोपो भवति तर्हि ब्रह्मचारीव्रतलोपप्रायश्चित्तं कृत्वा समावर्तनं कुर्यात्।

⇒ **यदि समावर्तनं कृत्वाऽपि विवाहः न भवेत्।**

वैखानसगृह्यसूत्रे सूचितं यदि समावर्तनं कृत्वाऽपि विवाहकालः अतीतः तथापि विवाहः नाभवत् तदा प्रायश्चित्तं कृत्वा विवाहं कुर्यात्। विवाहस्य कारणं गृह्याग्नेः सिद्धिः, वंशसातत्यं च। अतः विवाहे विलम्बो न भवेत्। विवाहस्य अष्टौ प्रकाराः सन्ति। ब्राह्मः, दैवः, प्राजापत्यः, आर्षः, गान्धर्वः, आसुरः, पैशाचः, राक्षसः। एतेषु ब्राह्मादिषु चतुर्षु प्रकारेषु यदि विवाहः नाभवत्, तदा गान्धर्वादि अपरप्रकारेण वा विवाहं कुर्यात्। परं गान्धर्वादिप्रकारेण यदि विवाहः कृतः तर्हि चान्द्रायणप्रायश्चित्तं होमप्रायश्चित्तं कृत्वा पुनर्विवाहं कुर्यात्।

- समावर्तनं कृत्वा विवाहकालेऽतीते क्रियाहीनेऽप्युपनयनाग्नावाघारं हुत्वा ब्राह्मं वैष्णवमाग्नेयं शतमावर्त्य हुत्वाग्न्यर्थं पुत्रार्थं च ब्रह्मादिषु चतुर्षु पूर्वालाभे परेण ब्राह्मणो विवाहं कुर्यात्। आसुरादिष्वस्त्पुत्रा जायन्ते। तस्मादासुरेण गान्धर्वेण विवाहे कृते चान्द्रायणं चरित्वाग्निमाधाय ब्राह्मं त्रयस्त्रिंशद्वैष्णवं सावित्रीमाग्नेयं शतमावर्त्य हुत्वा ब्रह्मादिष्वेकेन पुनर्विवाहं कुर्यात्। आसुराद्विगुणं गान्धर्वे, गान्धर्वाद्विगुणं राक्षसे, राक्षसाद्विगुणं पैशाचे प्रायश्चित्तं करोति। आसुराद्यैः शस्तैः क्षत्रियवैश्यौ विवाहं कुर्याताम्। पूर्वेषामलाभे परेण। ब्राह्मणेनासुरगान्धर्वौ च विधिना कर्तव्यावित्येके। होमं हुत्वा राक्षस पैशाचौ चेत्यपरे। अन्यथा कन्यागमनप्रायश्चित्तं करोति। (वैखा.गृह्य.६.१२.३-११)

⇒ **यदि स्नातकस्य व्रतभङ्गः भवेत्।**

बोधायनगृह्यपरिभाषासूत्रे उक्तं ब्रह्मचर्याश्रमस्य कालः यदा समाप्तः भवति तदा समावर्तनं कुर्यात्। समावर्तनात् विवाहपर्यन्तं यथा व्रताचरणं स्नातकेन कर्तव्यं तत्र यदि व्रतभङ्गः भवेत् प्रायश्चित्तं कुर्यात्। उपनयनात् ब्रह्मचारी भवति, विवाहात् गृहस्थः, समावर्तनात् विवाहपर्यन्तं स्नातकः भवति।

➢ अथास्याव्रत्यप्रायश्चित्तं त्वमग्ने व्रतपा असि, यद्वो वयम् इति। (बोधा.गृह्यपरि.१.१६.२२)

⇒ **उपसंहारः - तृतीयप्रकरणम् (उपनयनम्, कालातिपत्यप्रायश्चित्तम्, ब्रह्मचारिव्रतलोपः, पुनरुपनयनम्, समावर्तनम् )**

अस्मिन् प्रकरणे उपनयनसमावर्तनयोः अन्तर्भावः कृतोऽस्ति। ब्रह्मचर्याश्रमस्य आरम्भात् समाप्तिपर्यन्तम् अत्र वर्णनम् अस्ति। उपनयनेन ब्रह्मचर्याश्रमस्य आरम्भो भवति समावर्तनेन ब्रह्मचर्याश्रमस्य समाप्तिः भवति। उपनयनस्य शिष्टसम्मतः शास्त्रसम्मतः कालः यदि अतीतः भवेत् तर्हि प्रायश्चित्तं कर्तव्यं भवति। उपनीतेन ब्रह्मचारिणा व्रते नियमे भवितव्यम्, तेनैव ब्रह्मचारिणः अध्ययनं योग्यरीत्या भवेत्। परं यदि ब्रह्मचारी नियमभङ्गं कुर्यात् तर्हि तेन प्रायश्चित्तं कर्तव्यम्। केवलं प्रायश्चित्तं कृत्वा पुनः व्यवहारयोग्यता न भवेत् तदा पुनः उपनयनं कर्तव्यं भवेत्। ब्रह्मचर्याश्रमस्य कर्तव्यानि समाप्य समावर्तनं कुर्यात्। परं समावर्तनं अकृत्वा विवाहः नाभवत्, तथा च समावर्तितेन स्नातकेन नियमविरुद्धम् आचरणं कृतं तदा प्रायश्चित्तं कर्तव्यं भवति।

## ४) विवाहः

आश्रमेषु द्वितीयः आश्रमः गृहस्थाश्रमः। गृहस्थाश्रमस्यारम्भः विवाहसंस्कारेण भवति। वर्णानुसारम् अष्टमे, एकादशे, द्वादशेवर्षे वा उपनयनं कृत्वा द्वादशवर्षाणि अध्ययनं कृत्वा प्रायः वयसः विंशतिः वा ततोऽप्यधिके वयस्येव विवाहः शिष्टसम्मतः। विवाहसंस्कारेण समाजः सुस्थिरो भवति। समाजस्य नाम अन्येषां त्रयाणाम् आश्रमाणाम् आधारोऽपि गृहस्थाश्रमः। गृहस्थाश्रमेण कुलपरम्परा रक्षिता भवति। विवाहेन सम्पूर्णः समाजः आनन्दितो भवति। विवाहेन द्वयोः कुलयोः समञ्जनं भवति। अन्यसंस्काराणाम् अपेक्षया विवाहविषये अधिकं चिन्तनं कृतमस्ति। विवाहोत्तरं देवयज्ञादीनां द्वारा देवऋणात् मुक्तिः भवति। पितृश्राद्धादीनां द्वारा पितृऋणात् मुक्तिः भवति। परं यज्ञश्राद्धादीनि कर्माणि ब्रह्मचारिणा कर्तुं न शक्यन्ते। प्राचीनग्रन्थेषु कस्य कुलस्य, गोत्रस्य, वर्णस्य परस्परसम्बन्धः योग्यः अयोग्यो वा इति विषये विस्तृतं चिन्तनमस्ति। वधूवरयोः जन्मपत्रिकां परीक्ष्य तयोः जीवनं सुन्दरं, सुकरम्, आनन्दमयं च भवेत् न वा इत्यस्यापि चिन्तनं विद्यते विवाहनिश्चये। विवाहे पुरुषार्थत्रयाणां नाम धर्मार्थकामानां विषये दम्पत्योः सहमतिः सहजीवनम् अपेक्षितम् अस्ति। मोक्षस्तु व्यक्तिगतविषयः।

विवाहस्याष्टौ प्रकाराः सन्ति। ब्राह्मः, दैवः, प्राजापत्यः, आर्षः, गान्धर्वः, आसुरः, पैशाचः, राक्षसः। अत्र ब्राह्मविवाहः आधिक्येन समाजे रूढः समाजसम्मतश्च। ब्राह्मविवाहस्यैव आधिकानि उदाहरणानि दृश्यन्ते ऐतिह्ये। ब्राह्मविवाहे मातापित्रोः अनुमत्या विवाहः निश्चितः भवति। मातापितरौ अलङ्कृतां कन्यां यच्छतः। दैवविवाहे यज्ञकर्मणि निरताय ऋत्विजे कन्यां प्रयच्छति पिता। प्राजापत्यविवाहे द्वयोः परस्परानुमत्या सहधर्माचरणं वर्तते। आर्षविवाहे गोमिथुनं दत्त्वा कन्यामुपयच्छति। गान्धर्वविवाहे परस्परानुमत्या नाम अहं तव भर्ता त्वं मम भार्या भवेति वार्तां कृत्वा निश्चयः। आसुरविवाहे कन्यापित्रे धनं दत्वा विवाहः करणीयः। पैशाचविवाहे सुप्तां प्रमत्तां कन्याम् अपहृत्य विवाहो भवति। राक्षसविवाहे कन्यायाः अपहरणं मुख्यम्। तत्र युद्धं वा करणीयं भवेत्। कस्यापि हननं, कस्यापि मारणं, यत्किमपि कृत्वा कन्यायाः अपहरणं करणीयमेव। एतेषु प्रकारेषु आरम्भे विद्यमानाः चत्वारः प्रकाराः आधिक्येन योग्याः। एते अष्टौ प्रकाराः कौटिलीये अर्थशास्त्रेऽपि उद्धृताः सन्ति।

## ४.१) विवाहः (अग्निनाशः/पुनराधानम्)

विवाहे मुख्यभूतं कार्यं गृह्याग्नेः सिद्धिः, गृह्याग्नेः आरम्भः। ब्रह्मचारिणः नियमेषु अग्निकार्यं भवति तथापि ब्रह्मचारिणा अग्नेः संरक्षणं कार्यमिति नियमो नास्ति। ब्रह्मचारी प्रतिदिनं अग्निकार्यसमये अग्नेः स्थापनां कृत्वा अग्निकार्यं कर्तुं शक्नोति। परं गृहस्थः नाम विवाहितः गृह्याग्नेः नित्यरक्षणं कृत्वा नित्यहोमं कुर्यात्। प्रातः नाम सूर्योदयसमये तथा च सायं नाम सूर्यास्तसमये नित्यहोमं कुर्यात्। विवाहोत्तरमेव गर्भाधानादिसंस्काराणामारम्भः भवति। संस्कारनिमित्तं यः होमः भवति सः होमोऽपि तस्मिन्नग्नौ कर्तव्यः भवति। नित्यहोमे यदि लोपः भवति तर्हि प्रायश्चित्तं कुर्यात् तथा च यदि अग्नेः नाशः भवेत् तर्हि प्रायश्चित्तं कुर्यात्। श्रौतयागेषु अपि अग्नेः यदि उपशमः भवेत् तर्हि प्रायश्चित्तं सूचितमस्ति। ऐतरेयब्राह्मणे उक्तं *तदाहुर्यस्य सर्व एवाग्नय उपशाम्येरन्का तत्र प्रायश्चित्तिरिति सोग्नये तपस्वते जनद्वते पावकवतेष्टाकपालं पुरोळाशंनिर्वप्रत्तस्य याज्यानुवाक्ये आयाहि तपसा जनेष्वा नो याहि तपसा जनेष्वित्याहुतिं वाहवनीये जुहुयादग्नये तपस्वते जनद्वते पावकवते स्वाहेति सा तत्र प्रायश्चित्तिः।*(३२.७)

⇒ **यदि अग्नेः उपशमः/नाशः भवेत्।**

आश्वलायनगृह्यसूत्रे उक्तम् अग्नेः यदि नाशः भवेत् तर्हि पत्नी उपवासं कुर्यात्।

- यदि तूपशाम्येत्पत्न्युपवसेदित्येके। (आश्व.गृह्य.१.९.३)

भारद्वाजगृह्यसूत्रे बोधायनगृह्यपरिभाषासूत्रे हिरण्यकेशीगृह्यसूत्रे च उक्तं यदि द्वादशाहं अग्नेः विच्छेदः भवति, पुनराधानमेव कुर्यात्।

- एकाग्निर्द्वादशाहं विच्छिन्नः पुनराधेयः। (भार.गृह्य.३.१)
- द्वादशाहं विच्छिन्नः पुनराधेयः। (बोधा.गृह्यपरि.१.१६.२८) (हिर.गृह्य.१.७.३५)

आपस्तम्बगृह्यसूत्रे, हिरण्यकेशीगृह्यसूत्रे, बोधायनगृह्यशेषसूत्रे तथा च अग्निवेश्यगृह्यसूत्रे समानतया उक्तमस्ति यत् अग्निः नित्यं रक्षणीयः। यदि नष्टः अथवा

लुप्तः अरण्या मन्थनं कृत्वा पुनः स्थापनीयः। अन्यस्य श्रोत्रियस्य गृहात् आनेतव्यः। पत्न्या वा पतिना उपवासः करणीयः। द्वादशदिनपर्यन्तं यदि विच्छिन्नः पुनराधानं कुर्यात्।

- नित्यः। धार्यः। अनुगतो मन्थ्यः। श्रोत्रियागाराद्वाऽऽहार्यः। उपवासश्चान्यतरस्य भार्याया पत्युर्वा। अनुगते चोत्तरया जुहुयान्नोपवसेत्। (आप.गृह्य.५.१५-२०)
- नित्यो धार्यः। अनुगतो मन्थ्यः। श्रोत्रियागाराद्वाहार्यः। उपवासश्चानुगते भार्यायाः पत्युर्वा। (हिर.गृह्य.१.७.३५)
- संस्कारार्थमौपासनो नित्यो धार्योऽनुगतो मन्थ्यः श्रोत्रियागाराद्वाऽऽहार्यो द्वादशाहं विच्छिन्नः पुनराधेयः। (बोधा.गृह्यशेष.४.८.१)
- तस्मान्नित्यो धार्योऽनुगतो मन्थ्यः श्रोत्रियागाराद्वाहार्यः। (अग्नि.गृह्य.१.६.३)

बोधायनगृह्यसूत्रे उक्तं संस्कारान्ते यदि अग्नेः नाशः भवेत् तर्हि भस्मे अथवा समिधि समारोपणं कुर्यात्। प्रायश्चित्तहोमं वा कुर्यात्।

- संस्कारान्तेऽग्नावुत्सन्ने तद्भस्मसमारोपणं समिधं वा यदि नोपविन्देद्याज्ञिकं वा प्रायश्चित्तं महाव्याहृतीः प्रणवं मनस्वतीं च जुहोति। (बोधा.गृह्य.४.९.१२)

⇒ **यदि विवाहाग्नेः नाशो भवेत्।**

आश्वलायनगृह्यपरिशिष्टे उक्तं विवाहाग्नि यदि नष्टः भवति तर्हि पुनराधानं कुर्यात्। तदर्थं शिष्टस्य नाम योग्यस्य गृहात् अग्निं आदाय परिसमूहादि कृत्वा अयाश्चाग्ने इति मन्त्रेण आहुतिं हुत्वा पूर्ववत् अग्न्युपासनां कुर्यात्। द्वादशरात्रात् आधिककालं यदि अग्निविच्छेदः भवति तर्हि विवाहवत् आज्याहुतयः, लाजाहुतयः, गृहप्रवेशाज्याहुतयः, हृदयाञ्जनं च कुर्यात्। परमत्र भार्यायाः भ्राता लाजावपनं न करोति अपि तु स्वयं पतिः लाजानावपति। नित्यहोमं विहाय मनस्वत्या ऋचा चतुर्गृहीतेन आज्येन होमं कुर्यात्।

- **नष्टेऽग्नौ पुनराधानम्। अथ पुनराधानमनुगतेऽग्निं शिष्टागारादानीय उक्तवदुपसमाधाय परिसमूह्य परिस्तीर्य पर्युक्ष्याऽऽज्यमुत्पूयायाश्चाग्न इत्येकामाज्याहुतिं हुत्वा यथापूर्वं परिचरेदेवमाद्वादशरात्रादत ऊर्ध्वं विवाहगृहप्रवेशहोमाभ्याम् एकतन्त्राभ्यामादध्यात् ।**

तत्र विवाहाज्याहुतयो गृहप्रवेशाज्याहुतयो हृदयाञ्जनं च भवति। कर्तेवलाजानावपत्येतत्पुनराधानं नित्यहोममतीत्य मनस्वत्या चतुर्गृहीतं जुहुयादाद्वादशरात्रादूर्ध्वं पुनराधानमेव कुर्यात्। (आश्व.गृह्यपरि.१.१९)

⇒ **यदि अग्नेः नाशः भवेत्।**

बोधायनगृह्यसूत्रे अग्निवेश्यगृह्यसूत्रे च सूचितम् उपनयनाग्निः, विवाहाग्निः, जातकाग्निः, श्मशानाग्निः वा चत्वारिदिनानि, द्वादशदिनानि, अथवा अग्निसञ्चयनात् पूर्वं अग्निः नष्टः शान्तः भवति तर्हि शीघ्रं भस्मसमारोपणं कुर्यात्। अथवा समिद्समारोपणं कुर्यात्। अथवा अन्यम् अग्निम् श्रोत्रियागारात् आदाय उक्ताः प्रायश्चित्ताहुतीः जुहुयात्।

- अथयद्युपनयनाग्निः विवाहाग्निः जातकाग्निः श्मशानाग्निः आचतुर्थाद्वादशाहात् आसञ्चयनादुद्वातस्स्यात्-अपहता असुराः इति प्रोक्ष्य क्षिप्रं भस्मसमारोहणम्। अयं ते योनिर् ऋत्वियः इति समिधौ समारोप्य लौकिकमग्निमाहृत्य समिधमादधाति आजुह्वानः, उद्बुध्यस्वाग्ने इति द्वाभ्याम्। सम्परिस्तीर्य प्रायश्चित्तं जुहोति- अयाश्चाग्ने, पञ्चहोता, ब्राह्मण एकहोता, दश मनस्वतीः, मिन्दाहुती, महाव्याहृतीः, व्याहृतयश्च प्रायश्चित्तं जुहुयादिति। (बोधा.गृह्य.४.१०.२,३)
- उपनयनाग्निर्विवाहाग्निः सूतकाग्निः श्मशानाग्निराचतुरहाद्वादशाहादासञ्चयनादुद्वातः स्यात् अपहता असुरा रक्षांसि पिशाचा ये क्षरन्ति पृथिवीमनु। अन्यत्रैतो गच्छन्तु यत्रैषां गतं मनः इत्यद्भिरवोक्ष्य क्षिप्रं भस्मसमारोपणम्। अयं ते योनिर्ऋत्विय इति श्रोत्रियागारादग्निमाहृत्य आजुह्वानः, उद्बुध्यस्व इति द्वाभ्यामवधाय परिस्तीर्य परिषिच्य प्रायश्चित्तं जुहोति अयाश्चाग्नेः, पञ्चहोतारं, ब्राह्मण एकहोतारं, मनस्वतीमिन्दाहुतीव्याहृतीभिः। अथापि वा चतुरहःसद्यस्कालं ब्रह्मचर्यं विच्छिनत्ति सारस्वतेन होमेन मनस्वतीमिन्दाहुतीमहाव्याहृतीनां सप्रणवं जुहुयात्। (अग्नि.गृह्य.२.७.४)

⇒ **यदि अग्नेः नाशः भवेत्।**

बोधायनगृह्यशेषसूत्रे उक्तम् अग्निः नाम औपासनाग्निः नष्टो भवति अतिशीघ्रं पुनस्स्थापनां कुर्यात्। औपासनाग्निः नाम यस्य निरन्तरम् उपासना कर्तव्या। सः नष्टः नाम प्राणाः एव गताः इति धिया शीघ्रातिशीघ्रं पुनस्स्थापनां कुर्यात्। प्रायश्चित्ताहुतीश्च जुहुयात्। अत्र ब्रह्मस्थानीयः ऋत्विक् नावश्यकः, न प्रणीतापात्रं, न चरुः, न स्विष्टकृत्। केवलं प्रायश्चित्ताहुतयः।

➢ अथ गृहस्थस्यौपासनं विच्छिद्येत प्राणेषूत्क्रान्तेषूभयोः श्रोत्रिययोर्वचनादुद्धरेत्। श्रोत्रियगारद्वाऽऽहृत्य व्याहृतीभिर्निर्युप्योपसमाधाय पर्युक्ष्य परिस्तीर्याज्यं विलाप्योत्पूय स्रुकस्रुवं निष्टप्य संमृज्य स्रुचि चतुर्गृहीतं गृहीत्वाऽन्वारब्धो यजमानो जुहोति - सप्त ते अग्ने, सप्तव्याहृतिश्च, पूर्वं देवा अपरेण, प्राणापानौ, इति द्वाभ्यां, मात्वा वृक्षौ सम्बाधिष्ठाम्, मात्वा वृक्षौ सम्बाधेथाम् इति द्वाभ्याम्, अग्नेऽभ्यावर्तिन्, अग्ने अङ्गिरः इति द्वाभ्यामेकैकं प्रति चतुर्गृहीत्वा जुहोति। न च ब्रह्मा न च प्रणीता न च चरुर्न च स्विष्टकृतम् । (बोधा.गृह्यशेष.४.१४.१,२)

⇒ **यदि अग्नेः नाशः भवेत्।**

अग्निवेश्यगृह्यसूत्रे उक्तम् दिनद्वयं दिनत्रयम् अथवा एककालं नाम प्रातः वा सायं वा यदि अग्निनाशो भवति तर्हि प्रायश्चित्तहोमं कुर्यात्। परं प्रतिमासं दर्शपर्वणि तथा पौर्णिमापर्वणि विशेषहोमः कर्तव्यः इति। परं पर्वकाले एव अग्निविच्छेदो भवति। पर्वकाले नूतनधान्यस्य आगमने आग्रयणं कर्तव्यं भवति। परं नवान्नदिने एव अग्निनाशः भवति। अमावास्यायां पिण्डपितृयज्ञः कर्तव्यः भवति। परम् अमावास्यायामेव अग्निनाशः भवति। तदा सर्वदा विशेषप्रायश्चित्तं कुर्यात्। परं द्वादशदिनानि वा दीर्घकालम् अग्नेः विच्छेदो भवति। तदा पुनराधानमेव कुर्यात्।

➢ अथ यदि द्व्यहं त्र्यहं वा सायंप्रातर्विच्छिन्नो भवति अग्नये तन्तुमते जुहुयात्। यदि स्थालीपाकस्यातिपातनं भवति अग्नये पथिकृते, अग्नये वैश्वानराय वा जुहुयात्।

अस्यापि व्याख्यातावाग्रयणपिण्डपितृयज्ञौ। द्वादशाहानि विच्छिन्नः पुनराधेयः, प्रतिसङ्ख्याय वा होमान् जुहुयात्। (अग्नि.गृह्य.२.७.२)

⇒ **यदि अग्नेः नाशः भवेत्।**

अग्निवेश्यगृह्यसूत्रे भारद्वाजगृह्यसूत्रे च उक्तम् उत्तरकालीनहोमस्य समयः सम्प्राप्तः परं पूर्वस्य दोषस्य प्रायश्चित्तम् आदौ कृत्वा अग्रिमं होमं कुर्यात्। यदि दशरात्रिपर्यन्तम् अग्निविच्छेदः भवेत् तर्हि दशवारं प्राणायामं कुर्यात्। यदि एकादशरात्रात् विंशतिः रात्रिपर्यन्तम् अग्निः विच्छिन्नः तर्हि उपवासं कुर्यात्। विंशतिरात्रात् त्रिंशत् रात्रिपर्यन्तम् अग्निविच्छेदः यदि भवेत् प्राजापत्यहोमं कुर्यात्। एकादशरात्रिपर्यन्तं विच्छिन्नः तिस्रः तन्तुमत्या होमं कुर्यात्। द्वादशाहं यदि विच्छिन्नः पुनराधानमेव कुर्यात्।

- उत्तरस्मिन् काल आगते होमश्चेद् अनिवृत्तः पूर्वस्य सेयं कालातिपत्तिस्तस्यां प्रायश्चित्तं मनो ज्योतिः इति पूर्वस्य जुहुयात्। तथापरस्य जुहुयात्। एवं प्रतिहोमम् आ दशरात्रात् प्राणायामः। एकादशीप्रभृत्या विंशतिरात्रादुपवासस्त्रिंशद्रात्रादत ऊर्ध्वं प्राजापत्यं विहितम्। एकादशीप्रभृति तिस्रस्तन्तुमतीर्द्वादशाहानि विच्छिन्नः पुनराधेय इत्युक्तमेवं वा। (अग्नि.गृह्य.२.७.९)
- उत्तरस्मिन्काल आगते होमश्चेति निवृत्तः पूर्वस्य सेयं कालातिपत्तिस्तस्यां प्रायश्चित्तं मनोज्योतिरिति पूर्वस्य हुत्वापरस्य जुहुयादेवं प्रतिहोममादशरात्रात् प्राणायामश्चैकादशीप्रभृत्याविंशतिरात्रादुपवासश्चात्रिंशद्रात्रादतऊर्ध्वमाषष्टिरात्रात्तिस्रो रात्रीरुपवसेदत ऊर्ध्वं प्राजापत्यं विहितमेकादशीप्रभृति तिस्रश्च तन्तुमतीस्तन्तुं तन्वन्नुद्बुध्यस्वाग्ने त्रयस्त्रिंशत्तन्तव इत्युक्तमनुगत इत्यपि वायाश्चाग्नेऽसीति जुहुयादात्रिरात्रान्मनो ज्योतिरित्या सप्तरात्रादत ऊर्ध्वमा द्वादशरात्तिस्रो रात्रीरुपवसेदत ऊर्ध्वं प्राजापत्यं विहितमेकादशीप्रभृति तिस्रश्च तन्तुमतीरुक्तं द्वादशाहं विच्छिन्न इत्येकादशीप्रभृत्युपवासः पूर्ववत्। (भार.गृह्य.३.२०)

⇒ **यदि अग्नेः नाशः भवेत्।**

भारद्वाजगृह्यसूत्रे उक्तं दर्शो नाम अमावास्या, पूर्णः नाम पौर्णिमा। यदि दर्शपूर्णपर्वणि अतीते तर्हि प्रायश्चित्तं कुर्यात्। अष्टदिनपर्यन्तं यदि अग्नेः विच्छेदः भवेत् तर्हि आज्याहुतीः स्थालीपाकं च कुर्यात्। अष्टदिनात् आधिककालं यदि अग्नेः विच्छेदः भवेत् तर्हि उपवासेन सह होमं च कुर्यात्। पितृयज्ञः नाभवत् तदा अन्यस्मिन् पक्षे उपवासेन सह पितृयज्ञश्च कुर्यात्। दिनद्वयं, दिनत्रयं, दिनचतुष्टयं, पञ्चदिनानि वा अग्निविच्छेदः भवेत् मनोज्योतिरिति आहुतिः दद्यात्। षष्ठदिनात् तन्तुमत्या आहुत्या प्रायश्चित्तं जुहुयात्। नवरात्रात् अभ्यावर्तिनि आहुतीः हुत्वा प्रायश्चित्तं कुर्यात्। एकादशदिनपर्यन्तं यदि विच्छेदः भवति होमेन पुनः साधयितुं शक्यते। परं द्वादशदिनानि अग्निविच्छेदः यदि भवेत् प्राजापत्यहोमं कृत्वा पुनराधानमेव कुर्यात्। सर्वस्य होमस्यान्ते व्याहृतिभिः होमं कुर्यात्।

➢ **अथ पर्वण्यतीते मनो ज्योतिरयाश्चाग्ने यदस्मिन्नग्ने स्वस्ति न इन्द्र इति चतस्र आज्याहुतीर्हुत्वा स्थालीपाकं च कुर्यात्प्रागष्टम्या अत ऊर्ध्वं सोपवासः कार्यो द्वयोर्द्वौ त्रिषु त्रय इत्येवं नैमित्तिकेष्वतीतेषु प्रायश्चित्तं पार्वणवद्धोमः पितृयज्ञेऽतीते पक्षात्यये सोपवासः कार्य इति सिद्धं नित्येषु चैवमेव स्यादथ महायज्ञानां मनोज्योतिरिति द्वयोस्त्रयाणां चतुर्णां पञ्चानां वा षष्ठप्रभृति तिस्रस्तन्तुमतीर्हुत्वा चतस्रो वारुणीर्जपेदिमं मे वरुण तत्वा यामि यच्चिद्धि ते यत्किं चेत्या नवरात्रादत ऊर्ध्वमा दशरात्राच्चतस्रोऽभ्यावर्तिनीर्हुत्वा कार्यस्तान्तुमतश्चरुः स्नातकस्यापि होमविछित्तावुक्तं प्राप्ते प्राजापत्ये तस्य विछित्तिस्तस्य तु पुनराधेयं मनोज्योतिस्तन्तुमतीः पुनस्त्वादित्या रुद्रा इति च पूर्णाहुतिं प्रतीयादेताम्ग्युपघातेषु सर्वत्र स्त्रियाश्चैवं होमाभिगमनस्थालीपाकेषु सर्वेषामन्ततो व्याहृतीरिति सिद्धम्।** (भार.गृह्य.३.२१ )

⇒ **यदि अग्नेः नाशः भवेत्।**

कौथुमगृह्यसूत्रे उक्तं सायं होमः नाभवत् तत्कालं होमं कुर्यात्। पौर्णिमायाः वा अमावास्यायाः पर्वकालः अतीतः तदा पर्वकालस्य होमं कुर्यात्। त्रिरात्रं पञ्चरात्रं दशरात्रं

वा अतीतं प्रायश्चित्तं कृत्वा तात्कालिकं होमं कुर्यात्। परं उभे अपि पर्वकाले अतीते तथा च सङ्कल्पं कृत्वा होमः न कृतः तदा प्रायश्चित्तं कृत्वा होमं कुर्यात्। यदि मासपर्यन्तं सर्वमपि लुप्तं पुनराधानमेव कुर्यात्।

➢ पुनराधाने वर्जयेत् सायमुपक्रम्य तात्कालिकप्रायश्चित्तापतौ चेत्तस्यां तत्र कार्यम्। पौर्णम्याहुत्यामतीतं चेत्ताभ्यां तत्तत्कुर्युः पर्वणा चेत्सङ्कल्प्य कार्यम् तदभावे सद्यः कुर्याद् अपरेण दर्शं त्वे प्रायश्चित्तिः त्रिरात्रं पञ्चरात्रं वा दशरात्रात्ताः प्रायश्चित्तपूर्वयज्ञं यजेते तावुभौ पर्वा सङ्कल्प्यऽतीतौ तामिष्टौ तद्वत् तत्र यदि लोपं वा तं मासादतीतं वा पुनराधानं कुर्युः। (कौथु.गृह्य.१)

⇒ **यदि दर्शपूर्णपर्वहोमः न भवेत्।**

हिरण्यकेशीगृह्यसूत्रे, शाङ्खायनगृह्यसूत्रे, वैखानसगृह्यसूत्रे, अग्निवेश्यगृह्यसूत्रे च उक्तं, दर्श-अमावास्याकाले तथा च पौणिमाकाले प्रतिमासं पर्वकालः भवति। पर्वकालीनहोमस्य कालस्तु निश्चितः एव भवति अत एव पर्वकालीनः होमः यदि न कृतः तर्हि अग्नये होमं कुर्यात्। विविधेषु गृह्यसूत्रेषु मन्त्राः भिन्नाः सूचिताः सन्ति। परं होमप्रायश्चित्तं कर्तव्यमेव। तमेव होमं द्विवारं कुर्यात् इत्यपि पर्यायेण उक्तमस्ति। यावन्तः पर्वकालाः अतीताः तावताप्रमाणेन होमं कुर्यात्, नाम द्वौ पर्वकालौ अतीतौ द्विवारं होमं कुर्यात्, त्रयः पर्वकालाः अतीताः त्रिवारं होमं कुर्यात्। तदर्थं द्विवारं त्रिवारं वा यथा आवश्यकं तथा चरुं कुर्यात्।

➢ यदि पार्वणो विच्छिद्येत तस्मिन्पाथिकृतेन याजयेत्। यदि द्वौ वैश्वानरपाथिकृतौ। यदि बहून्पुनराधेयः।(हिर.गृह्य.१.७.३५)

➢ नियतस्त्वेव कालोऽग्निहोत्रे प्रायश्चित्तदर्शनाद् भिन्नकालस्य। (शाङ्खा.गृह्य.१.दर्शपूर्णमासौ.९)

➢ यदि पार्वणस्त्वकृतोऽन्यतरस्ततश्चरुः। अग्नये वैश्वानराय स्वाहा अग्नये तन्तुमते स्वाहा। (शाङ्खा.गृह्य.५.प्रायश्चित्तयः.१-२)

- पर्वणि स्थालीपाके हीने पादकृच्छ्रमुपवासं वा कृत्वाग्निं प्रणम्य प्राणायामं कृत्वा अग्निदैवत्यं पथिकृद्दैवत्यं च स्थाल्यां द्वौ चरू पक्त्वाग्निं परिस्तीर्य परिषिच्याज्येनाग्नेयं सौम्यं स्विष्टाकारं मिन्दाहुती वैष्णवं व्याहृत्यन्तं हुत्वा पूर्ववत्स्थालीपाकं द्विगुणं जुहुयात्। (वैखा.गृह्य.६.१९.४)
- अथ पर्वण्यतीते मनो ज्योतिः, अयाश्चाग्ने, यदस्मिन्, स्वस्ति न इन्द्र, इति चतस्र आहुतीर्हुत्वाग्नये पथिकृते स्थालीपाकं कुर्यात् प्रागष्टमात्। अत ऊर्ध्वं सोपवासः कार्यः। द्वयोः द्वे त्रिषु च तिस्र इत्येवमतीतेषु प्रायश्चित्तं पार्वणवद्धोमः पितृयज्ञेऽतीते पक्षद्वये चोपवासः कार्य इति सिद्धम्। (अग्नि.गृह्य.२.७.९)
- तयोर्व्यतिक्रमे त्वमग्ने व्रतपा असि कामस्तदग्रे इति शान्ताः। (कौशि.गृह्य.६.३७)

⇒ **यदि अग्निद्वयसंसर्गः भवेत्।**

हिरण्यकेशीगृह्यसूत्रे, वैखानसगृह्यसूत्रे च उक्तं यदि एकत्र रक्षितस्य अग्नेः अन्येन अग्निना सह संसर्गः भवति तदा प्रायश्चित्तं करणीयं भवति। अन्येन अग्निना सह अग्नेः यदि संसर्गः भवति पत्नी उपवासं कुर्यात्, कृच्छ्रप्रायश्चित्तं प्राजापत्यप्रायश्चित्तं पादकृच्छ्रप्रायश्चित्तं वा कुर्यात्, अथवा पुनराधानमेव कुर्यात्।

- यदि नाशे विनाशे वाऽन्यैरग्निभिरग्नौ संसृष्टे वा पुनराधेयः। (हिर.गृह्य.१.७.३५)
- अग्न्यन्तरसंसर्गेऽनुगते वा पत्नी कृच्छ्रं चरति। श्रोत्रियागारान्मथित्वा वाग्निमादाय पुनरौपासनमादधीत। उदक्याशुध्यादि संसर्गे च विधानं यज्ञप्रायश्चित्ते वक्ष्यामः। वियोगे पक्षस्योपावरोहेति समिधं यावत्कृष्णं तावत्तप्त्वा समारोप्य गच्छेत्। (वैखा.गृह्य.३.६.३-६)
- अनुगते त्र्यहेऽतीतेऽन्याग्निनापि संसर्गे च पत्नी प्राजापत्यं पादकृच्छ्रं वा पतिरेकोपवासं कृत्वा पुनराधानं कुर्यात्। (वैखा.गृह्य.६.१५.४)

⇒ **यदि आग्रयणहोमः न कृतः।**

आग्रयणं नाम नवीनं धान्यं यदा कृषिक्षेत्रात् आनीतं भवति तदा प्रथमं नवीनस्य धान्यस्य उपयोगं कृत्वा होमः कर्तव्यः। तदनन्तरमेव तस्य धान्यस्य उपयोगः पाकार्थं करणीयः। वैखानसगृह्यसूत्रे उक्तं यदि आग्रयणहोमं अकृत्वा नवान्नं भक्षितं तर्हि प्रायश्चित्तं कृत्वा पुनः आग्रयणहोमं कृत्वा नवान्नभक्षणं कुर्यात्।

- आग्रयणहोमे हीने नवान्ने भुक्ते पादकृच्छ्रमुपवासं वा कृत्वा स्थाल्यामैन्द्राग्नं चरुं श्रपयित्वा पक्वेनाज्यमिश्रेणाग्नेयमैन्द्रं वैश्वदेवं स्विष्टाकारं पूर्णाहुती वैष्णवं च हुत्वा पूर्ववदाग्रयणं कृत्वा ब्राह्मणान्भोजयित्वा नवान्नं भुञ्जीत। (वैखा.गृह्य.६.१९.५)

⇒ **यदि नित्यहोमः न कृतः।**

शाङ्खायनगृह्यसूत्रे वैखानसगृह्यसूत्रे च उक्तं यदि प्रातःकालीनहोमो न कृतः तर्हि सायंकाले द्विवारं होमं कुर्यात्। सायंकालीनहोमो न कृतः तर्हि प्रातःकाले द्विवारं होमं कुर्यात्। अग्निविच्छेदो भवति तदा यजमानः उपवासं कुर्यात्। पुनराधानं च कुर्यात्। दिनद्वयं दिनत्रयं वा होमः न कृतः तर्हि प्रायश्वित्तं कुर्यात्।

- होमातिक्रमे। सायं दोषावस्तर्नमः स्वाहा। प्रातर्वस्तर्नमःस्वाहेति। यावन्तो होमास्तावतीर्हुत्वा पूर्ववद्धोमः। (शाङ्खा.गृह्य.१.प्रायश्चित्तयः.३-६)
- सायंहोमे हीने प्रातरग्नये स्वाहा वैश्वानराय स्वाहेति प्रातर्होमे हीने सायमग्नये स्वाहा पथिकृते स्वाहेति प्रायश्चित्ताहुतीर्हुत्वा पूर्ववदात्र्यहाज्जुहोति। औपासनेऽजस्रे वर्तमाने त्र्यहे होमे विच्छिन्ने पतिरेकोपवासं कृत्वा तत्पुनराधानं करोति। सद्योऽनुगते क्षिप्रं त्र्यहाभ्यन्तरेऽग्निं ध्यात्वा तद्भस्मायं ते योनिरिति समिधमारोप्योद्बुध्यस्वेति लौकिकाग्नौ समिधं निधाय पूर्ववत्प्रायश्चित्तं हुत्वा नित्यं जुहुयात्। (वैखा.गृह्य.६.१५.१-३)
- एकाहे वैश्वदेवहोमे हीने मनो ज्योतिरिति प्रायश्चित्तं हुत्वा वैश्वदेवं जुहुयात्। (वैखा.गृह्य.६.१७.९)
- त्र्यहे होमे हीने तन्तुं तन्वन्नित्यादि तन्तुमतीर्वैष्णवं जुहुयात्। द्वादशाहेऽग्नावौपासने स्थालीपाकं कृत्वा पूर्ववदवकीर्णप्रायश्चित्तं जुहोति। (वैखा.गृह्य.६.१८.१,२)

⇒ **यदि अन्यग्रामगमनम् आपतितम्।**

वैखानसगृह्यसूत्रे उक्तम् अन्यग्रामगमनसमये विभिन्नैः कारणैः वा अग्नेः रक्षणम् अशक्यं भवति तदा अरण्यां समारोपणं कृत्वा पुनः योग्ये समये मथनं कृत्वा पुनस्स्थापनां कृत्वा होमं कुर्यात्। अग्निः द्वादशदिनानि विच्छिन्नः पुनराधानं कुर्यात्, मासं यावत् विच्छिन्नः प्राजापत्यप्रायश्चित्तं च कुर्यात्, षण्मासं विच्छिन्नः चान्द्रायणप्रायश्चित्तं च कुर्यात्। संवत्सरं यावत् विच्छिन्नः प्राजापत्यं तप्तकृच्छ्रचान्द्रायणप्रायश्चित्तं च कुर्यात्। अथवा तद् द्रव्यं ब्राह्मणेभ्यः दद्यात्।

➢ अथातः पुनराधानम् पूर्ववदरण्यां मथितं व्याहृत्याश्रोत्रियागारादाहृतं वाग्निमाधाय पूर्वदाघारं जुहुयात्। अग्निं परिषिच्योत्पूतमाज्यं स्रुवेणादाय स्रुचि चतुर्गृहीतं गृहीत्वा पूर्णाहुतीं जुहोति तथा चतुर्गृहीतं गृहीत्वा तन्तुं तन्वन्, उद्बुध्यस्वाग्ने, त्रयस्त्रिंशत्तन्तव इति तन्तुमतीस्तिस्रः अग्नेऽभ्यावर्तिन्, अग्नेऽङ्गिरः, पुनरूर्जा, सहरय्या इत्यभ्यावर्तिनीश्चतस्रो मनो ज्योतिरिति मनस्वतीं प्रजापतिर्जयानिति प्राजापत्यमन्वग्निरुषसामित्यनुख्याम् अयाश्चाग्नेऽसीति प्रायश्चित्तीयामुद्वयं तमस इति ज्योतिष्मतीमायुर्दा अग्न इत्यायुर्दां मिन्दाहुती व्याहृतीश्च प्रत्येकं चतुर्गृहीतं गृहीत्वा पुनराधानं हुत्वा पूर्ववदौपासनं जुहोति। औपासनं धार्यं कर्तुमशक्तोऽध्यानं गमिष्यन्वाप्ययं ते योनिरित्यरण्यां समारोप्य पुनर्जातवेद इत्यहरहर्मथित्वा जुहुयात्। अथवा या ते अग्न इत्यात्मन्युपावरोहेति समिधं वा समारोप्य तेनैव लौकिकाग्नावबरोप्य जुहुयात्। समारोपणे कृते होमे विच्छिन्ने पूर्ववत् प्रायश्चित्तमाद्वादशाहाज्जुहोति। द्वादशाहे विच्छिन्ने पुनराधानं करोति। मासे विच्छिन्ने प्राजापत्यं षण्मासे चान्द्रायणं संवत्सरे प्राजापत्यं तप्तकृच्छ्रं चान्द्रायणं चरित्वा तद्द्रव्यं ब्राह्मणेभ्यो दत्वा पुनराधानं कुर्यात्। अग्नौ त्यक्ते भ्रूणहा भवति। पर्वणि पर्वणि स्थालीपाकः प्रसिद्ध एवमौपासनं हुत्वा पञ्च महायज्ञान्करोति। (वैखा.गृह्य.६.१६.१-११)

## ४.२) विवाहः( कन्योद्वाहः)

विवाहसमये दीयमाना कन्या योग्यपद्धत्या एव देया। विवाहोत्तरं च नवोढा कन्या स्वगृहं प्रति नीयमाना योग्यपद्धत्या एव नेया। कन्यायाः दानेन, कन्यायाः स्वगृहं प्रति नयनेन एव विवाहस्य सर्वाणि कर्तव्यानि कार्याणि आरब्धानि भवितुमर्हन्ति। अतः कन्यायाः दानसमये कन्यायाः नयनसमये किञ्चिदपि अशुभसूचकं न भवेत्।

⇒ **यदि कन्यायाः दानसमये नयनसमये वा सा पतेत्।**

बोधायनगृह्यसूत्रे उक्तं कन्यायाः दानसमये अथवा वरेण स्वगृहं प्रति नयनसमये यदि सा पतेत् ताम् उत्थाप्य उदस्थाद्देव्य इति मन्त्रपठनं कुर्यात्।

➢ अथ यदि कन्योपसाद्यमाना वोह्यमाना वा पतेत्तामुत्थापयेयुः। उदस्थाद्देव्यदितिर्विश्वरूप्यायुर्यज्ञपतावधात् । इन्द्राय कृण्वती भागं मित्राय वरुणाय च इति। (बोधा.गृह्य.४.१.९)

⇒ **यदि कन्यायाः दानसमये नयनसमये वा सा रजस्वला भवेत्।**

बोधायनगृह्यसूत्रे उक्तं कन्यायाः दानसमये अथवा वरेण स्वगृहं प्रति नयनसमये यदि कन्या रजस्वला स्यात् तर्हि पुमांसौ मित्रावरुणौ इति मन्त्रपठनं कुर्यात्।

➢ अथ यदि कन्योपसाद्यमाना वोह्यमाना वा रजस्वला स्यात्तामनुमन्त्रयते - पुमांसौ मित्रावरुणौ पुमांसाश्विनावुभौ । पुमानिन्द्रश्च सूर्यश्च पुमांसं वर्धयेताम् इति। (बोधा.गृह्य.४.१.१०)

⇒ **यदि कन्यायाः दानसमये नयनसमये वा सा रोदनं कुर्यात्।**

बोधायनगृह्यसूत्रे आश्वलायनगृह्यसूत्रे च उक्तं कन्यायाः दानसमये अथवा वरेण स्वगृहं प्रति नयनसमये यदि कन्या अश्रुकुर्यात् जीवां रुदन्ति इति मन्त्रपठनं कुर्यात्।

- अथ यदि कन्योपसाद्यमाना वोह्यमाना वाऽश्रु कुर्यात्तामनुमन्त्रयते - जीवां रुदन्ति विमयन्ते अध्वरे दीर्घामनु प्रसितिं दीधियुर्नरः। वामं पितृभ्यो य इदं समेरिरे मयः पतिभ्यो जनयः परिष्वजे इति। (बोधा.गृह्य.४.१.११)
- जीवं रुदन्तीति रुदत्याम्।(आश्व.गृह्य.१.८.४)

⇒ **यदि कन्यायाः नयनसमये रथाङ्गं छिन्नं, भिन्नं वा भवेत्।**

कौषीतकगृह्यसूत्रे उक्तं यत् कन्यायाः रथेन नयनसमये रथाङ्गं छिन्नं भवेत् तर्हि येन अग्निरक्षणं कृतमस्ति तादृशस्य आहिताग्नेः गृहे कन्यां प्रवेश्य *य ऋते* इति मन्त्रेण रथाङ्गं समीकुर्यात्। त्वं चिदश्वम् इति मन्त्रेण रथस्य ग्रन्थिबन्धनं कुर्यात्। स्वस्ति नो इति ऋक्पञ्चकस्य जपं कुर्यात्। अत्र चिन्तनीयः विषयः नाम कन्यायाः सुरक्षिततया नयनस्य प्राधान्यं प्राचीनैः चिन्तितमस्ति।

- अथ यदि रथाङ्गं विशीर्येत छिद्येत वा आहिताग्नेर्गृहं कन्यां प्रवेश्य य ऋते इत्येतया संदध्यात्। त्वं चिदश्वम् इति ग्रन्थिम्। स्वस्ति नो मिमीताम् इति पञ्चर्चं जपति। (कौषी.गृह्य.१.९.१३)

## ४.३) विवाहः(पुनर्विवाहः)

⇒ **यदि विविधैः कारणैः कृतं विवाहम् अयोग्यमिति भावयन्ति।**

बोधायनगृह्यशेषसूत्रे उक्तं यदि अशुभदिने, पितृपक्षे, अशुद्धेन वा विवाहो भवति तर्हि निकृष्टमिति चिन्तयन्ति अतः योग्यदिने शुभदिने शुद्धेन पुनर्विवाहं कुर्यात्।

- यथो एतद्ग्रहाणामुग्रचेष्टानां नक्षत्रपथचारिणामेवं विवाहं कुर्वन्त्यपरपक्षेऽशुभे दिने वाऽशुचिना वा विवाहेन नर्ध्नोतीति मन्येत वाऽऽवसथात् पुनर्विवाहं कुर्वीत।(बोधा.गृह्यशेष.२.१२.१)

बोधायनगृह्यशेषसूत्रे उक्तं विवाहाग्निं गृहमानीय स्थापनां करोति यजमानः तस्याग्नेः नित्योपासनायाः आरम्भं करोति। ततः प्रागेव यदि विवाहाग्नेः नाशः भवेत् तर्हि पुनर्विवाहं कुर्यात्।

- अथ चेदौपासनारम्भात् प्राक्ज्वलनस्य नाशः पुनर्विवाहं कुर्वीत। (बोधा.गृह्यशेष.२.१२.२)

वैखानसगृह्यसूत्रे उक्तं समावर्तनात् ब्रह्मचर्याश्रमस्य समाप्तिः भवति तदनन्तरमेव विवाहः नाम गृहस्थाश्रमस्य आरम्भः भवेत्। परं यदि समावर्तनम् अकृत्वा एव विवाहं कुर्यात्। तर्हि चान्द्रायणप्रायश्चित्तं कृत्वा प्रायश्चित्तनिमित्तं विहितं होमं कुर्यात्। तदनन्तरं समावर्तनं कृत्वा पुनर्विवाहं कुर्यात्।

- समावर्तनक्रियाहीने पाणिग्रहणे कृते चान्द्रायणं चरित्वाग्निमाधाय सावित्रीं वैष्णवं ब्राह्ममार्षमाग्नेयं शतमावर्त्य हुत्वा समावर्तनं कृत्वा पुनर्विवाहं करोति। पुनर्विवाहे पूर्ववत्सर्वं कुर्यात्। (वैखा.गृह्य.६.११.९,१०)

वैखानसगृह्यसूत्रे उक्तं यदि रजस्वलायाः कन्यायाः विवाहः भवेत् तर्हि कृच्छ्रप्रायश्चित्तं कृत्वा उक्तविधिना होमं कृत्वा तया सहैव पुनर्विवाहं कुर्यात्।

- रजःप्राप्तौ कन्या विवाहे कृते कृच्छ्रं चरित्वाग्निमाधाय वैष्णवं सावित्रीं शतमावर्त्य हुत्वा तां पुनर्विवाहं कुरुते।(वैखा.गृह्य.६.१३.१)

वैखानसगृह्यसूत्रे उक्तं यदि ज्येष्ठे तिष्ठति अनुजेन विवाहः कृतः तर्हि ज्येष्ठः कनिष्ठश्च चान्द्रायणप्रायश्चित्तं कृत्वा ज्येष्ठस्य विवाहं कृत्वा कनिष्ठः पुनर्विवाहं कुर्यात्।

- ज्येष्ठे तिष्ठत्यनुजेन विवाहे कृते परिवेत्तानुजश्चान्द्रायणं चरित्वा परिवित्ति ज्येष्ठं विवाहं कारयित्वा पूर्ववत्प्रायश्चित्तं हुत्वा पुनर्विवाहं कुर्यात्। (वैखा.गृह्य.६.१३.४)

## ४.४) विवाहः(सङ्कीर्णम्)

⇒ **यदि विवाहकाले कन्या रजस्वला भवेत्।**

प्राचीनचिन्तनानुसारं रजस्वलया धार्मिककार्ये सहभागो न करणीयः। रजोदर्शनकालो नाम मासिकशुद्धिकालः अतः तदा धार्मिककार्ये सहभागः अशक्यः। हिरण्यकेशीगृह्यशेषसूत्रे, बोधायनगृह्यशेषसूत्रे च उक्तं विवाहस्य सिद्धता पूर्णा जाताऽस्ति तदा एव अकस्मात् कन्यायाः रजःकालः आरब्धः तदा किं कुर्यात्? तदर्थं तात्कालिकीं शुद्धिं कृत्वा विवाहविधिः कर्तव्यः। विविधैः वेदोक्तमन्त्रैः तस्याः प्रोक्षणं तथा च स्नानं कारयेत्। तदनन्तरं नूतनवस्त्रं परिधाय पूर्णाहुतिं मिन्दाहुतिं च जुहुयात्। एतादृशीं तात्कालिकीं शुद्धिं कृत्वा विवाहकार्यं सम्पन्नं भवेत्। परं तदनन्तरं दिनत्रयं रजोदर्शनदोषकाले यथा स्पर्शास्पर्शं त्यक्त्वा आचरणं भवति तथा आचरणं कुर्यात्। अनन्तरमेव अन्यानि कार्याणि समापयेत्।

➢ **अथ विवाह्यकन्यारजस्वलाप्रायश्चित्तविधिं व्याख्यास्यामः विवाहे वितते यज्ञे होमकाल उपस्थिते। कन्यामृतुमतीं दृष्ट्वा कथं कुर्वन्ति याज्ञिकाः। यजःपवित्रैस्सावित्र्या प्रोक्षयेत्पूतवारिभिः। अनेन चानुवाकेन पवमानस्सुवादिना। स्नापयित्वाऽथ विद्वद्भिरन्यवस्त्रादलङ्कृताम् । पूर्णाहुत्यथ मिन्दाभ्यां महाव्याहृतिभिस्सह। हुत्वा तन्तुमतीं चैव व्याहृतीभिस्तथैव च। अनज्ञातं च विद्वद्भिश्शेषं कार्यं समाचरेत्। प्रधानहोमे निर्वृत्ते मलवद्वाससी भवेत्। त्र्यहे पर्यवेतेऽथ शेषकार्यं समाचरेत्।(बोधा.गृह्यशेष.५.२.१-५,हिर.गृह्यशेष.१.६.२६)**

वैखानसगृह्यसूत्रे उक्तं विवाहकाले यदि कन्या रजस्वला भवेत् तां कन्यां स्नापयित्वा अन्यत् वस्त्रं परिधाप्य पुण्याहादिविधिं कृत्वा उक्तैः मन्त्रैः प्रोक्षणं कृत्वा मिन्दाहुतीः व्याहृतिश्च हुत्वा विवाहस्य कार्यं पूर्णं कुर्यात्। प्रकृतं प्राप्तं विवाहकार्यं यदा समाप्तं भवति तदा सा कन्या पुनः अशुचिः भवति। तदनन्तरं पञ्चमे दिने एव सा पुनः शुद्धा भवेत्।

- विवाहे होमकाले कन्याया रजस्युत्पन्ने तां स्नापयित्वान्यद्वस्त्रं परिधाप्य पुण्याहं कृत्वा प्रोक्षणैः प्रोक्ष्य मिन्दाहुत्याश्राविताादीन्व्याहृतीश्च हुत्वा कर्म प्रवर्तेत। तत्क्रियापरिसमाप्ते सा वधूरशुचिर्भवति। (वैखा.गृह्य.६.१३.२,३)

कौशिकगृह्यसूत्रे उक्तं यदि वधू रजस्वला भवेत् *सत्येनोत्तभिता* इति सूक्तेन होमं कुर्यात्। होमकरणसमये कन्यया अन्वारम्भणं नाम हवनकर्तुः स्पर्शः कर्तव्यः।

- अनुवाकाभ्यामन्वारब्धाभ्यामुपदधीत।(रजस्वला वधूः भवति) (कौशि.गृह्य.७९.१६)

⇒ **यदि ज्येष्ठे भ्रातरि जीवति कनिष्ठः विवाहं कुर्यात्।**

कौशिकगृह्यसूत्रे उक्तं ज्येष्ठभ्रातुः विवाहः नाभवत् तथापि कनिष्ठेन विवाहः कृतः तदा उक्तविधिना होमप्रायश्चित्तं कुर्यात्।

- मा ज्येष्ठम्, त्रिते देवाः इति परिवित्तिविविदानावुदकान्ते मौञ्जैः पर्वसु बद्ध्वा पिञ्जूलीभिराप्लावयति ।(ज्येष्ठे भ्रातरि जीवति विवाहं करोति) (कौशि.गृह्य.४६.२६)

वैखानसगृह्यसूत्रे उक्तं यदि ज्येष्ठभ्राता परदेशं गतः। द्वादशवर्षाणि अतीतानि तथापि न प्रत्यागतः तर्हि सः दिवङ्गतः इति मत्वा तस्य प्रतिकृतिं कृत्वा दहनादि कृत्वा प्रायश्चित्तं हुत्वा कनिष्ठः विवाहं कुर्यात्। कदाचित् सः ज्येष्ठः पुनरागतः कनिष्ठेन पुनः प्रायश्चित्तं कृत्वा विवाहः कर्तव्यः। यदि ब्रह्महत्यादिभिः पतितः ज्येष्ठः स्यात् तर्हि बान्धवानां पुरतः जलपूर्णघटस्य त्यागं कृत्वा चान्द्रायणप्रायश्चित्तं कृत्वा विवाहं कुर्यात्।

- परदेशगते ज्येष्ठे द्वादशवर्षेऽतीते मृतस्येवाकृतिदहनादि कर्म कृत्वा प्रायश्चित्तं हुत्वा विवाहं कुरुते। तस्मिन्पुनरागतेऽनुजः पूर्ववत्प्रायश्चित्तं हुत्वा विवाहं करोति। ब्रह्महत्याद्यैः पतिते ज्येष्ठे बान्धवसन्निधौ वारिपूर्णघटत्यागेनैव तं त्यक्त्वा चान्द्रायणं चरित्वा विवाहं कुरुते। (वैखा.गृह्य.६.१४.१-३)

⇒ **उपसंहारः - चतुर्थप्रकरणम् (विवाहः, अग्निनाशः/पुनराधानम्, कन्योद्वाहः, पुनर्विवाहः, सङ्कीर्णम् )**

अस्मिन् प्रकरणे विवाहसंस्कारः वर्णितोऽस्ति। गृहस्थाश्रमस्य आरम्भः येन संस्कारेण भवति सः विवाहसंस्कारः अत्र स्वीकृतः। विवाहसंस्कारे मुख्यभूतं कार्यं गृह्याग्निसिद्धिः, तस्य गृह्याग्नेः रक्षणं, तस्मिन् अग्नौ नित्यहोमः, पर्वकाले होमः इत्यादिषु कार्येषु यदि दोषः भवेत्। तर्हि प्रायश्चित्तानि कर्तव्यानि भवन्ति। विवाहानन्तरं विवाहितायाः कन्यायाः योग्यरीत्या स्वगृहं प्रति आनयनम् इति पत्युः दायित्वमेव। परं यदि कन्यायाः आनयनसमये कतिचन विपरीतानि निमित्तानि भवन्ति तर्हि प्रायश्चित्तं कर्तव्यम्। यदि अशुभे दिने, समावर्तनम् अकृत्वा, ज्येष्ठभ्रातुः विवाहात् प्राक् विवाहः कृतः तर्हि प्रायश्चित्तं कृत्वा पुनर्विवाहं कुर्यात्। यदि विवाहसमये पत्नी रजस्वला भवेत् तर्हि प्रायश्चित्तं सूचितमस्ति। यदि ज्येष्ठभ्रातुः विवाहात् प्राक् विवाहः कृतः तर्हि अन्येषु गृह्यसूत्रेषु केवलं प्रायश्चित्तं सूचितमस्ति।

## ५) अन्त्येष्टिः

संस्काराः द्विविधाः भवन्ति। जातकसंस्काराः मृतसंस्कारश्च। तेषु मृतसंस्कारः प्राणोत्क्रमणानन्तरं भवति। प्राणोत्क्रमणानन्तरं कलेवरं नाम मृतशरीरं कथं स्थापनीयं, कुत्र स्थापनीयं, स्मशानं प्रति कथं नेयं, दाहचितिरचना कथं कर्तव्या, दहनं च कथं कर्तव्यम् इत्यादिविषये सविस्तरं विवरणं विद्यते ग्रन्थेषु। अत्र विवाहोत्तरं यस्याग्नेः निरन्तरं रक्षणं कृतं तेनैव मृतशरीरस्य दहनं कर्तव्यं भवति। गृह्याग्निः विवाहे सिद्धो भवति। तस्मिन्नेवाग्नौ सर्वविधाः होमाः ये विवाहोत्तरम् अपेक्षिताः गर्भाधानादयः ते भवन्ति। सम्पूर्णं जीवनमेव यज्ञः नाम त्यागमयमेव जीवनम्। येन यजमानेन यस्मिन् अग्नौ आजीवनं यागहोमादयः कृताः तस्मिन्नेव अग्नौ तस्य यजमानस्य मृतशरीरस्य आहुतिः भवति। तत् शरीरमपि शुद्धं पवित्रं भवेत् तदर्थं मृतशरीरस्य शुद्ध्यर्थं विधयः उक्ताः सन्ति। शुद्धस्य शरीरस्य आहुत्या यजमानस्य जीवनं सार्थकं भवति। स यजमानः देवलोकं गच्छति। भारतीयपरम्परायां यज्ञमयं जीवनं भवति। जीवनानन्तरं नाम प्राणोत्क्रमणानन्तरमपि यज्ञ एव भवति। मृतशरीरस्य दहनं तस्य वंशजाः कुर्वन्ति। तत्रापि पुत्रः, भ्राता, कश्चन सपिण्डः, कश्चन सगोत्रः, गुरुः, शिष्यः, ऋत्विज्, पतिः, पत्युर्भ्राता यथा यस्य निकटसम्बन्धः तथा कुर्वन्ति। संस्काराय अस्मै अन्त्येष्टिः इति वदन्ति। साऽपि इष्टिः नाम यज्ञ एव। मृतस्य अग्रिममार्गक्रमणाय अन्त्यसंस्कारः उपयुक्तो भवतीति सर्वत्र श्रद्धा अस्ति। यः मृतस्य संस्कारं करोति तस्यापि समृद्धिः भवति। अन्यथा पापभाग् भवति। एतत् विषये वैखानसगृह्यसूत्रे विवरण विद्यते।

*जातकसंस्कारो मृतसंस्कारश्चेति द्वौ संस्कारौ भवतः। पूर्वेणेमं लोकमपरेण परलोकं जयति। मृतसंस्कारः शरीरस्य दहनमित्याहुः। निर्दोषशरीराहुतिरग्नेः प्रियतमा भवति। तया आहुत्या समृतको देवलोकं गच्छति। मातापित्रोः पुत्रोऽन्यो भ्राता सपिण्डः सगोत्रः पितुर्मातुश्च योनिबन्धुः गुरुशिष्यर्त्विजो वा पत्न्याः पतिस्सुतः पत्युर्भ्राता सपिण्डः सगोत्रः पितुर्मातुश्च योनिबन्धुर्वा पुत्रस्य पित्रादयो मृतस्य शरीरं दाहयन्ति। मृतस्य संस्कारे कृते संस्कर्तुः सर्वसम्पत्समृद्धिस्स्यात्। अन्यथा भ्रूणहत्यामवाप्नोति।* (वैखा.गृह्य.७.१.१-८)

## ५.१) अन्त्येष्टिः(देहनाशः)

⇒ **यदि मृतशरीरस्य केवलं अस्थीनि प्राप्तानि।**

वैखानसगृह्यसूत्रे उक्तं कश्चन मृतः परं अग्निसंस्काराय शरीरं नाम कलेवरं न प्राप्तं केवलं मृतस्य अस्थीनि प्राप्तानि। तानि अस्थीनि अपि शुनकैः स्पृष्टानि सन्ति। कश्चन मृतः तत्र शुनकैः तत् शरीरं जीर्णं कृतम्। तर्हि अस्थीनां संस्कारं कुर्यात्। दहनं नाभवत् परं कालान्तरेण केवलम् अस्थीनि प्राप्तानि। तानि अस्थीनि काषायतोयैः पञ्चगव्यैः कुशतोयैः च प्रक्षाल्य अस्थीनां शरीराकृतिं कृत्वा प्रायश्चित्तं हुत्वा मन्त्रवत् विधिवत् अस्थीनां एव दहनं कुर्यात्।

➢ **देशान्तरे मृते दहनविहीने श्वकाद्यैः शवे जीर्णे तदस्थीन्यादाय काषायतोयैः पञ्चगव्यैः कुशतोयैश्च प्रक्षाल्याकृतिं कृत्वा तस्याग्नौ वैश्वदेवं याम्यं पैतृकं व्याहृतीश्च प्रायश्चित्तं हुत्वा विधिवद्दहनं कुर्यात्।** (वैखा.गृह्य.७.३.२)

⇒ **यदि मृतशरीरस्य अमन्त्रकः अग्निसंस्कारः कृतः।**

वैखानसगृह्यसूत्रे उक्तं यदि मृतशरीरस्य अमन्त्रकः अग्निसंस्कारः भवेत् तर्हि अस्थीनि संगृह्य पयसा आज्येन प्रक्षाल्य शरीराकृतिं कृत्वा प्रायश्चित्तं हुत्वा मन्त्रवत् विधिवत् दहनं कुर्यात्।

➢ **अमन्त्रकं शवे दग्धे तदस्थीन्यादाय पयसाज्येन प्रक्षाल्याकृतिं कृत्वा पूर्ववत्प्रायश्चित्तं हुत्वा समन्त्रकं दाहयति।** (वैखा.गृह्य.७.३.३)

⇒ **यदि दहनाय अग्निसंस्काराय मृतशरीरं न प्राप्तम्।**

यदि कश्चन मनुष्यः मृतो भवति तर्हि तस्य शरीरस्य अग्निसंस्कारः करणीयः। परं अग्निसंस्काराय मृतशरीरम् आवश्यकम्। मृत्युः अभवत् मृत्युवार्ता श्रुता परं मृतशरीरं न प्राप्तम्। तद् मृतशरीरमनुपलब्धं विविधैः कारणैः। कारणानि विविधानि भवितुमर्हन्ति। प्राचीनकाले कारणानि भिन्नानि आसन् विद्यमानकाले भिन्नानि स्युः। कदाचित् पर्वतात् पतनम्, कदाचित् जले पतनम्, कदाचित् अपघातः, कदाचित् जलप्रवाहे पतनम्। एवं

तर्हि कथं करणीयं, कथं साधनीयः मृतदेहस्य अग्निसंस्कारः। अत्र त्रिशतंषष्टिः पलाशवृन्तानि निश्चितसङ्ख्यानुसारं शरीरस्य कस्मिन् भागे कति स्थापनीयानि इति सूचितमस्ति। पलाशवृन्तानि संस्थाप्य तामेव शरीराकृतिं मत्वा दहनं करणीयमिति। त्रिशतंषष्टिः पलाशवृन्तानाम् पलाशपर्णानामपि उल्लेखो विद्यते। अनेन ज्ञायते यत् त्रिशतंषष्टिः इति सङ्ख्यायाः विषये नैव भेदः परं पर्यायरूपेण पलाशवृन्तैः पलाशपर्णैः वा एवं भेदो दृश्यते। प्रायश्चित्तं कृत्वा दहनं करणीयमिति सूचितम्। अत्र देहस्याप्राप्तिः प्रायश्चित्तकारणमस्ति। ऋग्वेदस्य ऐतरेय ब्राह्मणेऽपि अस्य उल्लेखो विद्यते। यथा यदि शरीराणि न विद्येरन्पर्णशरः षष्टिस्त्रीणि च शतान्याहृत्य तेषां पुरुषरूपकमिव कृत्वा तस्मिंस्तामावृतं कुर्युः अथैनान्छरीरैराहृतैः संस्पर्श्योद्वासयेयुरध्यर्ध शतं काये सक्थिनी द्विपंचाशे च विंशेचोरूद्विपंचविंशे शेषं तु शिरस्युपरिदध्यात्सा तत्र प्रायश्चित्तिः।(३२.१)

बोधायनपितृमेधसूत्रे उक्तं यदि आहिताग्निः प्रवासकाले मृतः भवेत्। तस्य अग्निसंस्कारः नाभवत्। तदा पुनः संस्कारपूर्वकं तस्य दहनं कर्तव्यम्। परं तदर्थं पलाशकाष्ठैः शरीराकृतिं कृत्वा दहनं कुर्यात्। तत्र कति काष्ठानि नाम समिधः शरीरस्य कस्य भागस्य निमित्तं स्थापनीयाः इति सूचितमस्ति। आहत्य त्रिशतं षष्टिः पलाशसमिधाः स्वीकुर्यात्। तथा शरीराकृतिं संस्थाप्य भूमौ हिरण्यम्, अरणीं निधाय उपावरोह जातवेद इति मन्त्रेण विहारं कल्पयित्वा गार्हपत्ये आज्यं विलीनं कृत्वा आहवनीये सप्त ते अग्ने इति मन्त्रेण पूर्णाहुतिं जुहोति।

- आहिताग्निश्चेत् प्रवसन् म्रियेत पुनस्संस्कारविधिं व्याख्यास्यामः - दर्भान् समान् संस्तीर्य तस्मिन् पलाशवृन्तैः पुरुषविकल्पं करोति चत्वारिंशताशिरः प्रकल्पयते। दशभिर्ग्रीवां विंशत्योरस्त्रिंशतोदरं पञ्चाशतापञ्चाशतैकैकं बाहुं तेषामेव पञ्चभिः पञ्चभिरङ्गुलीरुपकल्पयते। सप्तत्यासप्तत्यैकैकं पादं तेषामेव पञ्चभिः पञ्चभिरङ्गुलीरुपकल्पयते अष्टाभिश्शिश्नं द्वादशभिर्वृषणमित्येतानि प्रोक्ष्याथ भूमौ हिरण्यं निधायारणीं निधाय यां दिशं यजमानोऽगच्छत्तां दिशं प्रेक्षमाणो जपति उपावरोह जातवेद इति विहारं कल्पयित्वा गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि

चतुर्गृहीतं गृहीत्वा आहवनीये पूर्णाहुतिं जुहोति सप्त ते अग्ने समिधस्सप्त जिह्वाः इति।(बोधा.पितृमेध.३.८.१)

आश्वलायनगृह्यपरिशिष्टे उक्तं यदि शरीरनाशः भवेत् पलाशसमिधां देहाकृतिं कृत्वा दहनं कुर्यात्। रक्षां पुण्ये जले क्षिपेत्। यदि शरीरं न प्राप्तं परं अग्निसंस्कारः वर्षानन्तरं करणीयः भवेत् तर्हि नारायणबलिं कृत्वा प्रायश्चित्तं कृत्वा अग्निसंस्कारं कुर्यात्।

- अथ पालाशविधिः शिरश्चत्वारिशता ग्रीवां दशभिरुरस्त्रिंशतोदरं विशत्या बाहू शतेनाङ्गुलीर्दशभिरिति तदूर्णातन्तुबन्धैः पुरुषवत्कृत्वा स्नापयित्वा वाससा चाहतेनाऽऽच्छाद्य यथावत्संस्कुर्यात्सञ्चयनकर्मणा च तत्संहृत्य पुण्येऽम्भसि क्षिपेत्। एवं दुर्मृतानां पालाशविधिमेव कुर्याच्छरीराणि च तेषां महानद्यां क्षिपेत्त्रेताग्नीनप्सुक्षिपेद्गृह्यं चतुष्पथे यज्ञपात्राणि दहेत्संस्कारश्च तेषामब्दाद्दतुत्रयादोर्ध्वं नारायणबलिं कृत्वा कुर्यादधिकं प्रायश्चित्तं कृत्वा सद्य एव वा। तेषाशौचमाहिताग्नि पूर्णं त्रिरात्रमन्येषु।(आश्व.गृह्यपरि.३.१४)

जैमिनीगृह्यसूत्रे उक्तं आहिताग्नेः शरीरनाशः यदि भवेत् तर्हि पलाशसमिधां शरीराकृतिं कृत्वा दहनं कुर्यात्।

- आहिताग्नेः शरीरनाशे त्रीणि षष्टिशतानि पलाशत्सरूणामाहृत्य तैः प्रतिकृतिं कुर्यात्कृष्णाजिनेऽशीत्यर्धं शिरसि दध्याद् ग्रीवायां तु दशैव तु बाह्वोश्चैव शतं दध्यादङ्गुलीषु पुनर्दश उरसि त्रिंशत् दध्याञ्जठरे विंशतिं तथोर्वोश्चैव शतं दध्यात् मेढ्रे चापि दशैव तु जानुजंघयोस्त्रिशतं दध्यात् दश पादाङ्गुलीष्वपि इत्येतावन्तीह पुरुषस्य शरीराणि भवन्तीति विज्ञायते। (जैमि.गृह्य.२.४)

अग्निवेश्यगृह्यसूत्रे उक्तं नष्टस्य शरीरस्य स्थाने त्रिशतं षष्टिः पलाशवृन्तानां पुरुषाकृतिं कृत्वा दहनं कुर्यात्।

- अथ यदि दग्धः स्यादस्थीन्याहृत्यान्तर्वेदि शरीराणां कृष्णाजिने पुरुषाकृतिं कृत्वा तेषूपरि पात्राणि चित्वा कुशतरुणकैः प्रतिच्छाद्य प्रसिद्धमुपोपेयुः। अथ यद्यस्थीनि न विन्देत त्रयाणां षष्टिशतानां पर्णत्सरूणामेव कृष्णाजिने पुरुषाकृतिं कृत्वा तेषूपरि पात्राणि चित्वा कुशतरुणकैः प्रतिच्छाद्य प्रसिद्धमुपोपेयुः।(अग्नि.गृह्य.३.६.२)
- अथातः पुनःसंस्कारं व्याख्यास्यामः। त्रीणि षष्टिशतानि पलाशवृन्तानां तैः कृष्णाजिने पुरुषाकृतिं कृत्वा यदि शरीरं नश्येत् पुनःसंस्कारं कुर्वन्ति। अहरहरञ्जलिनैकोत्तरवृद्धिरात्र्यहात् तस्याग्निभिर्दहेयुः इति विज्ञायते। (अग्नि.गृह्य.३.१०.५)

कौशिकगृह्यसूत्रे उक्तं त्रिशतं षष्टिः पलाशसमिधाद्भिः शरीराकृतिं कृत्वा दहनसंस्कारं कुर्यात्।

- अपि वा त्रीणि षष्टिशतानि पलासत्सरूणाम्।(कौशि.गृह्य.८३.२३)

वैखानसगृह्यसूत्रे उक्तं मृतस्य अस्थीनि यदि प्राप्तानि तर्हि अस्थीनामेव दहनसंस्कारं कुर्यात्। परम् अस्थीनि अपि न प्राप्तानि पालाशपर्णैः यथा विधानं तथा देहाकृतिं कृत्वा दहनसंस्कारं कुर्यात्।

- अथ आकृतिदहनम्। अन्यथानृणस्येष्टापूर्तं देवाः पितरश्च नाश्नन्ति। यस्मात् कुलस्य मङ्गल्यायाऽकृतिदहनं विधीयते। तस्मान्मासे संवत्सरे वा काले पालाशशाखानां सपत्नाणां षष्ट्यधिकशतत्रयं दर्भाश्च गृह्णाति। शुद्धे देशे गोमयेनोपलिप्य तिलाक्षतानवकीर्य यद्याहिताग्निः कृष्णाजिनमास्तीर्य तत्राऽकृतिं तावतीं करोति । तत्रास्थीनि पालाशदण्डाः पत्राणि मांसं सिरा रोमाणि च दर्भा भवन्ति। तस्याङ्गान्युद्दिश्यास्थिगणना। शिरश्चत्वारिंशत् कण्ठं दश बाहू शतं अङ्गुल्योर्दश वक्षस्त्रिंशत् उदरं विंशतिः वृषणे सीवन्याश्च सप्त शिश्नं त्रीणि ऊरू शतं जानुनी दश जङ्घे विंशतिः अङ्गुल्योर्दश इति विन्यस्य पत्राणि मांसं सिरा रोमाणि च दर्भैः कृत्वा

बध्नीयात्। तदेवमाकृतिं पुरुषस्य स्त्रिया वा कृत्वा तस्य तस्याग्नौ व्याहृतीर्हुत्वा पूर्ववत् दहति।(वैखा.गृह्य.५.१२.१-९)

- तदस्थीन्यप्यलाभे दशाहादूर्ध्वं पालाशपर्णैर्विधानेनाकृतिं कृत्वा प्रायश्चित्तान्ते तदग्निना दाहयेत्। (वैखा.गृह्य.७.३.४)

## ५.२) अन्त्येष्टिः (अनैसर्गिको मृत्युः)

सहजतया वृद्धावस्थायां गृहे सुखमयं प्राणोत्क्रमणं यस्य भवति सः पुण्यवान् मनुष्यः परं यस्य अनैसर्गिको मृत्युः भवति सः मनुष्यः पापकर्मा अस्ति इति भाव्यते, तर्क्यते अतः यस्य अनैसर्गिको मृत्युः भवति तस्य अग्निसंस्कारात् प्राक् प्रायश्चित्तं कुर्यात्।

⇒ **यदि सर्पदंशेन मृतः भवति।**

बोधायनपितृमेधसूत्रे उक्तं शरीरसंस्कारः अग्निसंस्कारः यदा भवति तदा एव प्रायश्चित्तं कुर्यात्। यदि सर्पदंशेन कश्चन मृतो भवेत् तर्हि *नमो अस्तु सर्पेभ्यः* इति मन्त्रेण आहुतीः हुत्वा अग्निसंस्कारं दहनसंस्कारं कुर्यात्।

➢ अथ द्विजातीनां पापकर्मणामज्ञातानां मुख्यमेव शरीरसंस्कारं कुर्वन्ति। तदानीमेव प्रायश्चित्तं कुर्वन्ति। सर्पदष्टमृतानां नमो अस्तु सर्पेभ्यः इति तिस्र आहुतीर्जुहुयात्। (बोधा.पितृमेध.२.८.१,२)

⇒ **यदि जले मृतः भवति।**

बोधायनपितृमेधसूत्रे उक्तं यदि जले पतित्वा कोऽपि मृतो भवेत् तर्हि *इमं मे वरुण*, *तत्त्वायामि* इति मन्त्रद्वयेन हुत्वा अग्निसंस्कारं कुर्यात्।

➢ जले मृतानां इमं मे वरुण, तत्त्वायामि इति द्वाभ्याम्। (बोधा.पितृमेध.२.८.३)

⇒ **यदि समुद्रे मृतः भवति।**

बोधायनपितृमेधसूत्रे उक्तं यदि समुद्रे कोऽपि मृतो भवेत् तर्हि *समुद्राय* इति मन्त्रेण हुत्वा अग्निसंस्कारं कुर्यात्।

➢ समुद्रे मृतानां समुद्राय इत्यृचा। (बोधा.पितृमेध.२.८.४)

⇒ **यदि पश्वादिभ्यो मृतः भवति।**

बोधायनपितृमेधसूत्रे उक्तं यदि पश्वादिभ्यः नाम पशुना कृतेन आक्रमणेन कोऽपि मृतो भवेत् तर्हि *आ गाव*, *इन्द्रो यज्वने* इति मन्त्रद्वयेन हुत्वा अग्निसंस्कारं कुर्यात्।

➢ पश्वादिभ्यो मृतानां आ गाव, इन्द्रो यज्वने इति द्वाभ्याम्। (बोधा.पितृमेध.२.८.५)

कौशिकगृह्यसूत्रे उक्तं यदि श्वापदादीनां दंशेन मृतो भवेत् तर्हि *यत्ते कृष्णः* इत्यनेन मन्त्रेण हुत्वा अग्निसंस्कारं कुर्यात्।

➢ यत्ते कृष्णः इत्यवदीपयति।(श्वापदादिषु दंष्ट्रादंशदोषान्म्रियेत) (कौशि.गृह्य.८०.५)

⇒ **यदि अशनिपातेन मृतो भवति।**

बोधायनपितृमेधसूत्रे उक्तं यदि वृष्टिकाले आकाशस्थायाः विद्युतः पातेन कस्यापि मृत्युः भवेत् तर्हि *अग्निर्मूर्धा*, *भुवः* इति मन्त्रद्वयेन अथवा *मूर्धानं दिवः* इत्येतया हुत्वा अग्निसंस्कारं कुर्यात्।

➢ अशनिपातमृतानां अग्निर्मूर्धा, भुवः इति द्वाभ्याम्। मूर्धानं दिवः इत्येतया वा। (बोधा.पितृमेध.२.८.६)

⇒ **यदि विविधप्रकारेण अनैसर्गिको मृत्युः भवेत्।**

बोधायनगृह्यशेषसूत्रे, अग्निवेश्यगृह्यसूत्रे, वैखानसगृह्यसूत्रे च उक्तं यदि चण्डालस्य हस्तेन, उदके, सर्पदंशेन, ब्राह्मणस्य शापेन, विद्युत्पातेन, कस्यापि प्राणिनः दंशेन, पशोः आघातेन, विषप्रयोगेण, रज्जुबन्धनेन, पाषाणेन, शापेन, सुरापानेन, आत्मत्यागेन वा मृतः तर्हि अन्त्यसंस्कारात् पूर्वं नारायणबलिं कुर्यात्। देशान्तरे मृतस्य च अन्त्यसंस्कारात् पूर्वं नारायणबलिं कुर्यात्। ब्राह्मणहतानां च अन्त्यसंस्कारात् पूर्वं नारायणबलिं कुर्यात्। अत्र यानि कारणानि उक्तानि सन्ति तानि मृत्युसमये यदि भवन्ति तर्हि मृतस्य केवलं अग्निसंस्कारं कृत्वा और्ध्वदैहिकी गतिः न भवेत्। एतादृशैः कारणै

यस्य मृत्युः अभवत् सः पापभागेव स्यात् इति धिया नारायणं प्रार्थयित्वा अनन्तरमेव अन्त्यसंस्कारादिकं कुर्यात्। नारायणबलिः अत्र प्रायश्चित्तस्वरूपः अस्ति।

- अथातो नारायणबलिसंस्कारविधिं व्याख्यास्यामः -
  चण्डालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि। दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मिणाम्। विषाग्न्यस्त्ररज्जुपाषाणदेशान्तरमृतेऽपि वा। अभिशस्तसुरापात्मत्यागिनां द्विजहतानामन्येषां च द्वादशवर्षाणि त्रीण्येकं वा यत्र मरणं यस्य तत्र तत्र कुर्वीत। (बोधा.गृह्यशेष.३.२१.१)
- अथातो नारायणबलिं व्याख्यास्यामः। दक्षिणोत्तरायणेऽपरपक्षस्य द्वादश्यां क्रियेत।....एवमेव शस्त्रविषरज्जुजलदर्वीकरमारुततरुपाषाणोच्छासनादिष्वात्मनिहतस्य वा गोब्राह्मणविधवापतितेष्वापतितस्य वा शरीरसंस्कारान् वर्जयेत्। देशान्तरमृते सङ्ग्रामहते व्याघ्रहते शरीरमानीय विधिना दाहयेत्। यद्येकाङ्गं दर्शयेद् द्विरङ्गं वा पृथिवीं शरीरं सक्त्वार्धयितः कुर्यात्।(अग्नि.गृह्य.३.११.४)
- अथ अदाह्यान्व्याख्यास्यामः। न दाह्योऽतुल्यो भवति। तुल्योऽपि पापरोगान्वितो रज्जुशस्त्रविषविभ्रमप्रतिषिद्धहतश्चात्मघातीब्राह्मणादिहीनहतोऽग्निदग्धोऽप्सुमृतोव्याल हस्तिपशुमत्तहतःस्वकिल्बिषाशनिभूतसम्पातभृगुपतनमहौघपरिसर्पणमहाध्वगमनप्रवास दुर्गव्याध्युपेक्षाव्यर्थप्रायोपवेशनेषु मृतो न दाह्यो भवति।(वैखा.गृह्य.५.११.१-३)
- ब्राह्मणाद्यैश्चण्डालान्तैः अद्भिः सर्पेण दंष्ट्रिणा अशनिपातेन अग्निना पशुना वा पापमरणे तस्याशौचवाक्तोदकम्पनाश्रुशवभरणाऽनुगमनदहनोदक बलिपिण्डदानादि कस्यचिन्नैव कुर्यात्। एतानि कर्तुः चान्द्रायणं तप्तकृच्छ्रं प्रायश्चित्तं भवति। पापमृतस्य शरीरं दावाग्निना शूद्रैः दाहयित्वा दशाहेऽतीते नारायणबलिं कुर्यात्। अथवा पालाशपर्णैरेव आकृतिदहनं करोति।(वैखा.गृह्य.७.४.७-१०)

## ५.३) अन्त्येष्टिः (मृतशरीरस्य शुद्धिः)

⇒ **यदि मृतशरीरस्य शुद्धिः न स्यात्।**

बोधायनपितृमेधसूत्रे उक्तं यदि मृतशरीरं अशुद्धम् अस्ति तर्हि शुद्धं कृत्वा अग्निसंस्कारं कुर्यात्। यद्यपि मनुष्यः मृतः तथापि तस्य शरीराहुतिः अग्नौ दीयते अतः मृतशरीरं शुद्धं भवेत्। यदि यजमानस्य मरणसमये पत्न्या यजमानस्य स्पर्शः कृतः स्यात् तर्हि विहितप्रायश्चित्तं हुत्वा अग्निसंस्कारं कुर्यात्।

➢ अथ यदि यजमाने म्रियमाणे पत्न्यालम्भुका स्यात् कथं तत्र प्रायश्चित्तम्? द्वादशगृहीतेन स्रुचं पूरयित्वा दुर्गामनस्वतीमहाव्याहृतीर्हुत्वा तद्यमो राजा इति द्वाभ्यां पूर्णाहुतिं हुत्वा यद्यर्थिनो विन्देरंस्तेभ्यो धेनुं दद्यादिति। (बोधा.पितृमेध.२.६.१२)

वैखानसगृह्यसूत्रे उक्तं यदि अन्यस्य सम्बन्धिनः मृत्युकारणात् प्राप्ते अशौचकाले मृत्युः भवेत्। यदि शुनकेन, कुक्कुटेन, सूतिकया, रजस्वलया, प्रकारान्तरेण अस्पृश्येन मृतशरीरस्य स्पर्शः कृतः तर्हि मृतशरीरं पञ्चगव्येन, कुशजलेन स्नापयित्वा शुद्धं कृत्वा अग्निसंस्कारं कुर्यात्।

➢ शवेऽन्याशौचयुक्ते श्वकुक्कुटसूतिकारजस्वलाद्यस्पृश्यस्पर्शने च मृतकं पञ्चगव्यैः कुशतोयैश्च स्नापयित्वा प्रोक्षणैः प्रोक्ष्य विधिवद्दहनं करोति। (वैखा.गृह्य.७.३.१)

बोधायनगृह्यसूत्रे उक्तं यदि सूतिकायाः नाम यया इदमिदानीं प्रसूतमस्ति, अथवा रजस्वलायाः अथवा अशौचिनां वा मृत्युः भवति। सूतिकायाः प्रसूतेः दशदिनानि नाभवत् नाम जननाशौचं प्रचलति, रजस्वलायाः रजकालस्य पञ्चमः दिवसः नाभवत् नाम अशुद्धिः अस्ति, तथैव यस्य कस्यापि किमपि अशौचं प्रचलति। एतेषां सर्वेषां मृत्युसंस्कारविषये स्पष्टता कृतास्ति। एतेषु दिनेषु तस्य तस्याः वा शरीरम् अशुद्धमेव। अतः मृदा, भस्मेन, पञ्चगव्येन, गोमूत्रेण, कुशैः मन्त्रवत् प्रोक्षणं कृत्वा शरीरस्य शुद्धिं कृत्वा अग्निसंस्कारं कुर्यात्।

- अथ सूतिकाया उदक्यायाः आशौचिनां वा मरणे आशौचकालेऽतीते वा तावत्कालं शरीररक्षणाशक्तौ मृद्भस्ममिश्रितेन पञ्चगव्येन गोमूत्रेण वा कुशैः प्रोक्षति। सुरभिमत्याऽब्लिङ्गाभिर्हिरण्यवर्णाभिः पावमानीभिर्व्याहृतीभिरिति। शतरुद्रियेण अग्निर्मूर्धा इत्यनुवाकेन चेत्येके। (बोधा.पितृमेध.२.८.७,८)

## ५.४) अन्त्येष्टिः (अशौचनिवृत्तिः/शुद्धिः)

कस्यापि मृत्युः यदा भवति तदा दहनसंस्कारः स्मशाने भवति। तदा मृतशरीरं स्मशानं प्रति नेतुं कतिचनजनाः सम्मिलिताः भवन्ति। तेषु सर्वेऽपि गोत्रजाः एव न भवन्ति। मृतस्य जीवनकाले तस्य यैस्सह सम्बन्धः आसीत् तादृशाः बहवाः भवन्ति। तेषां पुनः नित्यव्यवहाराय स्मशानात् प्रत्यागमनानन्तरं शुद्धिस्तु आवश्यकी एव।

⇒ **यदि मृत्युकारणात् अशौचं भवेत्।**

वैखानसगृह्यसूत्रे उक्तं यस्य कस्यापि यदा मृत्युः भवति तदा तस्य सम्बन्धिनाम् अशौचम् आरब्धं भवति। तद् अशौचं तावतां दिनानां समाप्तिनन्तरं समाप्तं भवति। तदर्थं अन्यः कोऽपि विधिः अथवा होमः नास्ति। यावान् निकटसम्बन्धः तावन्ति आधिकदिनानि अशौचं भवति। जननात् पूर्वं जननात् अनन्तरं च यावत् आधिकाधिकदिनानां जीवनं तावत् आधिकम् अशौचं भवति। आधिकाधिकं दशाहम् अशौचं न्यूनातिन्यूनं स्नानेन शुद्धिः भवति। ये सम्बन्धिनः न सन्ति तथापि स्मशानपर्यन्तं गताः तेषामपि शुद्धिः कदा भवति तदपि उक्तमस्ति। तत्रापि आधिकाधिकं दशाहम् अशौचं न्यूनातिन्यूनं स्नानेन शुद्धिः भवति।

➢ उपनयनादूर्ध्वं ब्राह्मणस्य मरणे सपिण्डानां दशाहमशौचं विधीयते। दन्तजननादूर्ध्वं त्र्यहं नामकरणादूर्ध्वमेकाहं जननादूर्ध्वं सद्यश्शौचम्। स्त्रियाश्चमरणे विवाहादूर्ध्वं दशाहमष्टवर्षादूर्ध्वं त्र्यहं चौलकादूर्ध्वमेकाहं पूर्वं सद्यश्शौचम्। मातापित्रोर्भ्रातृणाञ्च सर्वत्र दशाहमेव गर्भे मृते गर्भिण्यास्तन्मासतुल्यैरहोभिराशौचम्। सूतके चान्यसूतके प्राप्ते प्रेतके चान्यप्रेतके प्राप्ते पूर्वाशौचेन शुद्धिः स्यात्। इतरस्य प्राप्ते अपरस्यैवाहोभिः शुद्धिर्भवति। असपिण्डस्य शवस्य स्नानालङ्करणे कृते त्र्यहं दिवसं वा, वहने कृते स्नात्वा दशप्राणायामान् कृत्वा नक्षत्रदर्शनात्पूर्वं ग्रामाद्बहिरासीत। तावदेवाशौचम्। रात्रौ सूर्योदयात्पूर्वमासीत्। अन्यथा तद्ग्रामे प्रविष्टे शवभर्तुरेकाहं, तद्गृहे प्रविष्टे त्र्यहं, तत्र भोजने कृते दशाहं भवति। (वैखा.गृह्य.७.५.१-१०)

⇒ **यदि मृतस्य अग्निसंस्काराय स्मशानपर्यन्तं गताः शुद्धाः भवितुमिच्छन्ति।**

बोधायनपितृमेधशेषसूत्रे वैखानसगृह्यसूत्रे च उक्तं यदि दहनसंस्काराय अन्ये सम्बन्धिनः स्मशानं गच्छन्ति तर्हि तैः स्वस्य शुद्ध्यर्थं स्मशानात् गृहमागत्य परिधृतवस्त्रेण सह स्नात्वा, अग्निस्पर्शं कृत्वा, आज्यं पीत्वा पुनः स्नात्वा प्राणायामं कृत्वा पुनः शुष्कं वस्त्रं धृत्वा पुनः स्नात्वा शुद्धाः भवन्ति।

- अथ ये तत्र प्रेतानुगास्ते सचेलं स्नात्वाऽग्निं स्पृष्ट्वाऽऽज्यं प्राश्य पुनरपि स्नात्वा पुनः प्राणानायम्योत्तीर्य शुष्कवस्त्रं परिधाय पुनरपि स्नात्वा ततश्शुद्धाः भवन्ति। (बोधा.पितृमेधशेष.१.१.७)
- प्रेतं ज्ञातिमज्ञातिं वा अनुगम्य स्नात्वा अग्निं स्पृष्ट्वा घृतं प्राश्नीयात्। आत्मनः पितुर्मातुश्च योनिबन्धूनाञ्च मरणे विज्ञाते सचेलस्नानं करोति।(वैखा.गृह्य.७.६.१,२)

बोधायनपितृमेधशेषसूत्रे उक्तं यदि कन्याः, अनुपनीताः, अनाथाः, अनुचराः, यज्ञं कुर्वाणाः प्रेतस्य पृष्ठतः श्मशानं गच्छेयुः। ततः आगमनोत्तरं शुद्ध्यर्थं घृतं अग्निश्च न भवेत् । तर्हि गायत्रीमन्त्रेण अभिमन्त्रितं पवित्रं जलं पीत्वा स्नात्वा शुद्धाः भवन्ति।

- कन्यामनुपनीतमनाथमनूचानं यज्वानं यदि प्रेतमनुव्रजन् घृताग्न्यादिकं न भवेदग्निघृताद्यसम्भवे गायत्र्याऽभिमन्त्र्य दशकृत्वाऽपः पीत्वा पुनस्स्नानेन शुद्धिर्भवति। (बोधा.पितृमेधशेष.१.१.८)

बोधायनपितृमेधशेषसूत्रे उक्तं यदि प्रेतवाहकाः स्मशानात् प्रत्यागत्य ब्राह्मणसमूहस्य प्रदक्षिणां कृत्वा दिनस्य अवशिष्टभागम् अथवा रात्रेः अवशिष्टभागम् अतिक्रम्य ग्रामं प्रविश्य पञ्चगव्यं प्राश्य, गोग्रासं दत्वा, देवतादर्शनं कृत्वा, यथाशक्ति आधिकाधिकं, न्यूनातिन्यूनम् एकवारं वा गायत्री जपं कुर्वन्ति तर्हि शुद्धाः भवन्ति।

- अथ वाहका ब्राह्मणाः परिषदं प्रदक्षिणीकृत्य नमस्कृत्वाऽसपिण्डशवहरण-प्रायश्चित्तमभ्यनुज्ञाप्य अहश्शेषं रात्रिशेषं वाऽतिक्रम्य ग्रामं प्रविश्य पञ्चगव्यं प्राश्य गोग्रासं दत्वा देवतादर्शनं कृत्वा यथाशक्ति गायत्रीं जपित्वा ततश्शुद्धाः भवन्ति। गायत्रीमेव वा जपेयुरित्येके। (बोधा.पितृमेधशेष.१.१.९)

## ५.५) अन्त्येष्टिः (संकीर्णम्)

⇒ **यदि पर्वहोमः न कृतः।**

बोधायनपितृमेधसूत्रे उक्तं मृत्युसमयात् प्राक् अस्वास्थ्यकारणात् अन्यान्यकारणात् यदि मृतेन मरणात् पूर्वं दर्शकाले तथा पौर्णिमाकाले होमो न कृतः, नाम पर्वहोमः न कृतः, तर्हि अतिपन्नप्रायश्चित्तं कृत्वा अग्निसंस्कारं कुर्यात्।

➢ अथ यस्योभे पर्वणी अतिपन्ने स्यातामतिपन्नप्रायश्चित्तं कुर्वीत। (बोधा.पितृमेध.१.१.१०)

⇒ **यदि पर्वहोमः न कृतः।**

वैखानसगृह्यसूत्रे उक्तं यदि गृहस्थस्य अस्वास्थ्यकारणात् मृत्युकारणात् औपासनहोमः विच्छिन्नः, तर्हि मृतस्य पुत्रः श्रोत्रियस्य गृहात् अग्निम् आनीय योग्यायां भूम्याम् अग्निं संस्थाप्य उपस्थानं कुर्यात्।

➢ गृहस्थस्यौपासने विच्छिन्ने यदि प्राणोत्क्रान्तिर्वृद्धानुज्ञातस्तत्पुत्रः श्रोत्रियागारादग्निमाहृत्यसंस्कृतायां भुवि व्याहृतिभिः संस्थाप्योपतिष्ठेत। एवमग्निमुत्पाद्य पूर्वोक्तेन विधिना दहनं कुर्यात्। (वैखा.गृह्य.७.९.१,३)

⇒ **यदि प्रेतस्य दहनकालः अतीतः।**

वैखानसगृह्यसूत्रे उक्तं यदि मृतशरीरस्य दहनकालः अतीतः अथवा दहनक्रिया नाभवत् अथवा दहनक्रियायाः विपरीतता अभवत् तर्हि सर्वत्र तिलैः वैश्वदेवं याम्यं पैतृकं व्याहृतीश्च प्रायश्चित्तं कुर्यात्।

➢ शवस्य दहनकालेऽतीते क्रियाहीने विपर्यासे च प्रेतकर्मणि सर्वत्र तिलैरेव वैश्वदेवं याम्यं पैतृकं व्याहृतीश्च प्रायश्चित्तं जुहोति। (वैखा.गृह्य.७.४.११)

⇒ **यदि दहनाय आनीतस्य अग्नेः नाशः भवेत्।**

वैखानसगृह्यसूत्रे उक्तं प्रेतस्य दहनकाले आनीतस्य अग्नेः यदि नाशः भवति पूर्ववत् भस्म समिधि निधाय लौकिकाग्नौ निधाय प्रायश्चित्तं हुत्वा तेन अग्निना प्रेतस्य दहनं कुर्यात्।

➢ शवस्य दहनार्थं होमे हुते तदग्नावुत्सन्ने पूर्ववद्भस्म समिधमारोप्य लौकिकाग्नौ निधाय प्रायश्चित्तं हुत्वा तेनाग्निना दहनं कुर्यात्। (वैखा.गृह्य.७.४.१२)

⇒ **यदि यजमानस्य अग्निः नष्टः अपहृतः वा भवेत्।**

अग्निवेश्यगृह्यसूत्रे उक्तं यदि यजमानस्य औपासनाग्निः नष्टः अथवा अपहृतः अस्ति तदा एव यजमानः मृतः भवेत् तर्हि तस्य अग्निसंस्कारं कर्तुं अग्निः पुनः मथित्वा निर्मातव्यः। पुत्रः शिष्यः वा यः अग्निसंस्कारं कुर्यात् तेन मृतस्य दक्षिणबाह्वोः स्पर्शं कृत्वा *येऽस्याग्नयो जुह्वतो* इति मन्त्रपूर्वकं अग्निमन्थनं कर्तव्यम्। तस्य निर्मितस्य अग्नेः उपयोगं कृत्वा अग्निसंस्कारं कुर्यात्।

➢ अथ यदि नष्टाग्निरपहृताग्निर्वा यजमानः प्रेयाद् यद्यस्य पुत्रो वान्तेवासी वालङ्कर्मण्यः स्यात्। प्राचीनावीतं कृत्वोद्धत्यावोक्ष्य यजमानायतने प्रेतं निधाय गार्हपत्यस्यायतने अरणिं निधाय प्रेतस्य दक्षिणं बाहुमन्वारभ्य मन्थति येऽस्याग्नयो जुह्वतो मांसकामाः सङ्कल्पयन्ते यजमानं जायन्तु ते हविषे स्वादिताय स्वर्गं लोकमिमं प्रेतं नयन्तु इति।(अग्नि.गृह्य.३.९.१)

⇒ **यदि प्रतिदिनं बलिदानं न कृतम्।**

मृतात् दिनात् प्रतिदिनं मृतस्य नाम्ना बलिदानं कर्तव्यं भवति। परं प्रातःकालीनं बलिदानं न कृतं सायं द्विगुणं कुर्यात्, सायं बलिदानं न कृतं प्रातः द्विगुणं कुर्यात्। यदि शुनकादिना बलिपात्रं स्पृष्टं पञ्चगव्यैः बलिपात्रं प्रक्षाल्य बलिदानं कुर्यात्।

- प्रातर्बलौ हीने सायं द्विगुणं सायं हीने प्रातर्द्विगुणमेवमादशाहात्करोति। श्वकुक्कुटसूतकोदिक्यान्त्यजैरश्मनि सृष्टे पञ्चगव्यैः प्रक्षाल्य बलिं दद्यात्। (वैखा.गृह्य.७.६.४,५)

⇒ **यदि नवश्राद्धादि श्राद्धानि न कृतानि।**

बोधायनपितृमेधसूत्रे उक्तं यदि मृतस्य निमित्तेन मृतस्य परलोकगमनाय मृतात् प्रतिदिनं कर्तव्ये श्राद्धे विघ्नं प्राप्तं तर्हि चतुर्थे, पञ्चमे, नवमे, एकादशे दिने प्रथमदिनात् एकादशदिनपर्यन्तं कर्तव्यं श्राद्धम् एकादशे दिने सर्वं श्राद्धादिकं कुर्यात्। अत्र चतुर्थादिषु यदा कर्तुं शक्यते तदा यावन्ति दिनानि अतीतानि तावतां दिनानां श्राद्धं तदा कुर्यात्।

- अथ नवश्राद्धं विच्छिद्येतैतस्मिन्नह्नि कुर्यात्। अथाप्युदाहरन्ति - चतुर्थे पञ्चमे चैव नवमैकादशेऽहनि। यदत्र दीयते जन्तोस्तन्नवश्राद्धमुच्यते। एकोद्दिष्टे नवश्राद्धे यदि विघ्नः प्रवर्तते। तिथिवारादिभिः कुर्यात्प्राप्तमेकादशेऽहनि। (बोधा.पितृमेध.२.१०.६,७)

वैखानसगृह्यसूत्रे उक्तं यदि मृतात् दिनात् कर्तव्यं श्राद्धं मासं यावत् न कृतं तर्हि प्राजापत्यप्रायश्चित्तं कृत्वा पूर्ववत् एकोद्दिष्टश्राद्धं कुर्यात्।

- निमित्तश्राद्धे मासेऽतीते हीने च प्राजापत्यं चरित्वा प्रायश्चित्तं हुत्वा पूर्ववदेकोद्दिष्टं कुर्यात्। (वैखा.गृह्य.७.७.५)

⇒ **यदि सपिण्डीकरणश्राद्धं न कृतम्।**

वैखानसगृह्यसूत्रे उक्तं सपिण्डीकरणम् नाम मृतस्य पूर्वजत्रयेण सह संयोजनम्। सपिण्डीकरणम् प्रायः मृतात् द्वादशेदिने भवति। यावत्पर्यन्तं सपिण्डीकरणं न भवति तावत्पर्यन्तं मृतस्य प्रेतसंज्ञा भवति यदा सपिण्डीकरणम् भवति तदारभ्य पितृसंज्ञा भवति। तत् सपिण्डीकरणम् यदि न कृतं शुभकार्यस्य नाशो नाम स्थगनं भवति तर्हि प्रायश्चित्तहोमं कृत्वा सपिण्डीकरणं कृत्वा अन्ये दिने विष्णुसूक्तादिना होमं कृत्वा शुभकर्म कुर्यात्।

- सपिण्डीकरणे हीने कृतं शुभकार्यं विनश्यति। तस्मात्प्रायश्चित्तं हुत्वा सपिण्डीकरणं कृत्वा भिन्नेऽहनि विष्णुसूक्तं मिन्दाहुत्याश्राविताादीन्हुत्वा पुनः शुभकर्म कुर्यात्। (वैखा.गृह्य.७.८.३,४)

⇒ **यदि मृतात् दिनात् दशाहात् प्राक् अमावास्या भवेत्।**

वैखानसगृह्यसूत्रे उक्तं यदि मृतात् दिनात् दशाहात् पूर्वं मध्ये अमावास्या भवेत् अमावास्यायाः दिने एव अवशिष्टानां दिनानां बलिदानं कुर्यात्। कारणं द्विचन्द्रदर्शने दोषः भवेत्।

- अन्तर्दशाहे अमावस्या यदि भवेत् तस्यामेवशेषान् बलीन् दत्वा बलिकर्म समापयति। द्विचन्द्रदर्शने महान् दोषो भवेत्।(वैखा.गृह्य.७.६.७,८)

⇒ **यदि अन्यस्य मृत्युकारणात् प्राप्ते मृताशौचकाले मृतः भवति।**

अग्निवेश्यगृह्यसूत्रे उक्तम् अन्यः कश्चन मृतः तस्मात् मृताशौचम् आरब्धं तस्मिन् काले होमादिकं स्थगितं भवति। अशौचदिनेषु एव स्वयं मृतः भवति। तदा अशौचकाले यावन्ति दिनानि होमः नाभवत् तावतां दिनानां द्रव्यं वंशजः ब्राह्मणाय दद्यात्।

- यदि सूतको मृतको भवेत् तन्मध्ये होमं न करोति स्थालीपाकं च तान्याहानि व्यतीते तद्द्रव्यं ब्राह्मणाय ददाति। (अग्नि.गृह्य.२.७.८)

⇒ **यदि एकस्मिन् दिने सूतकप्रेतकं प्राप्तम्।**

वैखानसगृह्यसूत्रे उक्तं यदि एकस्मिन् दिने सूतकप्रेतकं प्राप्तं वास्तुहोमं कृत्वा पिण्डनिर्वापणं कुर्यात्।

- सूतकप्रेतकयोरेकाहसन्निपाते तन्त्रयित्वा वास्तुहोमं हुत्वा पृथगेवोत्थानहोमं पिण्डनिर्वापञ्च करोति। (वैखा.गृह्य.७.४.६)

⇒ **यदि विहितं पितृकार्यं न कृतम्।**

वैखानसगृह्यसूत्रे उक्तं यदि अष्टका, पिण्डपितृयज्ञः, मासिश्राद्धं वा न कृतं तर्हि चरुणा आज्येन च विहितं होमं त्रिवारं कुर्यात्।

- अष्टकाहीने वैश्वदेवपैतृकौ द्वौ चरू पक्त्वाज्यपक्वाभ्यां वैश्वदेवं वैष्णवं रौद्रं याम्यं पैतृकहोमं च त्रिरावर्त्य पूर्ववदष्टकां कुर्यात्। (वैखा.गृह्य.६.१९.९)
- पिण्डपितृयज्ञे मासिश्राद्धे च हीनेऽष्टकावत्प्रायश्चित्तं जुहोति। (वैखा.गृह्य.६.२०.१)

⇒ **यदि श्राद्धभोजनं कृतम्।**

अग्निवेश्यगृह्यसूत्रे उक्तं यदि श्राद्धभोजनं कृतं तर्हि प्रायश्चित्तं कुर्यात्। कुशानां जलप्राशनेन, जलाशये स्नानेन, *मानस्तोके* इति मन्त्रस्य जपेन, गायत्रीमन्त्रस्य जपेन, प्राणायामैः शुद्धिः भवति। मासिकश्राद्धभोजनं अष्टकाश्राद्धभोजनं कृतं चेत् प्राजापत्यप्रायश्चित्तं कुर्यात्। एकोदिष्टश्राद्धभोजनं कृतं चेत् चान्द्रायणप्रायश्चित्तं कुर्यात्। नक्षत्रश्राद्धभोजनं कृतं चेत् अतिकृच्छ्रप्रायश्चित्तं कुर्यात्। षाण्मासिकश्राद्धभोजनं, त्रैपक्षिकश्राद्धभोजनं, सांवत्सरिकश्राद्धभोजनं यदि कृतं कृच्छ्रं, अतिकृच्छ्रं, तप्तकृच्छ्रं प्रायश्चित्तं कुर्यात्। नारायणबलिश्राद्धभोजनं कृतं चेत् कृच्छ्रप्रायश्चित्तं कुर्यात्। अशक्तः कृच्छ्रप्रायश्चित्तं कुर्यात्। ततोपि दुर्बलः त्रिरात्रं एकरात्रं वा प्रायश्चित्तं कुर्यात्। एवं विविधप्रकारकस्य श्राद्धस्य भोजने कृते विविधानि प्रायश्चित्तानि सूचितानि सन्ति। अतः श्राद्धभोजनं न कुर्यात्।

- भुक्त्वा श्राद्धं ततो विद्वान् यथाशास्त्रमगर्हितम्। छर्दयेत्तु ततः सम्यक् कुशवारिजलं पिबेत्। पुनर्जलाशये स्नात्वा मानस्तोकऋचं जपेत्। गायत्र्यष्टशतं जप्त्वा प्राणायामांस्तु षोडश। भुक्तं चेन्मासिकश्राद्धं प्राजापत्येन शुध्यति। अष्टकां हि ततो भुक्त्वा पूर्वोक्तेन विशुध्यति। एकोद्दिष्टं ततो भुक्त्वा तत्र चान्द्रायणं चरेत्। अतिकृच्छ्रं चरेत् विद्वान् भुक्त्वा नक्षत्रभोजनम्। कृच्छ्रातिकृच्छ्रं षण्मासे त्रिपक्षे तप्तमेव च। तथा संवत्सरे श्राद्धे सपिण्डे तु तथैव च। बलिं नारायणं भुक्त्वा कृच्छ्रमेकं चरेद् बुधः। अशक्तौ तु तथा

सर्वं कृच्छ्रमेकं चरेद् बुधः। अथवापि त्रिरात्रं स्यादेकाहं वापि दुर्बलम्। तस्मात् सर्वप्रयत्नेन श्राद्धगेहं न गच्छति। (अग्नि.गृह्य.३.१२.१)

⇒ **यदि वास्तुदोषः स्यात्।**

वैखानसगृह्यसूत्रे उक्तं यदि वास्तुशुद्धिविषये आशङ्का स्यात्, मृत्युकारणात् वास्तोः अशुद्धिः जाता स्यात् तर्हि पुरातनानि मृत्तिकापात्राणि त्यक्त्वा नूतनानि आनीय गृहस्य सम्मार्जनं कृत्वा भूमियज्ञं कृत्वा वास्तुमध्ये निवासं कुर्यात्।

➢ अथ वास्तुसवनं व्याख्यास्यामः। नवे वास्तुन्युषितेऽपि सूतकप्रेतकयोर्वापयित्वा मृण्मयानि भाण्डानि पुराणानि त्यक्त्वा नवानि परिगृह्यान्यान्परिच्छदान्यथोक्तं शोधयित्वा भूमियज्ञेनेष्ट्वा निवसेत्। यस्माद्वास्तुसवनेन शुद्धिर्वस्तूनाम्। (वैखा.गृह्य.३.१६.१-३)

⇒ उपसंहारः - **पञ्चमप्रकरणम् (अन्त्येष्टिः, देहनाशः, अनैसर्गिको मृत्युः, मृतशरीरस्य शुद्धिः, अशौचनिवृत्तिः/शुद्धिः, संकीर्णम्)**

पञ्चमे प्रकरणे अन्त्येष्टिः। प्राणोत्क्रमणानन्तरम् अन्त्येष्टिसंस्कारः। संस्कारोऽयं मृतशरीरस्य भवति। अतः अत्र कर्तृत्वं पुत्रादीनां वंशजानाम् एव। अन्त्यसंस्कारस्य आरम्भः दाहसंस्कारेण भवति परं यदि मृतशरीरं विविधैः कारणैः उपलब्धं न स्यात् तर्हि पालाशविधिः सूचितोस्ति। यदि अनायासेन मृत्युः नाभवत् सर्पदंशादिकरणैः अभवत् तर्हि प्रायश्चित्तं कृत्वा दहसंस्कारः कर्तव्यः। मृतशरीरमपि अग्नये आहुतिरूपेण समर्प्यते अतः तत् शरीरं यदि शुनकादिनां स्पर्शेण अशुद्धं जातमस्ति तर्हि शुद्धं कृत्वा दाहसंस्कारः कर्तव्यः। मृतस्य सम्बन्धिनां अशौचनिवृत्तिः, शुद्धिश्च कथं भवेत् तदपि सूचितमस्ति सूत्रेषु। अन्यत् च अन्यानि विविधानि अन्त्येष्टिसम्बन्धीनि प्रायश्चित्तानि च सूचितानि सन्ति। यथा दहनाय आनीतः अग्निः नष्टः भवेत्, प्रेतस्य दहनकालः अतीतः, दशाहक्रियाः न कृताः, सपिण्डीकरणश्राद्धं न कृतम् इत्यादीनि।

## ६.१) विविधनिमित्तेषु समानप्रायश्चित्तम्

विभिन्नेषु गृह्यसूत्रेषु विभिन्नानां प्रमादानां निरासार्थं तत्तत् स्थाने प्रायश्चित्तानि सूचितानि सन्ति। परं कतिचनसूत्रेषु विभिन्नानां प्रसङ्गान्नां निमित्तम् एकमेव समानं प्रायश्चित्तं समानहोमः सूचितः अस्ति।

आश्वलायनगृह्यसूत्रे उक्तं यया सह गमनं निषिद्धं तादृशया नाम रजस्वलया स्वपत्न्या सह गमनं नाम मैथुनं न कर्तव्यं तया सह यदि मैथुनं कृतं, येन सह यज्ञः न कर्तव्यः तेन अथवा तेन सह यज्ञः कृतः, यस्य पदार्थस्य भक्षणं न कर्तव्यं नाम लशुनादिकं तस्य यदि भक्षणं कृतं, यस्य स्वीकारः न कर्तव्यः तस्य नाम शस्त्रस्य वा विषस्य वा अन्यतमस्य अयोग्यस्य पदार्थस्य स्वीकारः कृतः, यत्र यागेषु पशुबन्धनं भवति तस्य यूपस्य स्पर्शः न कर्तव्यः यदि यूपस्य स्पर्शः कृतः एतानि कारणानि भवन्ति तर्हि *पुनर्मामैत्विन्द्रियं* इति मन्त्रद्वयेन होमं कुर्यात्।

- अगमनीयां गत्वाऽयाज्यं याजयित्वाऽयं भुक्त्वाऽप्रतिग्राह्यं प्रतिगृह्य चैत्यं यूपं वोपहत्य पुनर्मामैत्विन्द्रियं पुनरायुः पुनर्भगः। पुनर्द्रविणमैतु मां स्वाहा। इमे ये धिष्ण्यासो अग्नयो यथास्थानमिह कल्पताम्। वैश्वानरो वावृधानोऽन्तर्यच्छतु मे मनो हृन्तरममृतस्य केतुः स्वाहेत्याज्याहुती जुहुयात्। समिधौ वा। जपेद्वा। (आश्व.गृह्य.३.६.९-११)

बोधायनगृह्यसूत्रे उक्तं यदि गर्भाधानं, पुंसवनं, सीमन्तोन्नयनं, विष्णुबलिः, जातकर्म, नामकरणम्, उपनिष्क्रमणम्, अन्नप्राशनम्, चौलम्, उपनयनम् एतेषां संस्काराणां कालातिक्रमो भवति नाम तत्तत्काले सः संस्कारः न कृतः तर्हि समानप्रकारेण होमं कुर्यात्। तत्र प्रत्येकं संस्कारस्य कालातिक्रमाय विभिन्नं प्रायश्चित्तं नोक्तम्।

- अथ गर्भाधानपुंसवनसीमन्तोन्नयनविष्णुबलिजातकर्मनामकरणउपनिष्क्रमणअन्नप्राशन चौल-उपनयनादि कार्यं न कारयेदिति समान कर्म। ततं म आपः, यत्पाकत्रा, मनस्वती, मिन्दाहुती, महाव्याहृतीः, व्याहृतयश्च प्रायश्चित्तं जुहुयादिति। कालातिक्रमे

प्रधानादौ द्वे द्वे मिन्दाहुती जुहुयादिति। व्याहृतिपूर्वकं चेति सर्वेषां समानमाचार्या ब्रुवते। (बोधा.गृह्य.४.६.१-३)

बोधायनगृह्यसूत्रे अग्निवेश्यगृह्यसूत्रे च उक्तं यदि ब्रह्मचारिणा गृहस्थेन वा योग्ये अपेक्षिते समये अग्नौ होमः न कृतः। नवीनानि धान्यानि यदा उपलब्धानि भवन्ति तदा नवान्नहोमः कर्तव्यः भवति परं होमम् अकृत्वा नवान्नं भक्षितम्। मन्त्रहीनं किमपि कार्यं कृतम्। सीमन्तोन्नयनसंस्कारं अकृत्वा प्रसूतं, यमलयोः जननं, रजस्वलाभिगमनं, पतितेन नाम संस्कारहीनेन सह संभाषणं, दिने मैथुनं, शूद्राऽभिगमनं, स्वप्नान्ते रेतस्स्कन्दनं, उदके मूत्रपुरीषकरणम् तर्हि एतेषां कारणानां निमित्तं प्रायश्चित्तं कुर्यात्। तथैव बालकस्य जन्मानन्तरं जातकर्मसंस्कारः न कृतः, अग्निसंसर्गः अभवत्, तत्तत् कर्मानुसारं देवतानां निश्चितिः कृतास्ति परं देवतानां विपर्यासः अभवत्, तथैव मन्त्राणां विपर्यासः अभवत्। अपेक्षितक्रमानुसारं कर्म नाभवत्, ब्रह्मचारिणा कर्तव्यानि व्रतानि अथवा नित्याचाराः न कृताः। एतानि यानि कान्यपि निमित्तानि भवन्ति तर्हि प्रायश्चित्तं कुर्यात्। अत्र विविधानि प्रायश्चित्तकारणानि सन्ति। अत्र ब्रह्मचारिणः तथा गृहस्थस्य च अपराधकारणानि उक्तानि सन्ति। परम् अत्रापि प्रत्येकं निमित्तं पृथक् प्रायश्चित्तं नोक्तम्। केवलं *पाहिनो अग्न एनसे* इत्यादिभिः मन्त्रैः होमं कुर्यात् एतावदेव प्रायश्चित्तं भवति।

- अथ गृहमेधिनो ब्रह्मचारिणश्चानुगतेऽग्नौ कालातिक्रमे होमयोर्दर्शपूर्णमासयोश्च आग्रयणेनानुष्ट्वा नवान्नप्राशनाज्यस्कन्नावधूतहीनमन्त्राधिककर्मणश्चाकृतसीमन्त यां प्रसूतायां भार्यायां स्त्रीषु गोषु यमलजनने रजस्वलाऽभिगमने पतितसम्भाषणे दिवामैथुने शूद्राऽभिगमने स्वप्नान्ते रेतस्स्कन्दने उदके मूत्रपुरीषकरणे कुमारस्य जातस्यासंस्कारेऽकृताग्निसंसर्गे देवताविपर्यासे मन्त्रविपर्यासे कर्मविपर्यासे ब्रह्मचारिणश्च व्रतविपर्यासे मेखलायज्ञोपवीतस्योच्छेदने कृष्णाजिनस्याधारणे कमण्डल्वधारणे दण्डभङ्गे सन्ध्यालोपेऽग्निकार्यलोपे उदकुम्भलोपे भिक्षाचरणस्वाध्यायलोपे शुश्रूषालोपे एतैश्चान्यैश्चानाम्नातेषु प्रायश्चित्तम्। अग्निमुपसमाधाय सम्परिस्तीर्य प्रायश्चित्तं जुहोति पाहिनो अग्न एनसे स्वाहा। पाहिनो विश्ववेदसे स्वाहा। यज्ञं पाहि विभावसो स्वाहा। सर्वं पाहि शतक्रतो स्वाहा। पाहिनो

अग्न एकया। पाह्युत द्वितीयया। पाहि गीर्भिस्तिसृभिरुर्जां पते। पाहि चतसृभिर्वसो स्वाहा इति। पुरस्ताच्चोपरिष्टाच्च सानुक्रमणं यथाऽनुपूर्वकरणमविच्छिन्नं सन्ततं भवतीति। (बोधा.गृह्य.४.११.१-३)

- अथ गृह्यप्रायश्चित्तानि जुहोति अनुगतेऽग्नौ कालातिक्रमे होमयोः दर्शपूर्णमासयोश्च आग्रयणमकृत्वा नवान्नप्राशनेऽकृतसीमन्तायां प्रसूतायां भार्यायां स्त्रीषु गोषु च यमलजनने परागमने रजस्वलागमने दिवाकृतमैथुने कुमारस्याजातसंस्कारे मन्त्रविपर्यासे कर्मविपर्यासे ब्रह्मचारिणो व्रतविपर्यासे मेखलाच्छेदने दण्डभिन्ने यज्ञोपवीतस्याधारणे सन्ध्यालोपे अग्निकार्यलोपे उदकुम्भलोपे इत्येतैश्चान्यैश्च कल्पदृष्टमग्निमुपसमाधाय सम्परिस्तीर्य घृतं चतुर्गृहीतं गृहीत्वा पाहिनो अग्न एनसे स्वाहा इति। पुरस्ताच्चोपरिष्टाच्च महाव्याहृतीभिर्हुत्वा एतदेवास्य प्रायश्चित्तमविच्छिन्नकरणं सन्ततं भवतीति। (अग्नि.गृह्य.२.७.४)

वैखानसगृह्यसूत्रे उक्तं यदि गर्भाधानादीनां कालातिपत्यता भवेत् गर्भाधानादि चौलान्तं यावत् संस्काराः न कृताः परम् उपनयनसमयः सम्प्राप्तः तर्हि विष्णोर्नुकादि विहितं होमं द्विरावर्त्य पिता चान्द्रायणप्रायश्चित्तं तथा पुत्रः प्राजापत्यप्रायश्चित्तं कुर्यात्। तथा ब्राह्मणभोजनं, सुवर्णादिदानानि कृत्वा होमप्रायश्चित्तं च कुर्यात्।

- अथ निषेकादीनां सामान्यप्रायश्चित्तम्। विष्णोर्नुकादिमिन्दाहुत्याश्राविताादीन्द्विरावर्त्य हुत्वा तत्तत्कर्म कुर्यादिति केचित्। अथवाप्युपनयनं यावत्तावत्कालं गर्भाधानादिचौडकान्तेषु हीनेषु तन्त्रयित्वैकहोमे कुर्याच्चेत्पिता चान्द्रायणं पुत्रः प्राजापत्यं चरित्वा ब्राह्मणभोजनसुवर्णपशुदानानि कृत्वा विष्णोर्नुकादिमिन्दाहुत्याश्राविताादीन्वौन्द्रं मूलहोमं वैष्णवं च द्विरावर्त्य प्रत्येकं हुत्वा तन्त्रयित्वैकहोमे गर्भाधानादीन् कुर्यात्। आघारान्ते होमश्चैका भवति। आदावन्ते च प्रत्येकं परिषेकं करोतीति विशेषः। (वैखा.गृह्य.६.६.१-५)

⇒ **यदि विविधानां ज्ञाताज्ञातानां प्रमादानां परिमार्जनम् आवश्यकम्।**

यद्यपि विविधस्थानेषु विविधप्रमादानां निमित्तं विविधानि प्रायश्चित्तानि तत्तत्स्थाने उल्लिखितानि सूचितानि सन्ति। तथापि सर्वविधानां प्रमादानां निमित्तं बोधायनगृह्यशेषसूत्रे तथा च हिरण्यकेशीगृह्यसूत्रे मृत्तिकास्नानविधिः उक्तः। तत्र चतुर्णामपि वर्णानां शुद्ध्यर्थम् एषोविधिः सूचितः अस्ति। सूत्रे विस्तरेण उक्तमस्ति परमत्र केवलम् आरम्भसूत्रं तथा अन्तिमं सूत्रं स्वीकृतमस्ति।

➢ अथातो मृत्तिकास्नानविधिं व्याख्यास्यामः। ब्रह्मचारी गृहस्थो वानप्रस्थः परिव्राजको वा। ब्राह्मणः पूतो भवति। ब्रह्महत्यागोवधगुरुतल्पसुरापानसुवर्णस्तेयादि सर्वपापप्रणाशनमिति विज्ञायते। (बोधा.गृह्यशेष.५.४.३,४) (हिर.गृह्यशेष.१.२.८)

बोधायनगृह्यशेषसूत्रे तथा च हिरण्यकेशीगृह्यसूत्रे तृणगर्भ नामकः विधिः उक्तः अस्ति। अस्यापि उद्देशः सर्वविधप्रमादात् जनितानां पापानां निवृत्तिरेव। अत्र आरम्भश्लोकः स्वीकृतः।

➢ सर्वपापहरं चैव सर्वव्याधिविनाशनम्। तृणगर्भं प्रवक्ष्यामि विद्धि धर्म्यं सनातनम्। (बोधा.गृह्यशेष.१.२२.१) (हिर.गृह्यशेष.१.६.६)

अग्निवेश्यगृह्यसूत्रे सर्वप्रायश्चित्तम् उक्तमस्ति। पलाशस्य वा औदुम्बरस्य समिधः अष्टौ गृहीत्वा पञ्चमहायज्ञान् कृत्वा व्याहृतिभिः हुत्वा शकलान् एकैकशः जुहुयात्। एवं कृत्वा पवित्रः भवति।

➢ अथ सर्वप्रायश्चित्तानि जुहोति। पलाशशकलमौदुम्बरशकलं वान्यानि याज्ञिकशकलानि वाष्टौ गृह्णीयात्। पञ्चमहायज्ञान् कृत्वाग्निं परिस्तीर्याज्यं विलाप्योत्पूय समन्त परिषेचनं करोति। पुरस्ताच्चोपरिष्टाच्च व्याहृतिभिर्विहृताभिः समस्ताभिश्च हुत्वा शकलाज्येनाभ्यज्य एकैकशो जुहुयात्। तथैव परिषिच्य एवमेवाहरहः सायं प्रातः शकलहोमं हुत्वा सर्वस्मात् किल्बिषात् पूतो भवति। (अग्नि.गृह्य.३.१२.२)

अग्निवेश्यगृह्यसूत्रे ब्रह्मकूर्चविधिः सूचितः अस्ति। अत्र विविधप्रकारेण जाते प्रमादे शरीरम् अशुद्धम् अपवित्रं भवति। तदर्थं शरीरशुद्ध्यर्थम् विधिरयं सूचितोऽस्ति। अत्र योग्येन उक्तेन प्रमाणेन, उक्तायाः वर्णायाः गावः, उक्तमन्त्रेण गोमूत्रं, गोमयं, दुग्धं, दधि, आज्यं च स्वीकर्तव्यम्। एतेषां पञ्चानां मिश्रणं कृत्वा तत्र कुशोदकं मिश्रयित्वा आपोहिष्ठा इति मन्त्रेण मथनं कुर्यात्। तदनन्तरं उक्तैः मन्त्रैः पञ्चगव्यस्य होमं कुर्यात्। तथा च पञ्चगव्यस्य प्राशनं च कुर्यात्। तेन स्थानशुद्धिः शरीरशुद्धिश्च भवति।

- ब्रह्मकूर्चं प्रवक्ष्यामि कायशोधनमुत्तमम्। वेदादिजयहोमं च मन्त्रहीनमसंस्कृतम्। शूद्रान्नभोजने चैव वेदानां विक्रयेषु च। काकश्वानावलीढे चोत्कण्ठके मृगपक्षिणाम्। पञ्चमम्लेच्छसंस्पर्शे पञ्चगव्यं विशोधनम्। नीलवर्ण्यास्तु गोमूत्रं कृष्णागोमयमुद्धरेत्। ताम्रवर्णीपयश्चैव श्वेताया दधिरेवच। कपिलाया घृतं ग्राह्यं महापातकनाशनम्। अलाभे सर्ववर्णानां कपिलादेकात्तु ग्राह्यकम्। गोमूत्रैकपलं दद्यादङ्गुष्ठार्धं तु गोमयम्। क्षीरं सप्तपलं दद्याद् दधि त्रिपलमेव च। घृतमेकपलं दद्यात् तथैव च कुशोदकम्। सावित्र्या ग्राह्य गोमूत्रं गन्धद्वारेतिगोमयम्। आप्यायस्वेतिचक्षीरं दधिक्राव्ण इति वै दधि। आज्यं शुक्रमसीत्येवं देवस्यत्वा कुशोदकम्। आपोहिष्ठा मयोभुव इत्यालोड्य मा नस्तोके इत्यभिमन्त्र्य प्रणवेनोद्धृत्य प्रणवेन निर्मथ्य प्रणवेनैव पिबेत्। अग्नये, सोमाय, इरावती, इदं विष्णुर्विचक्रमे, मानस्तोके, प्रजापते, गायत्रीं च हुत्वा मध्यमेन पलाशपर्णेन पद्मपत्रेण तत् पिबेत्।

  यत्वगस्थिगतं पापं देहे तिष्ठति मामके। ब्रह्मकूर्चोदकात् सर्वं दहत्यग्निरिवेन्धनम्। इति (अग्नि.गृह्य.२.७.७)

## ६.२) प्रायश्चित्तानि

विविधेषु सन्दर्भेषु प्रायश्चित्तं कुर्यात् इति सन्दर्भो विद्यते। तत्र प्रायश्चित्तस्य नाम्ना उल्लेखो विद्यते परं तत् प्रायश्चित्तं कथं कर्तव्यमिति प्रश्नो भवति तत्र। अतः तस्य प्रायश्चित्तस्य स्वरूपम् अत्र विस्तरेण उक्तमस्ति।

### ⇒ कृच्छ्रप्रायश्चित्तम्

काठकगृह्यसूत्रे उक्तं कृच्छ्रनामकं प्रायश्चित्तं वसुभिः, रुद्रैः, आदित्यैः, मरुद्भिः च पूर्वमाचरितम् अत तेन प्रायश्चित्तेन तेन व्रतेन मनुष्योऽपि शुद्धः पवित्रः भवेदेव। प्रायश्चित्तकाले स्त्रिया सह शूद्रेण सह च सम्भाषणं न कुर्यात्। ब्रह्मचर्यस्य आचरणं कुर्यात्। मधुमांसलवणानि तथा श्राद्धभोजनं वर्जयेत्। दिने भक्षणं न कुर्यात्। निकृष्टं वस्त्रं यथा मृगाजिनं, कम्बलं वा धारयेत्। दिनत्रयं सायं भोजनं कुर्यात्। दिनत्रयं प्रातः भोजनं कुर्यात्। दिनत्रयम् अयाचितं भोजनं कुर्यात्। दिनत्रयं भोजनं न कुर्यात्। अतिकृच्छ्रमपि एवं प्रकारेण एव भवति परं एकग्रासमात्रमेव भोजनं कुर्यात्।

- **कृच्छ्रविधिं व्याख्यास्यामः। देवासो यथाचरन्वसवो रुद्रा आदित्या मरुदङ्गिरसः पुरा। स्त्रीशूद्रं नाभिभाषेत। नक्तमासीतसंश्रितः। सर्वाण्यहनि तिष्ठेत्। ब्रह्मचारी। क्षपाशयः। मधुमांसलवणश्राद्धानि वर्जयेदविचारयन्। गवाजिनं शाणीचीरं कुतपं मार्गं वा वास उच्यते। सर्वाकुशलमोक्षाय मरुतोऽप्याचरंस्तथा। त्र्यहं सायं त्र्यहं प्रातस्त्र्यहं भुञ्जीतायाचितम्। त्र्यहं नैव तु भुञ्जीतैतद्वसुभीरुद्रैरादित्यैश्चरितं व्रतम्। एष एवातिकृच्छ्रस्य विधिरेव विधीयते। एतेष्वेव तु कालेष्वेकैकं पिण्डं प्राश्नीयात्।** (काठक.गृह्य.५.१-१३.)

### ⇒ तप्तकृच्छ्रप्रायश्चित्तम्

काठकगृह्यसूत्रे उक्तं दिनत्रयम् उष्णं जलं पिबेत्। दिनत्रयम् उष्णं दुग्धं पिबेत्। दिनत्रयम् उष्णं विलीनं आज्यं पिबेत्। दिनत्रयम् केवलं वायुभक्षणं कुर्यात्। यवागूं (पेज

इति भाषायाम्) दिनत्रयं, सक्तुपिष्ठं दिनत्रयं, शाकं दिनत्रयं, तथा वायुभक्षणं दिनत्रयं कुर्यात्।

- तप्तकृच्छ्रं व्याख्यास्यामः। त्र्यहमुष्णाः पिबेदापस्त्र्यहमुष्णं पयः पिबेत्। त्र्यहमुष्णं पिबेत्सर्पिर्वायुभक्षः परं त्र्यहम्। बृहस्पतेस्तु कूर्चस्य एष एव विधिः स्मृतः। यवागूं यावकं शाकं पयः सर्पि कुशोदकम्। त्र्यहं त्र्यहं तु प्राश्नीयाद्वायुभक्षः परं त्र्यहम्। (काठक.गृह्य.६.१-४.)

⇒ **सान्तपनप्रायश्चित्तम्**

काठकगृह्यसूत्रे उक्तं मरुतां निमित्तं होमं कृत्वा मरुतां तृप्तिः कर्तव्या। गोमूत्रं, गोमयं, गोपयः, गोदधि, गोघृतं तथा च कुशोदकम् एतत् पञ्चगव्यम् इति नाम्ना उच्यते। अनेन पञ्चगव्येन दिनमेकं यापयित्वा एकरात्रम् उपवासश्च कर्तव्यः। एतत् सान्तपनप्रायश्चित्तं एतदेव त्रिवारं यदि कृतं महासान्तपनं भवति।

- अथ सान्तपनम्। मरुतां होमो मरुतस्तर्पयेत्। गोमूत्रं गोमयं क्षीरं दधि सर्पि कुशोदकम्। एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम्।(काठक.गृह्य.७.१-३.)

⇒ **महासान्तपनप्रायश्चित्तम्**

काठकगृह्यसूत्रे उक्तं सान्तपनं त्रिवारं कृतं चेत् महासान्तपनं भवति।

- अथ सान्तपनम्। मरुतां होमो मरुतस्तर्पयेत्। गोमूत्रं गोमयं क्षीरं दधि सर्पि कुशोदकम्। एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम्। एतदेव त्रिरभ्यस्तं महासान्तपनं स्मृतम्। (काठक.गृह्य.७.१-४.)

⇒ **उद्दालकप्रायश्चित्तम्**

वैखानसगृह्यसूत्रे उक्तं मासद्वयं यवैः निर्मितेन भक्षणेन, एकमासं दुग्धेन, अर्धमासम् आमिक्षया(तप्ते दुग्धे दधि योजनेन यः घनीभूतः भागः भवति), अष्टरात्रं

घृतेन, षड्रात्रम् अयाचितेन, त्रिरात्रं केवलं जलेन, एकं दिनरात्रं सम्पूर्णं उपवासेन एवं कृतेन आचरणेन उद्दालकप्रायश्चित्तं भवति।

- **तेषामुद्दालकप्रायश्चित्तम्। द्वौ मासौ यावकेन, मासं क्षीरेण, आमिक्षयार्धमासम् अष्टरात्रं घृतेन, अयाचितं षड्रात्रं त्रिरात्रमुदकेन, उपवासमहोरात्रं वर्तत इत्येतदुद्दालकम्** (वैखा.गृह्य.२.३.६,७)

### ⇒ चान्द्रायणप्रायश्चित्तम्

पौर्णिमायां पञ्चदशग्रासपरिमितं भोजनं कुर्यात्। पौर्णिमातः अमावास्यापर्यन्तं प्रतिदिनं एकैकं ग्रासं न्यूनं न्यूनं भोजनं कुर्यात्। पुनः अमावस्यातः पौर्णिमापर्यन्तं एकैकं ग्रासम् अधिकम् अधिकं भोजनं कुर्यात्।

### ⇒ व्रात्यस्तोमः

व्रात्यस्तोमस्य उल्लेखो यद्यपि बहुत्र विद्यते तथापि तस्य विषये विस्तरेण विवरणं नोपलभ्यते। सः एकः श्रौतयागः अग्निष्टोमसदृशः इति केचन ग्रन्थकाराः वदन्ति।

## ६.३) अद्भुतप्रायश्चित्तानि

गृहे एव गृहस्थधर्मस्य गृहस्थधर्मानुसारम् अपेक्षितानां नित्यनैमित्तिककर्मणाम् आचरणं भवति। तद् गृहं शुद्धं पवित्रं भवेत्। अतः तस्य गृहस्य शुद्धतां पवित्रतां रक्षयितुं सर्वदा जागरुको भवति गृहस्थः। परम् अकस्मात् घटितेन कस्यचित् प्रसङ्गेन गृहस्य पावित्र्यं शुद्धता च यदा न्यूना भवति तदा प्रायश्चित्तं होमादिकं कृत्वा गृहस्य पावित्र्यं शुद्धतां पुनः सम्पादयेत्। अथवा अकस्मात् घटितेन प्रसङ्गेन अशुभकारकसूचना यदि प्राप्ता तर्हि तस्य अशुभस्य निवारणाय होमादिकं कुर्यात्। अत्र अशुभसूचकस्य शान्तिः नाम प्रायश्चित्तमेव। यथा गृहस्य शुचिता शुद्धता आवश्यकी तथैव ग्रामस्यापि। अतः ग्रामेऽपि अशुभसूचकं किमपि घटितं तदा शान्तिं नाम प्रायश्चित्तं कुर्यात्। अत्र विविधाः अशुभसूचकाः प्रसङ्गाः वर्णिताः सन्ति। प्रायः या काऽपि घटना सहजतया न भवति तादृशी घटना यदि घटिता तर्हि तत् अद्भुतम् अशुभसूचकमिति मत्वा भीताः जनाः ततः मुक्तिम् इच्छन्ति। तदर्थं गृह्यसूत्रेषु शान्तयः नाम प्रायश्चित्तानि सूचितानि सन्ति।

अद्भुतप्रसङ्गानां वर्णनं प्रायश्चित्तानि च सामवेदस्य षड्विंशब्राह्मणेऽपि सूचितानि सन्ति। अनेन ज्ञायते यत् ब्राह्मणकालेपि अद्भुतविषये चिन्तनं परिहारोपायश्च सूचिताः आसन्। यथा सामवेदस्य षड्विंशब्राह्मणे *अथातोऽद्भुतानां कर्मणां शान्तिं व्याख्यास्यामः।(६.१.१) अथ यदास्य मणिमणिककुम्भस्थालीदरणमायासोराजकुलविवादो वा यानच्छत्रशय्यासनावसथध्वजपताकागृहैकदेशप्रभञ्जनेषु गजवाजिमुख्या वाप्रमीयाः प्रमीयन्त इत्येवमादीनि तान्येतानि सर्वाणीन्द्रदेवत्यान्यद्भुतानि प्रायश्चित्तानि भवन्ति।(६.३.२) अथ यदास्य प्रजायां पशुषु शरीरे वारिष्टानि प्रादुर्भवन्ति। व्याधयो वा अनेकविधा अतिस्वप्नमस्वप्नमतिभोजनमभोजनमालस्यं व्रणमजीर्णनिद्राजागराणि इत्येवमादीनि। तान्येतानि सर्वाणि यमदेवत्यान्यद्भुतानि प्रायश्चित्तानि भवन्ति।(६.४.२) अथ यदास्य क्षेत्रगृहसंस्थेषु धान्येष्वीतयः प्रादुर्भवन्ति। ईतयो वानेकविधाः आखुपतङ्गपिपीलिकामध्वकभौमकशुकशरभकसौक्ष्मक इत्येवमादीनि। तान्येतानि सर्वाणि वरुणदेवत्यान्यद्भुतानि प्रायश्चित्तानि भवन्ति।(६.५.२) अथ यदास्य कनकरजतवरवस्त्रवज्रवैडूर्यमुक्तामणि वियोगो भवति। आरम्भा वा विपद्यन्ते। अथवा अन्यानि क्रूराणि मित्राणि वा विरज्यन्ते। अरिष्टानि वा वयांसि गृहमध्यासन्ते। वाल्मीकभौमानि वा जायन्ते। छत्राकं वोपजायते। मधुनि वा निलीयन्ते इत्येवमादीनि।

तान्येतानि सर्वाणि वैश्रवणदेवत्यान्यद्भुतानि प्रायश्चित्तानि भवन्ति।(६.६.२) अथ यदास्य पृथिवी तटति, स्फुटति, कूजति, कम्पति, ज्वलति, रुदति, धूमायति, अकस्मात्सलिलमुद्गिरति, प्लवन्न मज्जति, न निमग्नमुत्प्लवति, अकाले च पुष्पफलमभिनिर्वर्तत्यश्वतरीगर्भो जायते, यदा मज्जति हस्तिनी भूकम्पो जायते, प्रासादं भिनत्ति यत्र तत्र राजा विनश्यति, गौर्गृहमारोहेद् ग्राममहिषीत्येवमादीनि तान्येतानि सर्वाण्यग्निदेवत्यान्यद्भुतानि प्रायश्चित्तानि भवन्ति।(६.७.२) अथ यदास्य विवाता वाता वायन्ते, अभ्रेषु चापरूपाणि दृश्यन्ते, खर-करभ-मन्थ-कङ्क-कपोत-उलूक-काक-गृध्र-श्येन-भास-वायस-गोमायु-संस्थान्युपरि पांसुमांसपेश्यस्थिरुधिरवर्षाणि प्रवर्तन्ते, काकमिथुनानि दृश्यन्ते, रात्रौ मणिधनुं पश्येत्, शशका ग्रामं प्रविश्यन्ति, वृक्षाः स्रवन्ति रुधिराणि, आकाशे राजकुलं वसति इत्येवमादीनि। तान्येतानि सर्वाणि वायुदेवत्यान्यद्भुतानि प्रायश्चित्तानि भवन्ति।(६.८.२) अथ यदास्य तारावर्षाणि चोल्काः पतन्ति, निपतन्ति, धूमायन्ति, दिशो दह्यन्ति, केतवश्चोत्तिष्ठन्ति, अत्यर्थं हिमं निपतति, इत्येवमादीनि तान्येतानि सर्वाणि सोमदेवत्यान्यद्भुतानि प्रायश्चित्तानि भवन्ति।(६.९.२) अथ यदास्यायुक्तानि यानानि प्रवर्तन्ते, देवतायतनानि कम्पन्ते, दैवतप्रतिमा हसन्ति, रुदन्ति, गायन्ति, नृत्यन्ति, स्फुटन्ति, स्विद्यन्ति, उन्मिलन्ति, निमीलन्ति, प्रतिप्रयान्ति नद्यः कबन्धमादित्ये दृश्यन्ते, विजले च परिविष्यते, केतु-पताक-च्छत्र-वज्र-विषाणानि प्रज्वलन्ति, अश्वानां च वालधीष्वङ्गाराः क्षरन्ति, अहतानि चर्माणि कनिक्रन्त इत्येवमादीनि तान्येतानि सर्वाणि विष्णुदेवत्यान्यद्भुतानि प्रायश्चित्तानि भवन्ति।(६.१०.२) अथ यदास्य गवां मानुषमहिष्यजाश्वोष्ट्राः प्रसूयन्ते, हीनाङ्गान्यतिरिक्ताङ्गानि विकृतरूपाणि वा जायन्ते, असम्भवानि सम्भवन्ति, अचलानि चलन्ति इत्येवमादीनि। तान्येतानि सर्वाणि रुद्रदेवत्यान्यद्भुतानि प्रायश्चित्तानि भवन्ति।(६.११.२) अथ यदास्य मानुषाणामतिधृतिमरतिदुःखं वा पर्वताः स्फुटन्ति, निपतन्त्याकाशाद्, भूमिःकम्पते, महाद्रुमा उन्मूलन्ति, अश्मानः प्लवन्ति, तटाकानि प्रज्वलन्ति, चतुष्पादं पञ्चपादं वा भवन्ति इत्येवमादीनि। तान्येतानि सर्वाणि सूर्यदेवत्यान्यद्भुतानि प्रायश्चित्तानि भवन्ति।* (षड्विंशब्राह्मणम्.६.६.२)

⇒ **यदि कपोतः गृहं प्रविशेत्।**

आश्वलायनगृह्यसूत्रे, काठकगृह्यसूत्रे, मानवगृह्यसूत्रे च उक्तं यदि कपोतः गृहं प्रविशेत् गृहे पतेत् वा तर्हि अशुभसूचकं भवति। प्रायः कपोतः गृहे प्रवेशं न करोति इति सर्वेषां निरीक्षणं विद्यते अतः कपोतस्य गृहे प्रवेशः अशुभसूचकः। कपोतः गृहं प्रविष्टः इति कथं ज्ञायते। गृहे सक्तुपिष्ठे अथवा भस्मनि कपोतस्य पदचिन्हानि दृष्टानि तेन ज्ञायते। अतः तद्दोषनिवारणाय *देवाःकपोत* इति मन्त्रेण होमं कुर्यात्।

- कपोतश्चेदगारमुपहन्यादनुपतेद्वा देवाःकपोत इति प्रत्यृचं जुहुयाज्जपेद्वा। (आश्व.गृह्य.३.७.७)
- आयूतिके कपोते भयार्ते सक्तुषु भस्मनि वा पदं दृष्ट्वा देवः कपोत इत्यष्टर्चेन स्थालीपाकस्य जुहोति। (काठक.गृह्य.५६.१.)
- अयूथिके भयार्ते कपोते गृहान् प्रविष्टे तस्याग्नौ पदं दृश्येत दधनि सक्तुषु घृते वा देवाः कपोत इति प्रत्यृचं जपेज्जुहुयाद्वा।(मान.गृह्य.२.१७.१)

⇒ **यदि विविधाः अद्भुतप्रसङ्गाः भवेयुः।**

शाङ्खायनगृह्ये उक्तं यदि कपोतः अथवा उलूकः गृहे उपविशेत् तर्हि *देवाः कपोत* इति मन्त्रेण होमं कुर्यात्। यदि दुष्टम् अशुभसूचकं स्वप्नं दृष्टं, रात्रौ काकस्वरः अभवत्, एवं प्रकारेण अन्यान्याद्भुतकारणानि भवन्ति दुग्धे चरुं पक्त्वा रात्रिसूक्तेन होमं कुर्यात्। हुतशेषं चरुं खादित्वा उक्तमन्त्रैः शरीरस्य शुद्धिं कुर्यात्। यदि गृहे विद्यमानस्य शुष्कस्तम्भस्य पल्लवं जायेत चरुणा *अयाविष्ठा जनयन्* इति मन्त्रेण होमं कुर्यात्।

- कपोतोलूकाभ्यामुपवेशने। देवाः कपोत इति प्रत्यृचं जुहुयात्। दुस्वप्नदर्शने चारिष्टदर्शने च। निशायां काकशब्दक्रान्ते च। अन्येषु चाऽद्भुतेषु च। पयसा चरुं श्रपयित्वा। सरूपवत्साया गोः पयसि। नत्वेव तु कृष्णायाः। रात्रिसूक्तेन प्रत्यृचं जुहुशेषं। हुतशेषं महाव्याहृतिभिः प्राश्य। भद्रं कर्णेभिरित कर्णौ। शतमिन्नु शरदो अन्ति देवा इति आत्मानमभिमन्त्र्य। ब्राह्मणेभ्यःकिञ्चिद्दद्यात्। स्थूणारोहणे। स्थालीपाकं श्रपयित्वा

अयाविष्ठा जनयन् कर्वराणि पिशङ्गरूपो वयोधा इतिद्वाभ्यां चरुं जुहुयात्। (शाङ्खा.गृह्य.५.प्रायश्चित्तयः १-१३)

⇒ **यदि विविधाः अद्भुतप्रसङ्गाः भवेयुः।**

हिरण्यकेशीगृह्यसूत्रे भारद्वाजगृह्यसूत्रे च उक्तं यदि विविधाः अद्भुतप्रसङ्गाः भवन्ति तर्हि तद् निमित्तं होमपूर्वकं शान्तिं कुर्यात्। यथा कपोतः गृहं प्रविशेत्, मधुमक्षिकाः गृहं प्रविशेयुः अथवा मधुमक्षिकाः मधुकोषं गृहे निर्मापयेयुः, गौः एव गावः दुग्धं पिबेत्, गृहे विद्यमानस्य शुष्कस्तम्भस्य पल्लवं जायेत, गृहे वल्मीकम् उद्भवेत्, इत्यादिप्रकाराः अद्भुतप्रसङ्गाः यदि भवन्ति तर्हि, उक्तविधिना होमादिना शान्तिं कुर्यात्। अग्निं संस्थाप्य व्याहृतिपर्यन्तं हुत्वा *इमं मे वरुण*, *तत्वायामि*, *त्वं नो अग्ने*, *स त्वं नो अग्ने*, *त्वमग्ने अयासि*, *प्रजापते*, *यदस्य कर्मणोत्यरीरिचम्* एतैः मन्त्रैः हुत्वा पुण्याहं वाचयेत्।

- अथैतान्यद्भुतप्रायश्चित्तानि भवन्ति कुप्त्वा कपोत उपाविक्षन्मध्वगारौपाविक्षद्गौर्गामधैषीत्स्थूणा व्यरौक्षीद्वल्मीक उदैक्षीदित्येवंरूपाणि। स पूर्वाह्णे स्नातः प्रयतवस्त्रोऽहःक्षान्तो ब्राह्मणसम्भाषोऽन्तरागारेऽग्निमुपसमाधाय व्याहृतिपर्यन्तं कृत्वा जुहोतीमं मे वरुण तत्वायामि त्वं नो अग्ने स त्वं नो अग्ने त्वमग्ने अयासि प्रजापते यदस्य कर्मणोत्यरीरिचमिति चात्रैके जयाभ्यातानान्राष्ट्रभृत इत्युपजुह्वति यथापुरस्ताद्ब्राह्मणानन्नेन परिविष्य पुण्याहंस्वस्त्ययनमिति वाचयित्वा। (हिर.गृह्य.१.५.२७,२८)
- अथैतान्यद्भुतप्रायश्चित्तनि भवन्ति कुप्त्वां कपोत उपावेक्षीन्मध्वागार उपावेक्षीत्स्थूणा व्यरौक्षीद्वल्मीक उदेति सोऽहःक्षान्तः प्रयतवस्त्रो ब्राह्मणसम्भाषोऽस्तमित आदित्येऽन्तरागारेऽग्निमुपसमाधाय जयाभ्यातानान्राष्ट्रभृत इति हुत्वैत आहुति पूर्णा पश्चादिमं मे वरुण तत्वायामि त्वं नो अग्ने स त्वं नो अग्ने त्वमग्ने अयास्ययाश्चाग्नेऽस्यनभिशस्तीश्च यदस्य कर्मणोऽत्यरीरिचं प्रजापत इत्युत्तमां हुत्वा ब्राह्मणानन्नेन परिवेषयेद्। (भार.गृह्य.२.३२)

➢ अगारस्थूणाविरोहणे मधुन उपवेशने कुप्त्वा कपोतपददर्शनेऽमात्यानां शरीररेषणेन्येषु चाद्भुत्पातेष्वमावास्यायां निशायां यत्रापां न श्रुणुयात्तदग्नेरुपसमाधानाद्याज्यभागान्त उत्तरा आहुतिर्हुत्वा जयादि प्रतिपद्यते। (आप.गृह्य.२३.९)

⇒ **यदि विविधाः अद्भुतप्रसङ्गाः भवेयुः।**

अग्निवेश्यगृह्यसूत्रे बोधायनगृह्यसूत्रे च उक्तं यदि स्तम्भस्य पल्लवः जायेत, बकः वा कपोतः गृहं प्रविशेत् गृहे पतेत्, गौः एव गावः दुग्धं पिबेत्, गौः एव स्वस्य दुग्धं पिबेत्, वृषभः भूमौ खननं कुर्यात्, अग्निः नास्ति तादृशस्थानात् धूमः जायेत, अग्निः नास्ति तादृशस्थानात् ज्योतिः वा भवेत्, मधुकोषः वा जायेत, निर्यासं उपजायेत, छत्राकं उपजायेत, मण्डूकस्य श्वानस्य सर्पस्य वा प्रसूतिः दृश्येत, गृहस्थस्य वा पत्न्याः वा ज्वरः भवेत्। एवं विविधाः अद्भुतसूचकप्रसङ्गाः घटिताः भवन्ति तदा *वास्तोष्पते* इति द्वे, *वस्तोष्पते*, *शं नः, इन्द्राग्नी*, *कया नश्चित्र आ भुवत्*, *को अद्य युङ्क्ते*, *भवतं नः समनसौ* एतैः मन्त्रैः प्रायश्चित्तहोमं कुर्यात्।

➢ अथ यद्यकाले स्थूणा विरोहेत् बकः कपोतो वागारमध्येऽधिपतेद्, गौर्वा गां धयेत्, गौरात्मानं प्रत्यङ् धयेत्, अनड्वान्वा समुल्लिखेत्, अनग्नौ वा धूमो जायेत, अनग्नौ वा देप्येत, मधु वा जायेत, निर्यासं वोपजायेत, छत्राकं वोपजायेत, मण्डूको वा भूमौ दद्दशे श्वानः प्रसूते वा सर्पो गृहपतिं जायां वोपतपति, अन्येषु चाद्भुतोत्पातेषु। अथ देवयजनोल्लेखनप्रभृत्याग्निमुखात्कृत्वा जुहोति वास्तोष्पते इति द्वे, वस्तोष्पते, शं नः इन्द्राग्नी, कयानश्चित्र आ भुवत्, को अद्य युङ्क्ते, भवतं नः समनसौ, इति। स्विष्टकृत् प्रभृति सिद्धमाधेनुवरप्रदानात्। (अग्नि.गृह्य.२.५.२)

➢ अथ यद्यगारे स्थूणा विरोहेत्, कपोतो वाऽगारमध्येऽधिपतेत्, वायसो वा गृहं प्रविशेत्, गौर्वा गां धयेत्, गौरात्मानं प्रति धयेत्, अनडवान्वा दिवमुल्लिखेत्, अनग्नौ वा धूमो जायेत, अनग्नौ वा दीप्येत, मधु वा जायेत, वल्मीकं वोपजायेत, छत्राकं वोपजायेत, मण्डूको वाऽभ्रिणे वाशयेत्, श्वानप्रसूतो वा सर्पो वा गृहपति। जाया वोपतपद्विन्देतान्येषुऽद्भुतोत्पातेषु। (बोधा.गृह्य.३.६.१)

⇒ **यदि विविधाः अद्भुतप्रसङ्गाः भवेयुः।**

जैमिनिगृह्यसूत्रे उक्तं यदि स्तम्भस्य पल्लवः जायेत, बकः वा कपोतः गृहं प्रविशेत् गृहे पतेत्, गौः एव गावः दुग्धं पिबेत्, गौः एव स्वस्य दुग्धं पिबेत्, वृषभः भूमौ खननं कुर्यात्, मधुकोषः वा जायेत, वल्मीकं वा जायेत, मण्डूकः गृहे ध्वनिं कुर्यात्, श्वानः गृहे विचरणं कुर्यात्। एवं विविधाः अद्भुतसूचकप्रसङ्गाः घटिताः भवन्ति तदा *यत इन्द्र भयामहे*, *सदस्पतिमद्भुतम्*, *अधायामुतेसुमुदस्य*, *सनादग्ने*, *यद्वा उ विश्पतिः शितः*, *प्रत्यग्ने*, *यं रक्षन्ति* प्राजापत्ययर्चा पुरस्ताच्चोपरिष्टाच्च महाव्याहृतिः एतैः मन्त्रैः प्रायश्चित्तहोमं कुर्यात्। साममन्त्राणां गायनं च कुर्यात्।

➢ अथातोऽद्भुतशान्तिं व्याख्यास्यामोऽथ यद्यगारे स्थूणा विरोहेत् कपोतो वागारं गच्छेद्गौर्वा गां धयेदनड्वान्वा दिवमुल्लिखेदनग्नौ वा दीप्येत मधु वा जायेत वल्मीकं वोपजायेत मण्डूको वाम्भृणे वाश्येच्छ्वानो वा गृहे पर्यटेयुरित्येतानन्यांश्च यत इन्द्र भयामहे। सदस्पतिमद्भुतम्। अधायामुतेसुमुदस्य। सनादग्ने। यद्वा उ विश्पतिः शितः। प्रत्यग्ने। यं रक्षन्ति। प्राजापत्ययर्चा पुरस्ताच्चोपरिष्टाच्च महाव्याहृतिभिर्जुहोति एतान्नृक्सामानि गायेत्। (जैमि.गृह्य.२.७)

⇒ **यदि विविधाः अद्भुतप्रसङ्गाः भवेयुः।**

गोभिलगृह्यसूत्रे, पारस्करगृह्यसूत्रे, बोधायनगृह्यसूत्रे च उक्तं यदि यानस्य अक्षस्य भङ्गः भवेत्। अनपेक्षिते समये किमपि बन्धनं मुक्तं भवेत् यथा यानस्य रज्जोः। यानस्य विपरीतगत्या गमनं वा यानस्य परिवर्तनम् भवेत्। यस्य विवाहाग्नेः आनयनसमये एताः अन्यविधविविधाः आपदः समुत्पन्नाः तर्हि तमेवाग्निं संस्थाप्य व्याहृतिभिः होमं कुर्यात्।

➢ अक्षभङ्गे नद्धविमोक्षे यानविपर्यासेऽन्यासु चाऽऽपत्सु यमेवाग्निं हरन्ति तमेवोपसमाधाय व्याहृतिभिर्हुत्वाऽन्यद् द्रव्यमाहृत्य यऋते चिदभिश्रिष इत्याज्यशेषेणाभ्यञ्जेत्। (गोभि.गृह्य.२.४.३)

- राज्ञोऽक्षभेदे नद्धविमोक्षे यानविपर्यासेऽन्यस्यां वा व्यापत्तौ स्त्रियाश्चोद्वहने तमेवाग्निमुपधाय आज्यं संस्कृत्येहरतिरिति जुहोति नानामन्त्राभ्याम्। (पार.गृह्य.१.१०.१)
- अथ यद्यक्षभेदस्स्यात्तमेवाग्निमुपसमाधाय सम्परिस्तीर्याऽग्निमुखात्कृत्वा प्रधानाहुतीर्जुहोति - इह धृतिस्स्वाहेह विधृतिस्स्वाहेह रन्तिस्स्वाहेह रमतिस्स्वाहा इति। (बोधा.गृह्य.४.४.३)

⇒ **यदि विविधाः अद्भुतप्रसङ्गाः भवेयुः।**

मानवगृह्यसूत्रे उक्तं यदि दुःस्वप्नं पश्येत् भूःस्वाहा इत्यादिभिः व्याहृतिभिः तिलद्रव्येण होमं कुर्यात्। यदि अनर्थकारिणी शङ्का भवेत् भूःस्वाहा इत्यादिभिः व्याहृतिभिः तिलद्रव्येण होमं कृत्वा एकरात्रं, त्रिरात्रं, षड्रात्रं, द्वादशरात्रं वा तपः आचरेत्। यदि पर्वकाले मृत्तिकापात्रं भग्नं भवेत् *पार्थिवमसि* इति मन्त्रेण तत् भग्नं पात्रं जले विसर्जयेत्।

- यदि दुःस्वप्नं पश्येद्व्याहृतिभिस्तिलान्हुत्वा दिश उपतिष्ठेत। एवं यस्मिंश्चोत्पन्नेऽनर्थान् शङ्केत। व्याहृतिभिस्तिलान् हुत्वा तपः प्रतिपद्येत द्वादशरात्रं षड्रात्रं त्रिरात्रमेकरात्रं वा। यदि पर्वसु मार्तिकं भिद्येत पार्थिवमसि पृथिवीं दृंहस्व योनिं गच्छ स्वाहेत्यप्सु प्रहरेत्। (मान.गृह्य.२.१५.१,३,५)

मानवगृह्यसूत्रे उक्तं यदि देवप्रतिमा दग्धा भवेत्, नष्टा भवेत्, पतिता भवेत्, भग्ना भवेत्, हसिता भवेत्, चलिता भवेत्, कार्याय स्थापिता स्थाली भग्ना भवेत्, नष्टा वा भवेत्, द्वारस्तम्भस्य पल्लवः जायेत, गौः एव गावः दुग्धं पिबेत्, स्त्री स्त्रियं ताडयेत्, कर्तुः संसर्गः भवेत्, कृषिक्षेत्रे हलस्य संसर्गः भवेत्, मुसलं पतेत् अथवा भग्नं भवेत् स्वस्तिन इन्द्रो इत्यादिभिः दशभिः होमं कुर्यात्।

- यद्यर्चा दह्येद्वा नश्येद्वा प्रपतेद्वा प्रभजेद्वा प्रहसेद्वा प्रचलेद्वा स्थाल्या वा स्थालीमासिच्य दक्षिणोत्तरा वा स्थाली भिद्येत्तोत्तरा वोपनाशे नियम्य द्वारवंशो वा स्फुटेत्, गौर्वा गां

धयेत्, स्त्री वा स्त्रियमाहन्यात्, कर्त्तसंसर्गे, हलसंसर्गे, मुसलप्रपतने, मुसलं वाऽवशीर्येतान्यस्मिंश्चाद्भुत एताभिर्जुहुयात् स्वस्ति न इन्द्रो इति दशाहुतयः। जयप्रभृति समानम्। (मान.गृह्य.२.१५.६)

मानवगृह्यसूत्रे उक्तं यदि सर्पात् भयं भवेत् विहितं होमं कुर्यात्, सर्पबलिं च कुर्यात्।

- सर्पेभ्यो बिभ्यत् श्रावण्यां तूष्णीं भौममेककपालं श्रपयित्वाऽक्षतसक्तून् पिष्ट्वा स्वकृत इरिणे दर्भानास्तीयाच्युताय ध्रुवाय भौमाय स्वाहेति जुहोति। समीची नामासीति पर्यायैरुपतिष्ठते प्रतिदिशं द्वाभ्यां मध्ये। अक्षतसक्तूनां सर्पबलिं हरति ईशानायेत्येके (मान.गृह्य.२.१६.१-३)

⇒ **यदि विविधाः अद्भुतप्रसङ्गाः भवेयुः।**

आश्वलायनगृह्यसूत्रे उक्तं अयोग्यं स्वप्नं यदि पश्यति अद्यानोदेवसवितः इत्यादिभिः सूर्योपासनां कुर्यात्। क्षुत् जृम्भादि अद्भुतसूचकानि ज्ञात्वा सुचक्षा अहमक्षीभ्याम् इति जपेत्।

- स्वप्नममनोज्ञं दृष्ट्वाऽद्या नो देव सवितरिति द्वाभ्यां यच्च गोषु दुष्वप्न्यमिति पञ्चभिरादित्यमुपतिष्ठेत। यो मे राजन्युज्यो वा सखा वेति वा। क्षुत्वा जृभित्वाऽमनोज्ञं दृष्ट्वा पापकं गन्धमाघ्रायाक्षिस्पन्दने कर्णध्वनने च सुचक्षा अहमक्षीभ्यां भूयासं सुवर्चा मुखेन सुश्रुत्कर्णाभ्यां मयि दक्षक्रतू इति जपेत्। (आश्व.गृह्य.३.६.७,८)

⇒ **यदि विविधाः अद्भुतप्रसङ्गाः भवेयुः।**

मानवगृह्यसूत्रे उक्तं यदि विविधानि अशुभसूचकानि कारणानि भवन्ति तर्हि विनायकशान्तिं कुर्यात्। विनायकस्य चत्वारि विशेषनामानि सन्ति शालः, कटङ्कटः, कूष्माण्डः, राजपुत्रश्च। विनायकः विघ्नान् निवारयति, अशुभं दूरीकरोति। अतः विघ्नशमनार्थं पूजादिकं कृत्वा विनायकशान्तिं कुर्यात्। जागृतावस्थायां विभिन्नाः

अशुभसूचकाः प्रसङ्गाः अभवन् अथवा स्वप्ने विभिन्नाः अशुभसूचकाः प्रसङ्गाः दृष्टाः तदा शान्तिं कुर्यात्। यथा मृत्तिकायाः पिण्डं करोति, तृणानां छेदनं करोति, शरीरस्य अङ्गेषु लिखति, अपस्वप्नं पश्यति, मुण्डान् पश्यति, जटाधारिणं पश्यति, काषायवस्त्रधारिणं पश्यति, उष्ट्रान् पश्यति, वराहान् पश्यति, गर्दभान् पश्यति, दिवाकीर्त्यादीन्(घुबड इति भाषायाम्) पश्यति, एतान् चलान् प्रयातान् पश्यति, आकाशात् प्रवासं करोति, शयानः चलति, पृष्ठतः कश्चित् चलति इति भावयति, राजपुत्रः राज्यं न प्राप्नोति, विवाहविषये इच्छुका कन्या योग्यं वरं न प्राप्नोति, योग्याः स्त्रियः अपत्यान् न प्राप्नुवन्ति, आचारशीलानां स्त्रीणाम् अपत्यानि न जीवन्ति, योग्यः अध्यापकः उच्चम् अध्यापकपदं न प्राप्नोति, छात्राणाम् अध्ययने विघ्नानि भवन्ति, वणिजां व्यापारे विघ्नानि भवन्ति, कृषिकराणां कृषिः न्यूना भवति, इत्यादयः। तदा विनायकशान्तिं कृत्वा विघ्नशमनं कुर्यात्। एतां शान्तिं कृत्वा अग्रिम जीवने कदाचित् भविष्येऽपि विभिन्नाः अशुभसूचकाः प्रसङ्गाः न भवन्तु इति धिया शान्तिं कुर्यात्। अत्र विस्तरेण शान्तिविधिः उक्तः अस्ति परं अत्र विस्तारभयात् केवलं तस्य विधेः करणस्य कारणानि स्वीकृतानि।

➢ अथातो विनायकान्व्याख्यास्यामः।

शालकटङ्कटश्च कूष्माण्डराजपुत्रश्चोस्मितश्चदेवयजनश्चेति। एतैरधिगतानामिमानि रूपाणि भवन्ति। लोष्टं मृद्नाति। तृणानि छिनत्ति। अङ्गेषु लेखान्लिखति। अपस्वप्नं पश्यति। मुण्डान् पश्यति। जटिलान्पश्यति। काषायवाससः पश्यति। उष्ट्रान्सूकरान्गर्दभान्दिवाकीर्त्यादीनन्यांश्चाप्रयतान्स्वप्नान्पश्यति। अन्तरिक्षं क्रामति। अधानं व्रजन्मन्यते पृष्ठतो मे कश्चिदनुव्रजति। एतैः खलु विनायकैराविष्टा राजपुत्रा लक्षणवतो राज्यं न लभते। कन्या पतिकामा लक्षणवत्यो भर्तृन्न लभते। स्त्रियः प्रजाकामा लक्षणवत्यः प्रजां न लभते। स्त्रीणामाचारवतीनामपत्यानि म्रियन्ते। श्रोत्रिय अध्यापक आचार्यत्वं न प्राप्नोति। अध्येतृणामध्ययने महाविघ्नानि भवन्ति। वणिजां वणिक्पथो विनश्यति। कृषिकराणां कृषिरल्पफला भवति। तेषां प्रायश्चित्तम्। (मान.गृह्य.२.१४.१-१२)

⇒ **यदि विविधाः अद्भुतप्रसङ्गाः भवेयुः।**

गोभिलगृह्यसूत्रे उक्तं यदि अद्भुतप्रसङ्गाः भवन्ति तर्हि प्रायश्चित्तं कुर्यात्। गृहस्य आधारभूतस्य मुख्यभूतस्य वंशस्य (बांबू इति भाषायाम्) भङ्गः यदि भवेत्, आधारभूतस्य स्तम्भस्य भङ्गः भवेत्, जलस्य मृत्तिकयानिर्मितस्य भाण्डस्य भङ्गः भवेत् व्याहृतिमन्त्रेण होमं कुर्यात्। दुःस्वप्नं यदि पश्येत् अद्यनोदेवसवितः इति मन्त्रं जपेत्। अज्ञानात् चितिस्पर्शः यूपस्पर्शः वा भवेत्, कर्णेविकृतध्वनिः आक्रोशः भवेत्, नेत्रस्य स्पदनं भवेत्,

➢ अद्भुतेकुलपत्ययोःप्रायश्चित्तम्। वंशमध्यमयोर्मणिके वा भिन्ने व्याहृतिभिर्जुहुयात्। दुःस्वप्नेष्वद्यानोदेवसवितरित्येतामृचं जपेत्। अथापरम् चित्ययूपोस्पर्शनकर्णक्रोशाक्षिवेपनेषु सूर्याभ्युदितः सूर्याभिनिम्लुप्तः इन्द्रियैश्च पापस्पर्शे पुनर्मामैत्विन्द्रियमित्येताभ्यामाज्याहुती जुहुयात्। आज्यलिप्ते वा समिधौ जपेद्वा लघुषु। (गोभि.गृह्य.३.३.३०-३५)

⇒ **यदि ग्रामे अद्भुताः अशुभसूचकाः घटनाः घटिताः।**

यदि गृहे अशुभसूचकाः घटनाः घटिताः भवन्ति तर्हि शान्तिं कुर्यात् तथैव ग्रामे अशुभसूचकाः घटनाः घटिताः भवन्ति तदा शान्तिं कुर्यात् इति बोधायनगृह्यशेषसूत्रे उक्तम्। ग्रामे अग्निना दहनं भवेत्। व्याघ्रेण अथवा शृगालेण ग्रामे भयम् उत्पादितम्। अथवा ग्रामः चण्डालेन स्वायत्तीकृतः। ग्रामे शुष्कस्तम्भे पल्लवाः उद्भूताः। अकस्मात् मधुकोषः, वल्मीकः, तडागः उत्पन्नः। देवस्य अवयवेषु स्वेदः उत्पन्नः। देवस्य अवयवेषु कम्पनं उत्पन्नम्। बहूनां नागरिकाणां युगपत् ज्वरः उद्भूतः। बहूनां मरणम् अभवत्। चोरैः ग्रामे चौर्यं कृतम्। रात्रौ तडागस्य अथवा सेतोः भङ्गः अभवत् तस्मात् ग्रामे जलं प्रसृतम्। ग्रामे विद्युत्पतनम् अथवा अग्निपतनम् अभवत्। बहुकालं दीर्घकालं ग्रामः शून्यः नाम कस्यापि निवासः ग्रामे नासीत्। तादृशे ग्रामे पुनः प्रवेशः कर्तव्यः। एवं विविधानि कारणानि यानि अद्भुतानि इति परिगणितानि तादृशप्रसङ्गे शान्तिं कुर्यात्।

- ग्रामस्योत्पातशान्तिं व्याख्यास्यामः - अग्निदाहे व्याघ्रादिभिरभिभूते शृगालपीडने ग्रामादन्तश्चण्डालाध्यवसिते ग्रामस्य स्थूणावरोहणे मधुन उपवेशने वल्मीकपुष्करोत्पन्ने देवगात्रस्वेदकम्पने ज्वराभिभूते बहुब्राह्मणमरणे ग्राममध्ये श्मशाने वा दस्युभिश्चापि पीडिते रात्रौ तटाकसेतुभङ्गे जले विवर्णे वा स्वान्तस्थेऽशनिपाते चिरकालशून्यग्रामप्रवेशे तेष्वन्येषु चोत्पातेषु शान्तिं कुर्यात्। (बोधा.गृह्यशेष.४.२०.१)(हिर.गृह्यशेष.१.६.२२)

⇒ **यदि अपस्मारः भवेत्।**

मनुष्यजीवनं यथायोग्यं सरलं व्याधिरहितं भवेदिति सर्वेषाम् अपेक्षा भवति भारद्वाजगृह्यसूत्रे तथा च हिरण्यकेशिगृह्यसूत्रे उक्तं यदि अकस्मात् अपस्मारः नाम विस्मरणरोगः अथवा शरीरस्य विकलता भवेत् तर्हि औषधेन सह धार्मिकविधिना शान्तिं कुर्यात्। सूत्रे विस्तरेण शान्तिविधिः उक्तः अस्ति। अत्र केवलम् आरम्भसूत्रं स्वीकृतमस्ति।

- श्वग्रहप्रायश्चित्तं......। (भार.गृह्य.२.७)
- अथातः श्वग्रहप्रायश्चित्तम्।......(हिर.गृह्य.२.२.१)

## ६.४) यज्ञीयप्रायश्चित्तानि

सर्वेषां संस्काराणां पूर्णता यज्ञेनैव भवति। यज्ञेनैव नाम त्यागेनैव जीवनस्य सार्थकता भवति। यज्ञाधिष्ठिता एव भारतीया संस्कृतिः। अतः यज्ञः योग्यरीत्या समाप्तः भवतु। तत्र यदि कश्चन दोषः भवति तर्हि प्रायश्चित्तं कृत्वा यज्ञे जातः दोषः निराकृतः भवतु। तेन यज्ञफलं पूर्णम् अच्छिद्रम् अनवच्छिन्नं भवेत्। अतः तत्तत् संस्कारानुसारं तत्तत् देवताकः यज्ञः यदा पूर्णः भवति तदा यज्ञीयदोषाणां निवारणार्थं प्रायश्चित्ताहुतीनां हवनं कर्तव्यम्।

⇒ **यदि यज्ञकाले विविधानि कारणानि भवन्ति।**

अग्निवेश्यगृह्यसूत्रे उक्तं यदि संस्कारकाले यज्ञकाले विविधानि निमित्तानि भवन्ति। यैः शरीरम् अशुद्धम् अपवित्रं भवेत् तर्हि तत्कालं प्रायश्चित्तं कुर्यात्। यदि क्षुत् अथवा निष्ठीवनं कुर्यात् तर्हि सहस्रशीर्षा पुरूषः इति जपं कुर्यात्, जलस्पर्शं कृत्वा अङ्गुष्ठानामिकाभ्यां दक्षिणकर्णस्य स्पर्शं कुर्यात्। यदि मूत्रं कुर्यात् तर्हि पादप्रक्षालनं कृत्वा ओङ्कारं कृत्वा पुरूष एवेदं सर्वम् इति जपं कुर्यात्। यदि मूत्रं कुर्यात् तर्हि त्रिपादूर्ध्व उदैत्पुरूष इति जपं कुर्यात्। यदि अशुद्धस्य स्पर्शः भवेत् तर्हि जलाशये स्नात्वा आचमनं कृत्वा तस्माद्यज्ञात्सर्वहुत इति जपं कुर्यात्। यदि चण्डालस्य स्पर्शः भवेत् तर्हि आचमनं कृत्वा सूर्यं दृष्ट्वा ब्राह्मणोस्यमुखमासीत् इति जपं कुर्यात्।

➢ अथातो नैमित्तिकानि प्रायश्चित्तानि व्याख्यास्यामः। अथ कर्मान्तरे यदि क्षुधेद्वा निष्ठीवेद्वा सहस्रशीर्षा पुरुष इति जपति। अप उपस्पृश्याङ्गुष्ठानामिकाभ्यां दक्षिणकर्णमुपस्पृशेत्। यदि मूत्रं कुर्यात् पादौ प्रक्षाल्याचम्य ओंकारं मनसा ध्यात्वा शुचिर्भूत्वा पुरुष एवेदं सर्वम् इति द्वे ऋचौ जपेत्। यदि मेहेत् पूर्ववच्छौचं कृत्वा त्रिपादूर्ध्व उदैत्पुरुष इति तिस्रऋचौ जपेत्। यद्यशुचिस्पर्शे शुद्ध जलाशये स्नात्वाप आचम्य तस्माद्यज्ञात्सर्वहुत इति चतस्र ऋचो जपेत्। यदि चण्डालपतितादिदर्शे अप आचम्य आदित्यमभिवीक्ष्य ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्य कृतः उरु तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत चन्द्रमा मनसो जातः चक्षो सूर्यो अजायत इति तिस्र ऋचो जपेत्। (अग्नि.गृह्य.२.७.८)

⇒ **यदि विविधाः यज्ञाः न नाभवन्।**

भारद्वाजगृह्यसूत्रे, बोधायनगृह्यसूत्रे, अग्निवेश्यगृह्यसूत्रे, वैखानसगृह्यसूत्रे च उक्तं यदि विविधप्रकारकाः यज्ञाः नाम प्रतिदिनम् अध्ययनं, होमः, पिण्डदानं, बलिहरणम् अन्नदानम् एतेषु एकोऽपि न कृतः तर्हि मनस्वत्याहुतीः दत्वा प्रायश्चित्तं कुर्यात्। दिनत्रयं एते यज्ञाः नाभवन् तदा तन्तुमतीः हुत्वा प्रायश्चित्तं कुर्यात्। इतोऽपि आधिककालं यदि यज्ञाः नाभवन् तर्हि वरुणसम्बन्धिनां मन्त्राणां जपं कुर्यात्। यदि पत्नी नास्ति नाम अविवाहितः अस्ति तेन गृहे बलिहरणं तथा च होमस्य पूर्णतानिमित्तं कूष्माण्डमन्त्रैः होमं कुर्यात्। यदि एकं दिनं वैश्वदेवहोमः न कृतः प्रायश्चित्तं हुत्वा वैश्वदेवं कुर्यात्।

- यदधीते सब्रह्मयज्ञो यज्जुहोति स देवयज्ञो यत्पितृभ्यः स्वधा करोति स पितृयज्ञो यद्भूतेभ्यो बलिं हरति स भूतयज्ञो यदतिथिभ्योऽन्नं ददाति स मनुष्ययज्ञ इत्येते वै पञ्च महायज्ञाः सतति सुप्रयुक्ता नयन्ति परमां गतिम् एतेभ्यो यस्य पञ्चभ्यो यज्ञ एकोऽपि हीयते मनस्वत्याहुतिस्तस्य प्रायश्चित्तं विधीयते। द्व्यहं त्र्यहं वाऽपि प्रमादादकृतेषु तिस्रस्तन्तुमतीर्हुत्वा चतस्रो वारुणीर्जपेत्। दशाहं द्वादशाहं वा विच्छिन्नेषु स्वस्त्ययनेषु तु सर्वश्चतस्रोऽभ्यावर्तिनीर्हुत्वा कार्यस्तान्तुमतश्चरुः। यस्य स्त्री वाऽनुपेतो वा गृहेष्वेतान् बलीन् हरेत्। कूश्माण्ड्यस्तत्र होतव्यो हुत्वा यज्ञसमृद्धये। (भार.गृह्य.३.१५) (बोधा.गृह्य.२.९.६-११)
- वैश्वदेवं हुत्वा आगोदोहनमात्रक्षणमाकाङ्क्षेदतिथीन्। श्रोत्रियो वेदवती यतिर्धर्मनैष्ठिकः समानवृत्तिः। मनस्वत्याहुतिस्तस्य प्रायश्चित्तं विधीयते। द्व्यहं त्र्यहं वा विच्छिन्ने प्रमादादकृतेषु च। तिस्रस्तन्तुमतीर्हुत्वा चतस्रो वारुणीर्यजेत्। दशाहं द्वादशाहं वा विच्छिन्नेषु तु सर्वशः। चतस्रोऽभ्यावर्तिनीर्हुत्वा कार्यस्तान्तुमतश्चरुः। यस्य स्त्री वाऽनुपेतो वा गृहेष्वेतान् बलीन् हरेत्। कूश्माण्ड्यस्तत्र होतव्यो हुत्वा यज्ञसमृद्धये। (अग्नि.गृह्य.२.६.५)
- एकाहे वैश्वदेवहोमे हीने मनो ज्योतिरिति प्रायश्चित्तं हुत्वा वैश्वदेवं जुहुयात्। (वैखा.गृह्य.६.१७.९)

⇒ **यदि विहितः होमः न कृतः।**

गोभिलगृह्यसूत्रे तथा खादिरगृह्यसूत्रे उक्तं विविधप्रकारेण होमस्य पर्यायाः दत्ताः सन्ति। यथा हविर्द्रव्याणाम् अभावे अग्नेः अभावे जलेन जले एव होमं कुर्यात्। तथापि होमः न कृतः तर्हि प्रायश्चित्तं कुर्यात्।

➢ अहुतस्य प्रायश्चित्तं भवति। (गोभि.गृह्य.१.९.१७)

➢ प्रायश्चित्तमहुतस्य।(खादि.गृह्य.२.२.१३,१४)

⇒ **यदि यज्ञे जातं न्यूनं समाप्तं भवितुमिच्छति।**

अग्निवेश्यगृह्यसूत्रे, आश्वलायनगृह्यसूत्रे, वाराहगृह्यसूत्रे, बोधायनगृह्यशेषसूत्रे च उक्तं यदि सम्पन्ने यज्ञे यत्किञ्चित् न्यूनं जातं स्यात् तर्हि निश्चितस्य यज्ञस्य नाम अन्वाधानोक्त हवनस्य समाप्तिनन्तरं स्विष्टकृताहुतिः भवति। तेन यज्ञः स्विष्टकृतः (सु इष्टकृतः) सम्पूर्णः भवतु । इति भावनया स्विष्टकृताहुतिः भवति। सर्वेषां हविर्द्रव्याणाम् अवशिष्टभागेन स्विष्टकृताहुतिः भवति।(शेषेण स्विष्टकृतमिति)

➢ यदस्य कर्मणोऽत्यरीरिचं यद्वा न्यूनमिहाकरम् । अग्निष्टत्स्विष्टकृद्विद्वान्त्सर्वं स्विष्टं सुहुतं करोतु मे। अग्नये स्विष्टकृते सुहुतहुते सर्वप्रायश्चित्ताहुतीनां कामानां समर्धयित्रे सर्वान्नः कामान्त्समर्धय स्वाहा।(आश्व.गृह्य.१.१०.२२)

➢ यदस्य कर्मणोऽत्यरीरिचं यद्वा न्यूनमिहाकरम्। अग्निष्टत् स्विष्टकृद्विद्वान् सर्वं स्विष्टं सुहुतं करोतु मे। अग्नये स्विष्टकृते सुहुतहुते सर्वहुते सर्वप्रायश्चित्ताहुतीनां कामानां समर्धयित्रे स्वाहा। (अग्नि.गृह्य.१.१.२, १.१.४, ३.२.२)(हिर.गृह्य.१.१.४९)

➢ अथ जयानभ्यातानान् राष्ट्रभृतोऽमात्यहोमांश्च हुत्वाऽथ चतुर्गृहीतेन स्रुवेण वा प्राजापत्यं हुत्वा इध्मप्रव्रश्चनान्यभ्याधाय प्रायश्चित्तानि सौविष्टकृतं च हुत्वा स्रुवेण परिधीननक्ति। (बोधा.गृह्यशेष.५.१.२६)

➢ स्विष्टकृतं हुत्वा प्रायश्चित्ताहुतीश्च समिधमादाय पर्युक्षति। (वारा.गृह्य.२.१०)

➢ अग्नये स्विष्टकृते स्वाहेत्युत्तरपूर्वार्द्धेऽवयुतं हुत्वा सर्वप्रायश्चित्तीयान् होमाञ्जुहोति। (कौशि.गृह्य.५.१२)

⇒ **यदि सर्वविधयज्ञानां पूर्णता भवतु।**

भारद्वाजगृह्यसूत्रे, अग्निवेश्यगृह्यसूत्रे, जैमिनीगृह्यसूत्रे, गोभिलगृह्यसूत्रे च उक्तं यदि सर्वविधप्रकारणां यज्ञानां पूर्णता भवतु इति अपेक्षा भवति तर्हि प्रायश्चित्तेषु सर्वप्रायश्चित्तं नाम अग्नये, वायवे, सूर्याय, प्रजापतये च आज्याहुतयः प्रदातव्याः। अत्र विविधेषु गृह्यसूत्रेषु मन्त्रा वा भिन्नाः भवेयुः परं देवतास्तु समानाः एव।

- अग्ने प्रायश्चित्तिरसि त्वं देवानां प्रायश्चित्तिरसि। यास्या पतिघ्नी तनूस्तामस्या अप जहि। वायो प्रायश्चित्तिरसि त्वं देवानां प्रायश्चित्तिरसि। यास्या अपुत्रिया तनूस्तामस्या अप जहि। सूर्य प्रायश्चित्तिरसि त्वं देवानां प्रायश्चित्तिरसि। यास्या अपसव्यस्या तनूस्तामस्या अप जहि। (शाङ्खा.गृह्य.१.३)
- महाव्याहृतिसर्वप्रायश्चित्तप्राजापत्यान्तरमेतदावापस्थानम्। (शाङ्खा.गृह्य.१.१२)
- भूःस्वाहेति प्रायश्चित्ताहुतीश्च। (वारा.गृह्य.१.२९)
- अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकामः प्रपद्ये। यास्यां पतिघ्नी तनूः प्रजाघ्नी पशुघ्नी लक्ष्मीघ्नी जारघ्नीमस्यै तां कृणोमि स्वाहा। वायो प्रायश्चित्ते...कृणोमि स्वाहा। आदित्य प्रायश्चित्ते...कृणोमि स्वाहा। प्रजापते प्रायश्चित्ते.....कृणोमि स्वाहा। (बोधा.गृह्य.१.६.१२-१५)
- अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि यास्यां भृशा तनूस्तामस्या नाशय स्वाहा। वायो प्रायश्चित्ते। सूर्य प्रायश्चित्ते। चन्द्र प्रायश्चित्ते। विष्णो प्रायश्चित्ते। विष्णो प्रायश्चित्ते। चन्द्र प्रायश्चित्ते। सूर्य प्रायश्चित्ते। वायो प्रायश्चित्ते। अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि यास्यां भृशा तनूस्तामस्या नाशय स्वाहा। (काठक.गृह्य.२८.४.)
- एता आहुती जुहोति अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकामः प्रपद्ये। यास्यां पतिघ्नी तनूः प्रजाघ्नी पशुघ्नी लक्ष्मीघ्नी जारघ्नीमस्यै तां कृणोमि स्वाहा। वायो प्रायश्चित्त आदित्य प्रायश्चित्ते प्रजापते प्रायश्चित्ते त्वं देवानां

प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकामः प्रपद्ये। यास्यै निन्दिता तनूस्तामितो नाशयामसि स्वाहा इति। (भार.गृह्य.१.१९)

- अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पतिघ्नी तनूस्तामितो नाशयामसि स्वाहा। वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पशुघ्नी तनूस्तामितो नाशयामसि स्वाहा। आदित्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पुत्रघ्नी तनूस्तामितो नाशयामसि स्वाहा। सर्व प्रायश्चित्ते त्वं प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पतिघ्नी पुत्रघ्नी पशुघ्नी निन्दिता तनूस्तामितो नाशयामसि स्वाहा। (अग्नि.गृह्य.१.१.५)
- अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै प्रजाघ्नी तनूस्तामस्या अपजहि स्वाहा। वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पशुघ्नी तनूस्तामस्या अपजहि स्वाहा। सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पतिघ्नी तनूस्तामस्या अपजहि स्वाहा। चन्द्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै गृहघ्नी तनूस्तामस्या अपजहि स्वाहा। अग्ने वायो सूर्य चन्द्र प्रायश्चित्तयो यूयं देवानां प्रायश्चित्तय स्थ ब्राह्मणो वो नाथकाम उपधावामि यास्यै यशोघ्नी तनूस्तामस्या अपहत स्वाहेति। (जैमि.गृह्य.१.२२)
- अग्निमुपसमाधाय प्रायश्चित्ताज्याहुतीर्जुहोति अग्ने प्रायश्चित्त इति चतुः। (गोभि.गृह्य.२.५.२)

⇒ **यदि यज्ञस्य सर्वप्रायश्चित्तं इच्छति।**

श्रौतयागस्य अन्ते या इष्टिः भवति, यत् स्नानं भवति तत् अवभृत इति नाम्ना उच्यते। तथैव गृह्ययज्ञतन्त्रे यज्ञस्य आरम्भे यत् प्रणीतापात्रं स्थापितं भवति तत् पात्रम् आज्यपात्रस्य स्थापनाय प्रसारिते बर्हिषि स्थापनेन अवभृतस्नानेव सर्वप्रायश्चित्तेव

भवति। अतः यथा अवभृतेन सर्वप्रायश्चित्तानि पूर्णानि भवन्ति यज्ञफलं च पूर्णं भवति तथैव बर्हिषि पूर्णपात्रस्य स्थापनेन यज्ञफलं पूर्णं भवति।

➢ बर्हिषि पूर्णपात्रं निनयेत्। एषोऽवभृतः। (आश्व.गृह्य.१.१०.२३,२४) (वारा.गृह्य.१.३४,३५)

⇒ **यदि यज्ञपात्राणि नष्टानि भवेयुः।**

अग्निवेश्यगृह्यसूत्रे उक्तं यदि काष्ठस्य पात्राणि शुनकेन स्पृष्टानि अग्नौ क्षिपेत्। यदि मृण्मयानि पात्राणि शुनकेन स्पृष्टानि जले क्षिपेत्। लोहमयानि भस्मना मार्जयित्वा शुद्धानि भवन्ति। काष्ठमयानां तथा च मृण्मयानां स्थाने अन्यानि स्वीकृत्य मन्त्रौ पठित्वा होमं च कुर्यात्।

➢ यदि पात्राणि शुनाद्यवलीढे दारुमयान्यग्नौ प्रक्षिपेत्। मृण्मयानि चाप्सु प्रक्षिपेत्। लोहमयानि भस्मना शुध्यन्ति। अन्यानि नवानि पात्राणि संगृह्य विष्णो त्वन्नो अन्तमः, विष्णोर्नुकं वीर्याणि प्रवोचम् इति द्वे ऋचौ जपेत्। यन्म आत्मनो मिन्दाभूत्, पुनरग्निश्चक्षुरदात्, इमं मे वरुण, तत्वायामि, त्वन्नो अग्ने, स त्वन्नो अग्ने इति षडाहुतीर्जुहुयात्।(अग्नि.गृह्य.२.७.८)

⇒ **यदि यज्ञसाधनानि नष्टानि भग्नानि ज्वलितानि भवेयुः।**

शाङ्खायनगृह्यसूत्रे उक्तं यज्ञाय उपयुक्तानि प्रणीता, चरुस्थाली, आज्यस्थाली इत्यादीनि तथा मृण्मयानि अन्यानि पात्राणि यदि भग्नानि भवेयुः तर्हि सर्वप्रायश्चित्तं हुत्वा य ऋते चित् इति मन्त्रेण अन्यानि पात्राणि स्वीकृत्य अनुमन्त्रणं कुर्यात्। ऐतरेयब्राह्मणे अपि यज्ञपात्राणि यदि भग्नानि भवन्ति तर्हि प्रायश्चित्तम् उक्तमस्ति। *तदाहुरथ यदि स्रुग्भिद्येत का तत्र प्रायश्चिरित्यन्यां स्रुचमाहृत्य जुहुयात् सा तत्र प्रायश्चित्तिः।*(३२.४)

➢ यदि प्रणीताचरुराज्यस्थाल्यन्यदपि मृण्मयं भिन्नं स्रवेत्। सर्वप्रायश्चित्ताहुतीर्हुत्वा य ऋते चिदिति तृचेन भिन्नमनुमन्त्रयते। (शाङ्खा.गृह्य.१.३-४)

⇒ **यदि अरणिः अशुद्धा भवेत्।**

अरणिः नाम अग्निनिर्माणाय उपयुक्तं साधनम्। अग्निवेश्यगृह्ये उक्तं यदि अरणि अशुद्धा भवेत् अन्याम् तादृशीम् आनीय पुरुषसूक्तेन अभिमन्त्र्य अग्नौ आज्यहोमं च कुर्यात्।

➢ यद्यरण्यशुचिर्भवेद् अन्यामाहृत्यैव चतुर्गृहीतं गृहीत्वा पुरुषसूक्तेन मनसानुद्रुत्य जुहोति।(अग्नि.गृह्य.२.७.८)

⇒ **यदि यज्ञपात्राणां हानिः भवेत्।**

शाङ्खायनगृह्यसूत्रे उक्तं यदि शान्तिपात्राणां हानिः भवेत् सुवर्णमयेन हस्तेन दर्भमयेन वा पात्राणां प्रोक्षणं कुर्यात्। होमसमाप्तितः पूर्वं दर्भपवित्रं नाम जलस्य प्रोक्षणाय निश्चितदर्भद्वयं नष्टं भवेत् सर्वप्रायश्चित्तं हुत्वा अस्वग्न इति मन्त्रेण पुनः निर्मितं कुर्यात्।

➢ शान्तिपात्रोपघाते प्रोक्षणं प्रायश्चितिः। प्रोक्षणं तु हिरण्यवता पाणिना दर्भपिञ्जूलवता वा। यद्यसमाप्ते होमे पवित्रे नश्येते। सर्वप्रायश्चित्तं हुत्वा अस्वप्न इति पुनरुत्पादयेत्। (शाङ्खा.गृह्य.१.५-६)

⇒ **यदि प्रणीतापात्रस्य हानिः भवेत्।**

बोधायनगृह्यसूत्रे उक्तं यदि प्रणीतापात्रं भग्नं भवेत् तत् पात्रम् अभिमन्त्रयते अभिन्नो जीरदार्यत इति मन्त्रेण। यदि प्रणीतापात्रं विपरीतं भवेत् पात्रस्य अभिमन्त्रणं कुर्यात् अक्षितोऽस्य क्षित्यै इति मन्त्रेण।

➢ अथ यदि प्रणीतापात्रं भिद्येत तदभिमन्त्रयते - अभिन्नो घर्मो जीरदानुर्यत आत्तस्तदगन् पुनः इति। अथान्यदाहरति -घर्मो देवानप्येतु इति पूरयित्वा व्याहृतिभिरुपतिष्ठते। (बोधा.गृह्य.४.१.५,६)

➢ अथ यदि प्रणीताः प्रणीतमानाः प्रणीता वा परासिच्येरंस्ता अभिमन्त्रयते - अक्षितोऽस्य क्षित्यै त्वा मा मे क्षेष्ठा अमुत्रामुष्मिन् लोके इति। पूरयित्वोपतिष्ठते

भूरायुर्मे धारयत प्राणं मे धारयत प्रजां मे धारयत पशून् मे धारयत मा म आयुः प्राणाः प्रजाः पशवः परासिच्येरन् इति। (बोधा.गृह्य.४.१.७,८)

⇒ **यदि दर्वीकूर्चादीनां हानिः भवेत्।**

बोधायनगृह्यसूत्रे उक्तं यदि दर्वीकूर्चादीनां सम्भाराणां प्रोक्षितानां वस्त्राणां दाहः नाशः वा भवेत् तर्हि पूर्वतनाः सम्भाराः यथा आसन् तथैव तादृशाः पुनः सम्पाद्य कार्यं साधनीयम्। त्वं नो अग्ने इत्यादिभिः मन्त्रैः प्रायश्चित्तं च कुर्यात्।

➢ सर्वत्र दर्वीकूर्चप्रस्तरपरिधिबर्हिःपवित्रेध्मद्रव्यसम्भाराणां चेद्दाहोपघातेषु नाशे विनाशे वाऽन्यं यथालिङ्गं कृत्वा यथालिङ्गमुपसाद्य - त्वं नो अग्ने, स त्वं नो अग्ने, त्वमग्ने अयासि, प्रजापते इत्येताभिस्स्रुवाहुतीर्जुहुयात्। (बोधा.गृह्य.४.२.१)

⇒ **यदि वस्त्राणां हानिः भवेत्।**

बोधायनगृह्यसूत्रे उक्तं यज्ञसमये निश्चितानां वस्त्राणां दाहः नाशः यदि भवेत् अन्यानि तादृशाणि सम्पाद्य प्रायश्चित्तहोमं च कुर्यात्।

➢ अथ वस्त्राणां प्रोक्षितानां चेद्दाहोपघातेषु नाशे विनाशे अन्यत् यथालिङ्गं कृत्वा यथालिङ्गमुपसाद्य जुहोति- सोसाय स्वाहा इति। (बोधा.गृह्य.४.२.५)

⇒ **यदि विविधप्रकारेण विविधानां यज्ञीयवस्तूनां हानि भवेत्।**

अग्निवेश्यगृह्यसूत्रे, भारद्वाजगृह्यसूत्रे च उक्तं सर्वत्र या कापि हानिः नाशः वा भवतु मिन्दाहुत्या प्रायश्चित्तं कुर्यात्। अत्र विशिष्य प्रायश्चित्तानि अपि उक्तानि सन्ति। यदि पात्रे छेदः भवेत् सन्त्वासिञ्चामि इति मन्त्रेण प्रायश्चित्तं जुहुयात्। यदि पात्रं भिन्नं भवेत् भूमिर्भूम्ना इति मन्त्रेण अन्यत् पात्रं स्वीकृत्य उपयोगं कुर्यात्। अवसिच्य त्रयस्त्रिंशत्तन्तव इति मन्त्रेण होमं च कुर्यात्। यदि पात्रं दग्धं भवेत् निर्ऋत्यै त्वा इति मन्त्रेण दग्धम् अभिमन्त्रयेत्। दग्धं पात्रम् अग्नौ क्षिपेत् अन्यं च स्वीकुर्यात्। त्वं पराची त्वमवाची त्वं रक्षांसि इति तिसृभिः होमप्रायश्चित्तं च कुर्यात्।

- सर्वत्र स्कन्ने भिन्ने क्षामे दग्धे विपर्यासेऽन्तरिते च द्वे मिन्दाहुती जुहुयात् यन्म आत्मनो मिन्दाभूत्, पुनरग्निश्चक्षुरदात् इति। स्कन्ने सन्त्वा सिञ्चामि इति स्कन्नमभिमन्त्र्यापोह्यावसिच्य भूः इत्युपस्थाय अस्कान्द्यौः पृथिवीम् इति द्वे आहुती जुहुयात्। आज्यं चेद् देवाञ्जनवनस्पतिमंहस इति चानुमन्त्र्य किञ्चिच्च दद्यात्। अथ भिन्ने भूमिर्भूम्ना इति भिन्नमभिमन्त्र्य उन्नम्भय पृथिवीम् इत्यपोह्यावसिच्य त्रयस्त्रिंशत्तन्तव इत्येतया जुहुयात्। अग्नौ प्रक्षिपेद् दारुमयाणि। अथ क्षामे निर्ऋत्यै त्वा इति दग्धमभिमन्त्र्य किञ्चित् त्वं पराची त्वमवाची त्वं रक्षांसि गच्छ इति दक्षिणापरमुत्तरापरं वा दिशं प्रतिनिरस्य अग्नी रक्षांसि सेधति इति तिस्र आज्याहुतीर्जुहुयात्। (अग्नि.गृह्य.२.७.९)
- सर्वत्र स्कन्ने भिन्ने क्षामे दग्धे विपर्यासेऽन्तरिते च द्वे मिन्दाहुती जुहोति यन्म आत्मनो मिन्दाभूत्पुनरग्निश्चक्षुरदादिति द्वाभ्यामथ स्कन्ने सं त्वा सिञ्चामीति स्कन्नभिमन्त्र्योन्नम्भय पृथिवीमित्यपोऽभ्यवहृत्य भूरित्युपस्थायास्कान्द्यौः पृथिवीमित्याहुतिं जुहोत्यथाज्यं चेद्देवाञ्जनमगन्यज्ञ इति चानुमन्त्रणं किं चिच्च दद्याद्भिन्ने भूमिर्भूमिमगादिति भिन्नमभिमन्त्रोन्नम्भय पृथिवीमित्यपोऽभ्यवहृत्य त्रयस्त्रिंशत्तन्तव इत्येतया जुहुयादग्नौप्रक्षेपणं दारुमयेऽथक्षामे निर्ऋत्यै त्वेति विदग्धमभिमन्त्र्य त्वं पराची त्वमवाची त्वं रक्षांसि सेधतीती तिस्र आज्याहुतीर्जुहुयात्।(भार.गृह्य.३.१८)
- सर्वत्र स्कन्ने भिन्ने छिन्ने क्षामे विपर्यासे उद्दाहे ऊनातिरिक्ते पवित्रनाशे पात्रभेदे द्वे मिन्दाहुती जुहोति। (बोधा.गृह्य.४.९.४)

⇒ **यदि विपरीतं कार्यं भवेत्।**

बोधायनगृह्यसूत्रे उक्तं द्रव्यहविर्मन्त्रादीनां विपरीत करणं, दर्भास्तरणं, पवित्रकरणादि कार्याणि यदि विपरीतानि भवन्ति तर्हि मन्त्रैः होमपूर्वकं प्रायश्चित्तं कुर्यात्।

- द्रव्यहविर्मन्त्रकर्मादीनामतिपन्नभिन्नभग्ननष्टदुष्टविपरीतदग्धाशृत्यनिकृतानामनाम्ना तेषु जुहुयात् - मनो ज्योतिः, अयाश्चाग्ने, यदस्मिन् कर्मणि, स्वस्ति न इन्द्रो वृद्धश्रवाः इति। व्याहृतिभिश्च। (बोधा.गृह्य.४.५.२)
- अथ विपरीतदर्भास्तरणपवित्रकरणपात्रासादनप्रोक्षणीसंस्कारब्रह्मप्रणीताहविनिर्वापण-आज्यसंस्कारस्रुक्सम्मार्जनपरिधिपरिषेचनइध्माभ्याधानविपरीतेषु प्रायश्चित्तं- ततं म आपः, यत्पाकत्रा, मनस्वती, मिन्दाहुती, महाव्याहृतीः, व्याहृतयश्च प्रायश्चित्तं जुहुयादिति। (बोधा.गृह्य.४.७.१)

### ⇒ यदि यज्ञीयस्थाली भिद्येत्।

बोधायनगृह्यपरिभाषासूत्रे उक्तं यत् यज्ञाय यस्यां स्थाल्यां चरुश्रपणं कुर्वन्ति सा स्थाली यदि भग्ना भवेत् तर्हि तस्याः स्थाल्याः अभिमन्त्रणं कुर्यात्।

- अथ यद्युखा भिद्येत तामभिमन्त्रयते अभिन्नो घर्मो जीरदानुर्यत आत्तस्तदमन् पुनः इति। (बोधा.गृह्यपरि.१.१६.२४)

### ⇒ यदि विपर्यासः भवेत्।

अग्निवेश्यगृह्यसूत्रे भारद्वाजगृह्यसूत्रे वैखानसगृह्यसूत्रे च उक्तं यदि यस्य कस्यापि कर्मणः विपरीतकरणं भवेत्। त्वन्नो अग्ने इत्यादिभिः मन्त्रैः प्रायश्चित्तं कुर्यात्।

- अथ विपर्यासे त्वन्नो अग्ने, स त्वन्नो अग्ने, त्वमग्ने अयासि, प्रजापते इति चतस्र आहुतीर्जुहुयात्। एता एवान्तरिते मनो ज्योतिः इति पञ्चमीमन्तरितं च कुर्यात्। संस्थिते चेत् किञ्चिच्च दद्यात्। (अग्नि.गृह्य.२.७.९) (भार.गृह्य.३.१९)
- सर्वस्यादावाघारे क्रियालोपे विपर्यासे च व्याहृतीर्महाव्याहृतिर्गायत्रीं सावित्रीं मिन्दाहुती वैष्णवं च द्विरावर्त्य हुत्वा पुनराघारं जुहोति, (वैखा.गृह्य.६.१.५)

⇒ **यदि परिधीः दग्धानि भवेयुः।**

होमसमये होमकुण्डात् बहिः दीर्घां पलाशशाखां स्थापयन्ति। एताः शाखाः त्रिषु दिक्षु स्थापयन्ति। पूर्वस्यां दिशि न स्थापयन्ति। एताः शाखाः एतावता दीर्घाः भवेयुः यथा शाखायाः मूलं अन्यस्याः शाखायाः अग्रे स्पृष्टं भवेत्। अग्निवेश्यगृह्ये, भारद्वाजगृह्ये, बोधायनगृह्ये च उक्तम् एताः परिधीः यदि होमसमाप्तितः पूर्वं दग्धाः भवन्ति तर्हि प्रायश्चित्तं कुर्यात्। तथा च तादृशीम् एव शाखां तस्याः स्थाने पुनः स्थापयित्वा होमं पूर्णं कुर्यात्।

- अथ यदि परिधिदाहे अन्यं यथालिङ्गमुपासाद्य जुहोति - प्ररित्वाऽग्ने पुरं वयम् इति। (बोधा.गृह्य.४.२.४)
- अथ परिधिदाहे प्रदाव्यायाग्नये नमो नमः प्रदाव्यायेति समानमत ऊर्ध्वमग्नेःसमिदसीति पश्चार्धं यमस्य समिदसीति दक्षिणार्धं सोमस्य समिदसीत्युत्तरार्धमिन्धानास्त्वा शतं हिमा इत्याहुतिं जुहुयाद्धुष्टेऽन्यं परिदध्याद्गन्धर्वोऽसीति प्रतिमन्त्रम्(भार.गृह्य.३.१९) (अग्नि.गृह्य.२.७.९)

⇒ **यदि परिस्तरणानि दग्धानि भवेयुः।**

अग्निवेश्यगृह्यसूत्रे, वैखानसगृह्यसूत्रे, बोधायनगृह्यसूत्रे, भारद्वाजगृह्यसूत्रे च उक्तं होमकुण्डस्य बहिर्भागे चत्वारः चत्वारः दर्भाः स्थापिताः भवन्ति। तान् परिस्तरणानि इति उच्यन्ते। यावान् होमकुण्डस्य आकारः भवति ततोपि किञ्चित् दीर्घाः दर्भाः भवन्ति। तेन दर्भाणां अग्राणि मूलानि च स्पृष्टानि भवन्ति। होमारम्भे ते दर्भाः स्थापिताः भवन्ति होमसमाप्तौ च निष्कासिताः भवन्ति। परम् अकस्मात् होमसमाप्तितः पूर्वमेव परिस्तरणानि यदि दग्धानि नष्टानि भवन्ति तर्हि प्रायश्चित्तं कुर्यात्। तथा च दग्धानां स्थाने अन्यानि स्थापयेत्।

- अथ परिस्तरणदाहे अग्नये क्षामवते नमो नमः क्षामवन्मा मा हिंसीः मामे गृहं मा मे धनं मामे पशून् इत्यभिमन्त्र्य अग्नये क्षामवते स्वाहा इति जुहुयात्। इन्द्रं वो विश्वतस्परि इति पुनः परिस्तीर्य इन्द्राय स्वाहा इति जुहुयात्।(अग्नि.गृह्य.२.७.९)(भार.गृह्य.३.१९)

- परिस्तरणादिसम्भाराणां दाहे भेदे च्छेदे नाशे च तत्तत्स्थाने संयोज्य मिन्दाहुती द्विरावर्त्य जुहुयात्। (वैखा.गृह्य.६.१.१४)
- अथ यदि परिस्तरणदाहे - अग्नये क्षामवते स्वाहा इति हुत्वा परिस्तृणाति। इन्द्रं वो विश्वतस्परि, इन्द्रं नरः इति द्वाभ्यां परिस्तीर्य जुहोति - इन्द्राय स्वाहा इति। (बोधा.गृह्य.४.२.२,३)

⇒ **यदि यज्ञसमये व्रतपालनं नाभवत्।**

बोधायनगृह्यसूत्रे उक्तं यदि विविधप्रसङ्गे निश्चित्तस्य व्रतस्य अज्ञानवशात् नियमभङ्गः व्रतभङ्गः भवेत् तर्हि अव्रत्यप्रायश्चित्तं कुर्यात्।

- दर्भै प्रवर्ग्यदेवताभ्य आसनानि कल्पयित्वाऽथाव्रत्यप्रायश्चित्ते जुहोति- यन्म आत्मनो मिन्दाऽभूत्, पुनरग्निश्चक्षुरदात् इति द्वाभ्याम्। (बोधा.गृह्य.३.४.३०)

⇒ **यदि अन्तरागमनं भवेत्।**

बोधायनगृह्यसूत्रे उक्तं यदि यज्ञसमये अग्निः तथा ऋत्विजां मध्ये तथा च देवताः तथा अग्निः मध्ये प्रमादवशात् अन्तरागमनं येनकेनापि कृतं तर्हि प्रायश्चित्तं कुर्यात्। दुर्गां, मनस्वती इत्यादिभिः जुहुयात्। अन्यत्र उक्तं दशहोतारं चानुख्या जुहुयात्। अन्यत्र उक्तं पञ्चहोतारं चानुख्या जुहुयात्।

- भग्न-नष्ट-दुष्ट-विपरीत-स्फुटित-द्विजश्व-बिडाल-काकस्वर-मृग-पशु-पक्षि सरीसृपाणामन्यत्कीटो वा ऋत्विजोऽग्नीन्तरा गच्छेत् - दुर्गा, मनस्वती, महाव्याहृतीस्तिस्रस्तन्तुमतीर्जुहुयात् । सैव ततः प्रायश्चित्तिः। (बोधा.गृह्य.४.८.१)
- अन्तरागमने प्रायश्चित्तं दशहोतारं चानुख्या च जुहोति। (बोधा.गृह्य.४.९.७)
- मण्डूकसर्पमूषिकमार्जारान्तरागमने प्रायश्चित्तं पञ्चहोतारं चानुख्या च जुहोति। (बोधा.गृह्य.४.९.९)

⇒ **यदि अयज्ञियं भाषणं भवेत्।**

गोभिलगृह्यसूत्रे अग्निवेश्यगृह्यसूत्रे च उक्तं यदि यज्ञसमये प्रमादवशात् असम्बद्धं नाम अयज्ञीयं भाषणं भवेत्। विष्णुसम्बन्धि ऋचां जपेत्।

- यद्ययज्ञियां वाचं वदेत् वैष्णवीमृचं यजुर्वा जपेत्। (गोभि.गृह्य.१.६.१९)
- सर्वत्र वैष्णवर्चं जपेत् विष्णोर्नुकं वीर्याणि प्रवोचम् इति।(अग्नि.गृह्य.२.७.८)

⇒ **यदि अशुद्धं मन्त्रपठणं भवेत्।**

बोधायनगृह्यसूत्रे उक्तं यदि अशुद्धम्, अस्फुटम्, अशुद्धस्वरसहितं, वृत्तभङ्गसहितं मन्त्रपठणं भवेत् तर्हि प्रायश्चित्तं कुर्यात्। बोधायनश्रौतसूत्रे अपि एतदर्थं प्रायश्चित्तम् उक्तमस्ति। *सर्वत्रोपांशुप्रभृति वाचस्थानानां स्वराक्षरपदवृत्तभ्रेषेषु आभिगीर्भिर्यदतो न ऊनमित्येतया स्रुवाहुतिं जुहुयात्।* (२७.२)

- विकृतरूपे विकृतशब्दे विस्फुटे प्रायश्चित्तं शंयुवाकं चानुख्यां च जुहोति। (बोधा.गृह्य.४.९.१०)
- स्वराक्षरपदवृत्तभ्रेषेषु आभिगीर्भिः इति। (बोधा.गृह्य.४.९.१२)

⇒ **यदि होमकाले अग्निः होमकुण्डात् बहिरागतः।**

बोधायनगृह्यसूत्रे उक्तं यदि यज्ञकाले अग्निः नाम अङ्गाराः अकस्मात् होमकुण्डात् बहिः आगताः तर्हि प्रायश्चित्तं कुर्यात्।

- अथाभ्याघातस्स्यादग्निश्चोद्वातस्स्यात् सर्वं तत् अपहताः इति प्रोक्ष्य स्थण्डिलमुद्धृत्य तमेवाग्निमुपसमाधाय सम्परिस्तीर्याऽग्निमुखात्कृत्वा पक्वाज्जुहोति - ये देवा यज्ञहनो यज्ञमुषः इति तिसृभिरनुच्छन्दसम्। (बोधा.गृह्य.४.४.१)
- अथ यदि होमकालेष्वग्निरुद्वातस्स्यात् सर्वं तत् अपहताः इति प्रोक्ष्य स्थण्डिलमुद्धृत्याग्निमुपसमाधाय सम्परिस्तीर्य प्रायश्चित्तं जुहोति- अयाश्चाग्ने,

पञ्चहोता, ब्राह्मण एकहोता, दश मनस्वतीः, मिन्दाहुती, महाव्याहृतीः, व्याहृतयश्च प्रायश्चित्तं जुहुयादिति। (बोधा.गृह्य.४.१०.१)

⇒ **यदि अग्नि स्वयमेव प्रज्वलितः भवेत्।**

बोधायनगृह्यसूत्रे भारद्वाजगृह्यसूत्रे च उक्तं यदि यज्ञार्थं योग्यात् स्थानात् आनीतः अग्निः वेणुधमन्या प्रज्वालनात् पूर्वमेव स्वयमेव प्रज्वलिताः भवन्ति तर्हि प्रायश्चित्तं कुर्यात्।

➢ सर्वत्र स्वयं प्रज्वलितेऽग्नौ समिधावादधाति - उद्दीप्यस्व जातवेदः इति द्वाभ्याम्। (बोधा.गृह्य.४.३.१)

➢ सर्वत्र स्वयंप्रज्वलितेऽग्नौ समिधावादध्यादुद्दीप्यस्व जातवेदऽपघ्नन्निर्ऋतिं मम। पशूंश्च मह्यमावह जीवनं च दिशो दशः स्वाहा।। मानो हिंसीर्जातवेदो गामश्वं पुरुषं पशुम्। अहिंसन्नग्न आगहि श्रियं मयि परिपालय स्वाहेत्याधायोपतिष्ठते।(भार.गृह्य.२.३१)

⇒ **यदि प्रायश्चित्तस्य स्पष्टोल्लेखः न स्यात्।**

बोधायनगृह्यपरिभाषासूत्रे सूचितं यदि प्रायश्चित्तस्य स्पष्टतया उल्लेखो न स्यात् तर्हि भूर्भुवस्सुवरोम् तत्सवितुर्वरेण्यम् इत्यनेन प्रायश्चित्तं कुर्यात्।

➢ अथ वा भूर्भुवस्सुवरोम् इत्यनुद्रुत्य तत्सवितुर्वरेण्यम् इति जुहोति। अनाम्नातेषु तदेतत्सर्वप्रायश्चित्तम्। (बोधा.गृह्यपरि.१.६.३,४)

बोधायनगृह्यसूत्रे उक्तं यदि होमसमये घटितानां दोषाणां विषये प्रायश्चित्तं नोक्तं तर्हि सर्वप्रायश्चित्तं वारुण्या ऋचा जुहुयात्।

➢ अनादिष्टं सर्वप्रायश्चित्तं व्याख्यातं वारुणीमिति निर्दिशेत्। (बोधा.गृह्य.४.९.११)

वैखानसगृह्यसूत्रे उक्तं विशेषतया प्रायश्चित्तस्य यदि उल्लेखो न स्यात् तर्हि स्रुवेण आज्यद्रव्येण व्याहृतिमन्त्रेण प्रायश्चित्तं जुहुयात् वा वैष्णवमन्त्रेण जुहुयात्।

- विशेषेऽनुरक्ते स्रुवेण होतव्यम् आज्यं हविर्व्याहृतिर्मन्त्रं प्रायश्चित्तेऽनुक्ते वैष्णवं प्रायश्चित्तम्। (वैखा.गृह्य.६.१.११)

⇒ **यदि होमसमये न्यूनम् अतिरिक्तं वा किमपि भवेत्।**

वैखानसगृह्यसूत्रे उक्तं यदि होमसमये न्यूनं वा अतिरिक्तं यत्किमपि भवति तर्हि पूर्णाहुती मिन्दाहुती च प्रायश्चित्तं कुर्यात्।

- होमे न्यूनेऽतिरिक्ते च पूर्णाहुती मिन्दाहुती जुहोति। सर्वहोमानामन्ते स्विष्टकृत्प्रभृत्यन्तहोमे हीने विष्णोर्नुकादिमिन्दाहुत्याश्राविताादीञ्जुहुयात्। (वैखा.गृह्य.६.१.१०,१६)

⇒ **यदि नियमानां उल्लङ्घनं भवेत्।**

बोधायनगृह्यपरिभाषासूत्रे उक्तं यदि होमसमये यज्ञनियमानाम् उल्लङ्घनं भवेत् तर्हि प्रायश्चित्तं कुर्यात्।

- अथास्यातिपन्नप्रायश्चित्तम् अग्ने नया देवानाम् इति। (बोधा.गृह्यपरि.१.१६.२१)

⇒ **यदि अज्ञाताः दोषाः भवेयुः।**

बोधायनगृह्यपरिभाषासूत्रे उक्तं यदि होमसमये ज्ञाताः अज्ञाताः दोषाः भवेयुः तर्हि प्रायश्चित्तं कुर्यात्।

- अथास्यानाज्ञातप्रायश्चित्तम् अनाज्ञातं, पुरुषसम्मितः इति। (बोधा.गृह्यपरि.१.१६.२३)

⇒ **यदि कश्चन प्राणिः पक्षिः वा यज्ञस्य नाशं कुर्यात्।**

बोधायनगृह्यसूत्रे वैखानसगृह्यसूत्रे च उक्तं यदि कश्चन कीटः, प्राणिः, पक्षिः, वा यज्ञमण्डपम् आगत्य यज्ञमण्डपे, यज्ञवेद्याः, यज्ञपात्राणां, हविर्द्रव्याणां वा अव्यवस्थां, नाशं, वा कुर्यात् तर्हि देवस्यत्वा इति मन्त्रेण प्रोक्षणं कुर्यात्। तथा च येन प्राणिना

पक्षिणा वा नाशः कृतः तस्य पदचिन्हेषु जलेन प्रोक्षणं कृत्वा पृथिवि देवयजन्यो इति मन्त्रस्य जपं कुर्यात्।

- ➢ तत्रादित एवोपलिप्ते श्वा वेटको वा यदि गच्छेत्कीटो वा पिण्डकारी स्यात् तत्पुनरुपलिप्य प्रोक्षति - देवस्यत्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नेस्तेजसा प्रोक्षामि इति प्रोक्ष्य स्थण्डिलमुपलिप्य स्थण्डिलमुद्धरेत्। स्थण्डिलमुद्धृतं गौरश्वो वा यदि विकिरेदन्यद्वा श्वापदमधितिष्ठेत्तस्य पदमभ्युक्ष्य जपति - पृथिवि देवयजन्योषध्यास्ते मूलं मा हिंसिषम् इति। (बोधा.गृह्य.४.१.२,३)
- ➢ अग्न्यायतने गोवराहश्वसर्पमण्डूकमार्जाराद्यैर्गमने तत्पदानीदं विष्णुरिति प्रोक्ष्य वैष्णवं रौद्रं च। (वैखा.गृह्य.६.१.१३)

### ⇒ यदि होमाय स्वीकृतम् हविर्द्रव्यम् अव्यवस्थितं भवेत्।

बोधायनगृह्यसूत्रे वैखानसगृह्यसूत्रे च उक्तं यदि यज्ञाय स्वीकृतमाज्यं मक्षिकैः, मशकैः, रोमभिः, पिपीलिकैः वा अव्यवस्थितं कृतं तर्हि प्रजापतये होमं कुर्यात्। यदि अव्यवस्थितम् अनुत्तमम् आज्यं तथा व्यवस्थितम् उत्तमम् आज्यम् एकत्रितं भवति तर्हि प्रायश्चित्तं कुर्यात्। ऐतरेयब्राह्मणे अपि एतदर्थं प्रायश्चित्तम् उक्तम् अस्ति।*तदाहुर्यस्य सर्वाण्येव हवींषि दुष्येयुर्वापहरेयुर्वा का तत्र प्रायश्चित्तिरिति आज्यस्यैनानि यथा दैवतं परिकल्प्य तयाज्यहविषेष्ट्या यजेतातोन्यामिष्टिमनुल्बणां तन्वीत यज्ञो यज्ञस्य प्रायश्चित्तिः।*(३२.३)

- ➢ मक्षिकैर्मशकैर्वा रोमभिः पिपीलिकैर्वा व्यापद्येत प्रजापतये होमं कुर्यात्। व्यापन्नमाज्यम् अव्यापन्नमन्तर्हितमनाज्ञातप्रायश्चित्तं यज्ञसमृद्धिर्जुहोति। (बोधा.गृह्य.४.९.५,६)
- ➢ अग्नावाज्ये चरौ वा होमे मक्षिकक्रिमिरोमपिपीलिकादिपतने तद्व्यपोह्य बर्हिषोद्दीप्य प्राजापत्यमाग्नेयम्। (वैखा.गृह्य.६.१.१२)

⇒ **यदि होमः मध्ये एव विच्छिन्नः भवेत्।**

अग्निवेश्यगृह्यसूत्रे उक्तं यदि होमः मध्ये एव खण्डितः स्थगितः तर्हि वेदाहमेतम् इति तिस्रः ऋचः जपेत्। द्वे मिन्दाहुती हुत्वा प्रायश्चित्तं कृत्वा अवशिष्टं होमं पूर्णं कुर्यात्।

➢ यदि होमो मध्ये विच्छिन्नः स्याद् वेदाहमेतं पुरुषं महान्तम् इति तिस्र ऋचो जपेत्। द्वे मिन्दाहुति हुत्वा पुनः शेषं समापयेत्। (अग्नि.गृह्य.२.७.८)

⇒ **यदि होमस्य मध्ये अग्निनाशः भवेत्।**

कौथुमगृह्यसूत्रे उक्तं यदि होमस्य मध्ये एव अग्नि नाशः भवति तर्हि प्राजापत्यं होमं प्रायश्चित्तं वा कुर्यात्।

➢ कर्माग्न्यावुपहतिश्चेत्प्राजापत्यं वा प्रायश्चित्तं जुहुयात्।(कौथु.गृह्य.३)

⇒ **यदि होमस्य मध्ये जलेन अग्निनाशः भवेत्।**

अग्निवेश्यगृह्यसूत्रे उक्तं यदि अग्निः जलेन स्पृष्टः नष्टः वा भवति तर्हि पुनः अग्निमन्थनं कृत्वा अथवा लौकिकम् अग्निम् आनीय पुनः अग्निं संस्थाप्य यथाविधिः होमं कुर्यात्। पूर्णाहुतिं च जुहुयात्।

➢ **यद्यग्निमुदक्याद्यवलीढे अग्निमुद्वास्य पूर्ववत् शौचं कृत्वा अग्निं मथित्वा लौकिकं वा** आहृत्य स्रुक्स्रुवौ निष्टप्य संमृज्य स्रुचि चतुर्गृहीतं गृहीत्वा पूर्णाहुतिं हुत्वा पूर्ववत् संस्कारं करोति। (अग्नि.गृह्य.२.७.८)

⇒ **यदि होमसमये यजमानः प्रवासे भवेत्।**

वैखानसगृह्यसूत्रे उक्तं यदि यजमानः प्रवासे भवेत् तर्हि होमः कथं भवेत्। परं तत्रापि पर्यायः सूचितः अस्ति। यत्र कुत्रापि भवतु परं होमः कर्तव्यः एव। तत्र अग्नेः अनुपलब्धत्वात् नित्यहोमः स्थगितः न भवेत् इति। अग्नेः अभावे जले, हविर्द्रव्यस्य

अभावे जलेन वैश्वदेवहोमः कर्तव्यः। जलेन जले होमः कर्तव्यः। अतिथेः अभ्यागतस्य भोजनं कारणीयं तद् यदि नाभवत् प्रायश्चित्तं कुर्यात्। अत्र त्यागभावना महत्वपूर्णास्ति।

- प्रवासेऽध्वनि परस्य गेहे च भोक्ष्यन्लौकिकाग्नाविन्धनाभावे भस्मापोह्याङ्गारेऽङ्गाराभावे जले वा जुहोति। अन्नाभावे जलेनैव वैश्वदेवं कुर्यात्। वैश्वदेवान्ते यत्नेनातिथिमभ्यागतं च भोजयति। तयोरागतयोर्भोजने हीने वैश्वदेववत्प्रायश्चित्तं करोति। पाणिग्रहणप्रभृति गृहस्थधर्माण्यनुतिष्ठेत। (वैखा.गृह्य.६.१८.३-७)

**⇒ यदि प्रायश्चित्तम् अकृत्वा अग्रिमः होमः प्राप्तः।**

कौथुमगृह्यसूत्रे उक्तं यदि पूर्वतनकर्मणि जाते दोषे प्रायश्चित्तं न कृतं तर्हि पुनः यदा कर्मणः आरम्भः कर्तव्यः भवति तदा प्रायश्चित्तं कृत्वा अग्रिमकर्मणः आरम्भं कुर्यात्।

- प्रायश्चित्तं विना पुनश्चारम्भणि चेत् कर्तव्यं स्यात्प्रायश्चित्तिः। (कौथु.गृह्य.४)

**⇒ यदि प्रमाणवर्जितं भवेत्।**

वैखानसगृह्यसूत्रे उक्तं स्थण्डिलपरिस्तरणादि यदि प्रमाणवर्जितं स्यात् तर्हि मिन्दाहुत्या प्रायश्चित्तं जुहुयात्।

- स्थण्डिले परिस्तरणादिसंभारे च प्रमाणवर्जिते हीने मिन्दाहुती सावित्रीं व्याहृतीश्च जुहुयात्। (वैखा.गृह्य.६.१.६)

**⇒ सर्वविधानाम् अयोग्यकारणानां परिहाराय प्रायश्चित्तं जुहुयात्।**

बोधायनगृह्यपरिभाषासूत्रे तथा च अग्निवेश्यगृह्यसूत्रे उक्तं सर्वविधानां प्रमादानां निमित्तम् *अयाश्चाग्ने* इत्यनेन प्रायश्चित्तं जुहुयात्।

- अपरं चतुर्गृहीतं गृहीत्वा प्रायश्चित्तं जुहोति अयाश्चाग्ने इति। (बोधा.गृह्यपरि.१.१६.३८)
- प्रायश्चित्तं जुहोति अयाश्चाग्नेरनभिशस्तीश्च सत्यमित्वमया असि। अयसा मनसा धृतोऽयमा हव्यमूहिषेऽयानो धेहि भेषजं स्वाहा इति। (अग्नि.गृह्य.१.६.३)

⇒ उपसंहारः - **षष्ठप्रकरणम्** **(विविधनिमित्तेषु समानप्रायश्चित्तम्, प्रायश्चित्तानि, अद्भुतप्रायश्चित्तानि, यज्ञीयप्रायश्चित्तानि)**

षष्ठे प्रकरणे विविधनिमित्तेषु समानप्रायश्चित्तम् नाम कतिचनविषयाणां निमित्तम् एकमेवप्रायश्चित्तम् उक्तमस्ति तादृशानि सूत्राणि अत्र सङ्गृहीतानि सन्ति। प्रायश्चित्तानि इति विभागे प्रायश्चित्तानि सूत्रेषु उल्लिखितानि सन्ति परं तेषां स्वरूपं तत्र नास्ति। तादृशाणां विस्तृतं वर्णनं अस्ति। अद्भुतप्रायश्चित्तानि इति विभागे विविधानाम् अद्भुतप्रसङ्गानां परिहाराय प्रायश्चित्तानि अत्र वर्णितानि सन्ति। अन्ते यज्ञकरणे अन्यथाकरणे विपरीतकरणे ये प्रसङ्गाः आपतिताः भवन्ति तेषां निमित्तं प्रायश्चित्तानि यज्ञीयप्रायश्चित्तानि इत्यत्र सन्ति।

## ७) उपसंहारः

१) विविधानां गृह्यसूत्राणाम् अध्ययनं कृत्वा तेषु उल्लिखितानि प्रायश्चित्तानि आदौ सङ्गृह्य तेषु यानि प्रायश्चित्तानि गृह्यसंस्काराणां सम्बद्धानि सन्ति तेषां विशेषतया अत्र विचारः कृतः अस्ति।

२) आहत्य द्विशतंद्व्यशीतिः (२८८) सन्दर्भाः स्वीकृताः सन्ति। तेषु कस्मात् गृह्यसूत्रात् कति सन्दर्भाः स्वीकृताः इति अधस्तनकोष्टकाधारेण ज्ञातुं शक्यते।

| गृह्यसूत्रम् | सन्दर्भसङ्ख्या | गृह्यसूत्रम् | सन्दर्भसङ्ख्या |
|---|---|---|---|
| १)अग्निवेश्यगृह्यसूत्रम् | ३३ | १०)जैमिनिगृह्यसूत्रम् | ४ |
| २)आपस्तम्बगृह्यसूत्रम् | २ | ११)पारस्करगृह्यसूत्रम् | ४ |
| ३)आश्वलायनगृह्यसूत्रम् | १३ | १२)बोधायनगृह्यसूत्रम् | ७० |
| ४)काठकगृह्यसूत्रम् | ४ | १३)भारद्वाजगृह्यसूत्रम् | १२ |
| ५)कौथुमगृह्यसूत्रम् | ४ | १४)मानवगृह्यसूत्रम् | ६ |
| ६)कौशिकगृह्यसूत्रम् | १४ | १५)वाराहगृह्यसूत्रम् | ४ |
| ७)कौषीतकगृह्यसूत्रम् | ४ | १६)वैखानसगृह्यसूत्रम् | ६१ |
| ८)खादिरगृह्यसूत्रम् | २ | १७)शाङ्खायनगृह्यसूत्रम् | ११ |
| ९)गोभिलगृह्यसूत्रम् | ६ | १८)हिरण्यकेशिगृह्यसूत्रम् | ३४ |

३) कतिचन गृह्यसूत्रकारैः कतिचन संस्कारविषयाः वर्णिताः परं गृह्यसूत्रेषु अविद्यमानाः अनागताः कतिचन संस्कारविषयाः गृह्यशेषसूत्रे, गृह्यपरिभाषासूत्रे वर्णिताः सन्ति। बोधायनेन तु अन्त्येष्टिसंस्काराय पितृमेधसूत्रं स्वतन्त्रतया रचितमस्ति।

४) कतिचन गृह्यसूत्रोत्तरैः ग्रन्थकारैः कतिचन संस्काराः उक्ताः परं गृह्यसूत्रेषु तु सीमिताः संस्काराः उक्ताः। कतिचनसंस्काराणाम् अन्तर्भावः एकस्मिन् मुख्यसंस्कारे निहितः स्यात्। यथा विष्णुबलिं सुलभप्रसूत्यर्थं कुर्वन्ति। यथा जातकर्मानन्तरं स्तनपानं, कर्णवेधः। यथा उपनयनात् प्राक् अक्षरारम्भः उपनयनानन्तरम् उपाकरणं, उत्सर्जनं, वेदारम्भः, महानाम्न्यादिव्रतचतुष्टयम्। यथा विवाहानन्तरं पञ्चमहायज्ञाः, सप्तपाकयज्ञाः, सप्तहवियज्ञाः, सप्तसोमयज्ञाः।

५) प्रथमे प्रकरणे संस्कारेषु गर्भाधानात् जननपर्यन्ताः संस्काराः वर्णिताः सन्ति। पुंसवनम्, अनवलोभनं, सीमन्तोन्नयनं, विष्णुबलिः एते चत्वारः संस्काराः गर्भसंस्काराः। एते संस्काराः जननात् प्राक्तनाः। प्रथमः गर्भाधानसंस्कारो नाम स्त्रीसंस्काररूपः क्षेत्रसंस्कारः। गर्भधारणायाः प्राक्तनः संस्कारः। अनेन संस्कारेण क्षेत्रं शुद्धं संस्कारितं भवति। गर्भधारणा तदा एव योग्या भवेत् यदा ऋतुकालः योग्ये समये भवेत्, परं यदि अयोग्यसमये ऋतुकालः आरब्धः तर्हि ऋतुशान्तिं कृत्वा तदनन्तरमेव गर्भाधानं कुर्यात्। यदि गर्भाधानसंस्कारम् अकृत्वा एव स्त्रीगमनं कृतं गर्भधारणा च अभवत् तर्हि गर्भाधानसंस्कारस्य लोपकारणात् जातस्य दोषस्य निवारणाय प्रायश्चित्तं कुर्यात्। गर्भधारणायाः लक्षणानि यदा दृश्यन्ते तदा द्वितीये चतुर्थे गर्भमासे पुंसवनसंस्कारो भवति। षष्ठे मासि अनवलोभनं तथा सीमन्तोन्नयनं भवति। एते चत्वारः संस्काराः यदि नाभवन् तर्हि प्रायश्चित्तं कुर्यात्। विष्णुबलिः गर्भस्य अष्टमे मासि भवति। तस्य अकरणे किमपि स्वतन्त्रं प्रायश्चित्तं नोपलभ्यते।

६) द्वितीये प्रकरणे जननात् चौलान्ताः संस्काराः स्वीकृताः सन्ति। जातकर्म, नामकरणं, निष्क्रमणम्, अन्नप्राशनं, चौलम् एते संस्काराः बाल्यावस्थायां क्रियमाणाः सन्ति। जननकारणात् यत् जननाशौचं भवति तेन नित्यहोमस्य लोपो भवति, तदर्थं प्रायश्चित्तम् उक्तमस्ति। जननसमये यदि अयोग्यसमयः नाम अयोग्या तिथिः, अयोग्यं नक्षत्रम्, अयोग्यः योगः भवेत् तर्हि शान्तिः नाम प्रायश्चित्तं सूचितमस्ति। जनने यदि कापि विकृतिः भवेत् तर्हि प्रायश्चित्तं सूचितमस्ति। त्रयाणां पुत्राणां कन्यानां वा जन्मानन्तरं चतुर्थमपत्यं कन्या पुत्रो वा भवेत् प्रायश्चित्तं कुर्यात्। यदि हीनाङ्गम्, अधिकाङ्गं, दन्तसहितं, अपूर्णकालं, यमलम् एवं विविधप्रकारेण विकृतजननं भवेत् तर्हि प्रायश्चित्तं सूचितमस्ति। नामकरणनिष्क्रमणयोः विषये प्रायश्चित्तं नोक्तम्। अन्नप्राशनसंस्कारेण विना यदि बालेन अन्नं भक्षितं तर्हि प्रायश्चित्तं कर्तव्यम्। चौलसंस्कारस्य राहित्येऽपि प्रायश्चित्तं सूचितमस्ति।

७) तृतीये प्रकरणे उपनयनसमावर्तनयोः अन्तर्भावः कृतोऽस्ति। ब्रह्मचर्याश्रमस्य आरम्भात् समाप्तिपर्यन्तम् अत्र वर्णनम् अस्ति। उपनयनेन ब्रह्मचर्याश्रमस्य आरम्भो भवति समावर्तनेन ब्रह्मचर्याश्रमस्य समाप्तिः भवति। उपनयनस्य शिष्टसम्मतः शास्त्रसम्मतः कालः यदि अतीतः भवेत् तर्हि प्रायश्चित्तं कर्तव्यं भवति। उपनीतेन ब्रह्मचारिणा व्रते

नियमे भवितव्यम्, तेनैव ब्रह्मचारिणः अध्ययनं योग्यरीत्या भवेत्। परं यदि ब्रह्मचारी नियमभङ्गं कुर्यात् तर्हि तेन प्रायश्चित्तं कर्तव्यम्। केवलं प्रायश्चित्तं कृत्वा पुनः व्यवहारयोग्यता न भवेत् तदा पुनः उपनयनं कर्तव्यं भवेत्। ब्रह्मचर्याश्रमस्य कर्तव्यानि समाप्य समावर्तनं कुर्यात्। परं समावर्तनं अकृत्वा विवाहः नाभवत्, तथा च समावर्तितेन स्नातकेन नियमविरुद्धम् आचरणं कृतं तदा प्रायश्चित्तं कर्तव्यं भवति।

८) चतुर्थे प्रकरणे विवाहसंस्कारः वर्णितोऽस्ति। गृहस्थाश्रमस्य आरम्भः येन संस्कारेण भवति सः विवाहसंस्कारः अत्र स्वीकृतः। विवाहसंस्कारे मुख्यभूतं कार्यं गृह्याग्निसिद्धिः, तस्य गृह्याग्नेः रक्षणं, तस्मिन् अग्नौ नित्यहोमः, पर्वकाले होमः इत्यादिषु कार्येषु यदि दोषः भवेत्। तर्हि प्रायश्चित्तानि कर्तव्यानि भवन्ति। विवाहानन्तरं विवाहितायाः कन्यायाः योग्यरीत्या स्वगृहं प्रति आनयनम् इति पत्युः दायित्वमेव। परं यदि कन्यायाः आनयनसमये कतिचन विपरीतानि निमित्तानि भवन्ति तर्हि प्रायश्चित्तं कर्तव्यम्। यदि अशुभे दिने, समावर्तनम् अकृत्वा, ज्येष्ठभ्रातुः विवाहात् प्राक् विवाहः कृतः तर्हि प्रायश्चित्तं कृत्वा पुनर्विवाहं कुर्यात्। यदि विवाहसमये पत्नी रजस्वला भवेत् तर्हि प्रायश्चित्तं सूचितमस्ति। यदि ज्येष्ठभ्रातुः विवाहात् प्राक् विवाहः कृतः तर्हि अन्येषु गृह्यसूत्रेषु केवलं प्रायश्चित्तं सूचितमस्ति।

९) पञ्चमे प्रकरणे अन्त्येष्टिः। प्राणोत्क्रमणानन्तरम् अन्त्येष्टिसंस्कारः। संस्कारोऽयं मृतशरीरस्य भवति। अतः अत्र कर्तृत्वं पुत्रादीनां वंशजानाम् एव। अन्त्यसंस्कारस्य आरम्भः दाहसंस्कारेण भवति परं यदि मृतशरीरं विविधैः कारणैः उपलब्धं न स्यात् तर्हि पालाशविधिः सूचितोऽस्ति। यदि अनायासेन मृत्युः नाभवत् सर्पदंशादिकरणैः अभवत् तर्हि प्रायश्चित्तं कृत्वा दहसंस्कारः कर्तव्यः। मृतशरीरमपि अग्नये आहुतिरूपेण समर्प्यते अतः तत् शरीरं यदि शुनकादिनां स्पर्शेण अशुद्धं जातमस्ति तर्हि शुद्धं कृत्वा दाहसंस्कारः कर्तव्यः। मृतस्य सम्बन्धिनां अशौचनिवृत्तिः, शुद्धिश्च कथं भवेत् तदपि सूचितमस्ति सूत्रेषु। अन्यत् च अन्यानि विविधानि अन्त्येष्टिसम्बन्धीनि प्रायश्चित्तानि च सूचितानि सन्ति। यथा दहनाय आनीतः अग्निः नष्टः भवेत्, प्रेतस्य दहनकालः अतीतः, दशाहक्रियाः न कृताः, सपिण्डीकरणश्राद्धं न कृतम् इत्यादीनि।

१०) षष्ठे प्रकरणे विविधनिमित्तेषु समानप्रायश्चित्तम् नाम कतिचनविषयाणां निमित्तम् एकमेवप्रायश्चित्तम् उक्तमस्ति तादृशानि सूत्राणि अत्र सङ्गृहीतानि सन्ति। प्रायश्चित्तानि

इति विभागे प्रायश्चित्तानि सूत्रेषु उल्लिखितानि सन्ति परं तेषां स्वरूपं तत्र नास्ति। तादृशाणां विस्तृतं वर्णनम् अस्ति। अद्भुतप्रायश्चित्तानि इति विभागे विविधानाम् अद्भुतप्रसङ्गानां परिहाराय प्रायश्चित्तानि अत्र वर्णितानि सन्ति। अन्ते यज्ञकरणे अन्यथाकरणे विपरीतकरणे ये प्रसङ्गाः आपतिताः भवन्ति तेषां निमित्तं प्रायश्चित्तानि यज्ञीयप्रायश्चित्तानि इत्यत्र सन्ति।

११) चत्वारः आश्रमाः सन्ति ब्रह्मचर्याश्रमः, गृहस्थाश्रमः, वानप्रस्थाश्रमः, संन्यासाश्रमः। चतुर्षु द्वयोः ब्रह्मचर्याश्रमस्य, गृहस्थाश्रमस्य च उल्लेखो सर्वत्र दृश्यते। उपनयनेन ब्रह्मचर्याश्रमस्य आरम्भः भवति। विवाहेन गृहस्थाश्रमस्य आरम्भः भवति। गृह्यसूत्रेषु वानप्रस्थाश्रमस्य संन्यासाश्रमस्य च उल्लेखो विरलतया दृश्यते। अन्यत्रापि अनिवार्यतया उल्लेखो न दृश्यते। चतुर्षु द्वयोः आश्रमयोः आधिक्यं, प्रभावः समाजे आसीत् अस्ति च।

१२) प्रायश्चित्तिः प्रायश्चित्तं वा इति शब्दविषये विविधानि मतानि उदाहरणानि च दृश्यन्ते। परम् अर्थस्तु समानः एव।

१३) संस्कारे लोपो दोषो वा भवेत् परं मानवस्य जीवनं स्थगितं न भवतु। यस्य संस्कारस्य लोपः अथवा यस्मिन् संस्कारे दोषः वा भवेत् तस्य संस्कारस्य विषये प्रायश्चित्तं कृत्वा अग्रतोगत्वा मानवजीवनं निरन्तरं भवतु प्रवाहितं भवतु अतः प्रायश्चित्तानि उक्तानि।

१४) मानवः कदापि बुद्ध्या दोषं न करोति। अज्ञानवशात्, आपत्तिकारणात् वा दोषं करोति। यदा सः स्वकीयं दोषम् अङ्गीकरोति तदा प्रायश्चित्तं कृत्वा अग्रेगमनं सुकरं भवेदिति अपेक्षया प्रायश्चित्तानां व्यवस्था कृताऽस्ति।

१५) दोषाः भवन्तु नाम परमहं दोषभाग् अस्मि इति मनसा अङ्गीकृत्य प्रायश्चित्तं कर्तव्यं भवति। अतः प्रायश्चित्तानां स्वरूपं केवलं होमादिकं कृत्वा पूर्णं न भवति अपि तु प्रायश्चित्तेन दोषरहितं न्यूनरहितं कर्म मया पूर्णं कृतम् इति मानसिकः आनन्दोऽपि भवति।

१६) कतिचन गृह्यसूत्रेषु प्रत्येकं संस्कारस्य निमित्तं पृथक् पृथक् प्रायश्चित्तं सूचितम् परं कतिचनसूत्रकारैः संस्काराणाम् अथवा दोषाणां समुच्चयम् उक्त्वा सर्वेषां दोषाणां निमित्तम् एकमेव प्रायश्चित्तम् उक्तम्। दोषः यः कोऽपि भवतु प्रायश्चित्तं समानमेव।

१७) प्रायश्चित्तस्य स्वरूपम् अपराधानुसारं न्यूनाधिकं वर्तते। कुत्रचित् केवलं विष्णोः स्मरणमात्रेण प्रायश्चित्तं भवति। कुत्रचित् आहुतयः नाम होमः कर्तव्यः। कुत्रचित्

व्रात्यस्तोमः, वा उद्दालकव्रतम् एवं स्वतन्त्रः विधिरेव सूचितः। यावान् दोषः तावत् प्रायश्चित्तमिति चिन्तनं स्यात्।

१८) प्रायश्चित्तस्य कारणं व्यक्तिसापेक्षं वर्तते। यथा अग्निः तथा च देवतानाम् अन्तरागमने प्रायश्चित्तं सूचितं परं यजमानः यदि अन्तरागमनं करोति तर्हि प्रायश्चित्तं नास्ति। कारणं यजमानः विनाकारणं गमनागमनं नैव करोति।

१९) संस्कारेषु अग्नेः महत्त्वं सर्वत्र दृश्यते। प्रतिसंस्कारविधौ होमस्तु विद्यते। तथैव प्रतिसंस्कारस्य अकरणे अन्यथाकरणे यत् प्रायश्चित्तं सूचितं तदपि होमसहितमेव।

२०) कतिचनप्रायश्चित्तविषयाः कालदृष्ट्या गृह्यसूत्राणां रचनाकाले न स्युः। यतः तस्य मूलं एव तदा न स्यात्। यथा उपनयनसंस्कारे अजिनदण्डमेखलाविषये उल्लेखो सर्वेषु गृह्यसूत्रेषु दृश्यते परं यज्ञोपवीतस्य उल्लेखो सर्वेषु गृह्यसूत्रेषु नास्ति यज्ञोपवीतस्य नष्टे छिन्ने त्यागे प्रायश्चित्तमपि सर्वेषु गृह्यसूत्रेषु उक्तं नास्ति। यज्ञोपवीतस्य नष्टे छिन्ने त्यागे प्रायश्चित्तानि गृह्यसूत्रेषु विरलतया दृश्यन्ते। स्मृतिग्रन्थेषु प्रयोगग्रन्थेषु च विद्यन्ते। गृह्यसूत्रकाले यज्ञोपवीतस्य प्राधान्यं न स्यात्।

२१) जननदोषनिवारणाय केवलं हिरण्यकेशीगृह्यशेषसूत्रे आधिक्येन विस्तरेण विवरणं विद्यते। यमलजननविषये चतुर्षु गृह्यसूत्रेषु उल्लेखो विद्यते। परं चतुर्णां वेदानां सर्वप्रयोगग्रन्थेषु सर्वाः शान्तयः उक्ताः सन्ति।

२२) सर्वेषु गृह्यसूत्रेषु सर्वविधाः संस्काराः वर्णिताः सन्ति परं सर्वेषु गृह्यसूत्रेषु सर्वेषां संस्काराणां विषये तथा च संस्कारस्य अकरणे प्रायश्चित्तानि नोक्तानि। परं प्रयोगग्रन्थेषु सर्वेषामपि संस्काराणाम् उल्लेखाः वर्तन्ते। संस्कारे विहीने किं प्रायश्चित्तं कर्तव्यमित्यपि सूचितमस्ति। सहजतया प्रश्नः भवति यत् यस्मिन् गृह्यसूत्रे यस्य संस्कारस्य विषये उल्लेखो नास्ति तथा च यस्य संस्कारस्य अकरणे प्रायश्चित्तमपि उक्तं नास्ति तस्य गृह्यसूत्रस्य अनुयायिभिः कथम् आचारः कर्तव्यः। कस्मिन् गृह्यसूत्रे कस्य संस्कारस्य विषये प्रायश्चित्तस्य उल्लेखो विद्यते एतदर्थम् अग्रिमपत्रे कोष्टकं रचितमस्ति। तस्य आधारेण ज्ञातुं शक्यते यत् कस्मिन् गृह्यसूत्रे कस्य विषयस्य विवरणं विद्यते। अत्र मीमांसाशास्त्रस्य आधारेण समाधानं प्राप्तुं शक्यते। जैमिनिना रचिते मीमांसाशास्त्रे सर्वशाखाप्रत्ययैककर्मताधिकरणे पूर्वपक्षे शाखाभेदात् कर्मभेदः प्रतिपादितः परं सिद्धान्ते तु या कापि शाखा वा भवतु यत् किमपि कर्म वा भवतु शाखान्तरस्थोपसंहारन्यायेन यः

कोऽपि यस्याः कस्याः अपि शाखायाः अनुयायी सर्वविधं ग्रन्थान्तरेषु उपदिष्टं कर्मानुष्ठानं कर्तुं शक्नोति इति। अनेन न्यायेन प्रयोगग्रन्थेषु सर्वेऽपि संस्काराः सर्वाणि प्रायश्चित्तानि च विद्यन्ते।

सर्वेषु गृह्यसूत्रेषु सर्वेषां संस्काराणां विषये प्रायश्चित्तानि न विद्यन्ते। कस्मिन् गृह्यसूत्रे कस्य संस्कारस्य विषये प्रायश्चित्तं विद्यते। एतत् अधस्तनकोष्टकाधारेण ज्ञातुं शक्यते।

| | गर्भाधा | पुंसव | अनव | सीमन्तो | जातक | नामक | निष्क्रम | अन्नप्रा |
|---|---|---|---|---|---|---|---|---|
| १)अग्नि.गृह्य. | | | | ✓ | ✓ | | | |
| २)आप.गृह्य. | | | | | | | | |
| ३)आश्व.गृह्य. | | | | | | | | |
| ४)काठ.गृह्य. | | | | | | | | |
| ५)कौथु.गृह्य. | | | | | | | | |
| ६)कौशि.गृह्य. | | | | | | | | |
| ७)कौषी.गृह्य. | | | | | ✓ | | | |
| ८)खादि.गृह्य. | | | | | | | | |
| ९)गोभि.गृह्य. | | | | | | | | |
| १०)जैमि.गृह्य. | | | | | | | | |
| ११)पार.गृह्य. | | | | | ✓ | | | |
| १२)बोधा.गृह्य. | ✓ | ✓ | | ✓ | ✓ | ✓ | ✓ | ✓ |
| १३)भार.गृह्य. | | | | | | | | |
| १४)मान.गृह्य. | | | | | | | | |
| १५)वारा.गृह्य. | | | | | | | | |
| १६)वैखा.गृह्य. | ✓ | ✓ | ✓ | ✓ | ✓ | ✓ | ✓ | ✓ |
| १७)शाङ्खा.गृह्य. | | | | ✓ | | | | |
| १८)हिर.गृह्य. | ✓ | | | | ✓ | | | |

| | चौलम् | उपनय. | समाव. | विवाहः | अन्त्येष्टिः | अद्भुतप्रा. | यज्ञीयप्रा. |
|---|---|---|---|---|---|---|---|
| १)अग्नि.गृह्य. | | ✓ | | ✓ | ✓ | ✓ | ✓ |
| २)आप.गृह्य. | | | | ✓ | | | |
| ३)आश्व.गृह्य. | | ✓ | | ✓ | | ✓ | ✓ |
| ४)काठ.गृह्य. | | ✓ | | | | ✓ | ✓ |
| ५)कौथु.गृह्य. | | ✓ | | ✓ | | | |
| ६)कौशि.गृह्य. | | ✓ | | ✓ | ✓ | | |
| ७)कौषी.गृह्य. | | ✓ | | ✓ | | | |
| ८)खादि.गृह्य. | | ✓ | | | | | |
| ९)गोभि.गृह्य. | | ✓ | | | | ✓ | ✓ |
| १०)जैमि.गृह्य. | | ✓ | | | ✓ | ✓ | ✓ |
| ११)पार.गृह्य. | | ✓ | | | | ✓ | |
| १२)बोधा.गृह्य. | ✓ | ✓ | | ✓ | ✓ | ✓ | ✓ |
| १३)भार.गृह्य. | | | | ✓ | | | ✓ |
| १४)मान.गृह्य. | | ✓ | | | | ✓ | |
| १५)वारा.गृह्य. | | ✓ | | | | | ✓ |
| १६)वैखा.गृह्य. | ✓ | ✓ | ✓ | ✓ | ✓ | | ✓ |
| १७)शाङ्खा.गृह्य. | | ✓ | | ✓ | | ✓ | ✓ |
| १८)हिर.गृह्य. | | ✓ | | ✓ | | | ✓ |

**सङ्क्षेपाः**१)गर्भाधानम्(गर्भाधा),२)पुंसवनम्(पुंसव),३)अनवलोभनम्(अनव),४)सीमन्तोन्नयनम्(सीमन्तो),५)जातकर्म(जातक),६)नामकरणम्(नामक),७)निष्क्रमणम्(निष्क्रम), ८)अन्नप्राशनम्(अन्नप्रा),९)चौलम्(चौलम्),१०)उपनयनम्(उपनय),११)समावर्तनम्(समाव),१२)विवाहः(विवाहः),१३)अन्त्येष्टिः(अन्त्येष्टिः),१४)अद्भुतप्रायश्चित्तानि(अद्भुतप्रा), १५)यज्ञीयप्रायश्चित्तानि(यज्ञीयप्रा)

## आधुनिके युगेऽपि प्रायश्चित्तानाम् उपयोगिता

आधुनिके युगे प्रायश्चित्तानाम् उपयोगिता अस्ति न वा इति प्रश्नः स्यात्। कारणम् अत्र उक्तानि प्रायश्चित्तानि संस्काराणाम् अकरणे वा अन्यथाकरणे उक्तानि सन्ति। अत्र संस्कारस्य अन्यथाकरणे नाम अयोग्ये समये करणे अयोग्यपद्धत्या करणे इति आशयोऽस्ति। ये संस्काराः मनुष्यजीवने उपयुक्ताः तेषां समाजजीवनेऽपि उपयोगिता स्यादेव। अतः तेषां संस्काराणाम् अकरणे, अन्यथाकरणे च समाजजीवने अव्यवस्था भवेत् इति भीत्या तदर्थं प्रायश्चित्तानि उक्तानि सन्ति। अतः प्रायश्चित्तेषु सामाजिकः आशयः स्यात्। समाजजीवने द्विविधाः जनाः भवन्ति। केचन स्वप्रेरणया योग्यम् उपयुक्तम् आचरणं कुर्वन्ति। केचन भीत्या योग्याचरणं कुर्वन्ति। समाजस्य योग्याचरणं भवेत् इति सर्वदा अपेक्षा भवति। परं यदि तादृशं योग्याचरणं न भवेत् तर्हि दण्डेन, प्रायश्चित्तेन योग्याचरणे समाजः आनेतव्यः भवेत्। अनेन स्पष्टमेव यत् समाजस्य धारणाय यदा कदापि आधुनिके युगेऽपि प्रायश्चित्तानि आवश्यकानि एव।

यथा उपनयनसंस्कारस्य कालः उक्तः, उपनयनेन अध्ययनस्य आरम्भः भवति। उपनयनस्य अकरणेन बालस्य अध्ययनस्य आरम्भः न भवेत्, अतः योग्ये वयसि अध्ययनस्य अकरणेन समाजाय शिक्षिताः युवकाः प्राप्ताः न भवेयुः। अतः प्रायश्चित्तम् उक्तम्। अन्यत् च ब्रह्मचारिणः आचरणविषये नियमाः उक्ताः सन्ति। तेषां नियमानाम् आचरणं यदि न कृतं तर्हि प्रायश्चित्तमुक्तम्। तत्र उक्ताः कतिचन नियमाः एवं सन्ति। सूर्योदयात् पूर्वम् उत्थितव्यम्, सन्ध्यावन्दनं कर्तव्यम्, स्त्रिया सह सम्पर्कः न भवेत्, निषिद्धदेशगमनं न कर्तव्यम् इत्यादयः। एतेषां नियमानाम् आचरणेन अध्ययनं योग्यरीत्या भवतु इति अपेक्षा अस्ति। अन्यत् च सहोदराणां विवाहः क्रमानुसारं कर्तव्यः, परं ज्येष्ठे अविवाहिते कनिष्ठेन विवाहः कृतः तदा प्रायश्चित्तमुक्तम्। अत्र समानकुटुम्बे सर्वेषां सहोदराणां संस्कारविषये समानपद्धत्या चिन्तनम् आचरणं च भवतु इति भावः स्यात्। यथा जन्मनः क्रमः तथैव संस्काराणामपि क्रमः भवतु इति। अद्यापि ज्येष्ठे अविवाहिते कनिष्ठेन विवाहः कृतः तदा समाजे काचित् अमान्यता दृश्यते। ज्येष्ठेन किमर्थं विवाहो न कृतः इत्यस्य जिज्ञासापि भवति। अतः संस्कारेपि क्रमः अनुसर्तव्यो भवति।

संस्कारेषु आरोग्यदृष्ट्या शरीरशास्त्रदृष्ट्या अपि चिन्तनं विद्यते। तत्र गर्भकाले गर्भस्य कथं कीदृशं वर्धनं भवति इति विषये साधारणाः अनुभवाः सन्ति। तत्र किञ्चिदपि

अयोग्यता न भवतु इति धिया गर्भिण्या कथं वर्तितव्यम् इत्यपि सूचितमस्ति। तद्भिन्नं यदि आचरितं जननवैकृतता भवेत्। तदा जननवैकृते शान्तिः नाम प्रायश्चित्तं सूचितम्। यथा अन्नप्राशनसंस्कारः जन्मनः षष्ठे मासि नाम पचनसंस्थायाः विकासानन्तरं भवति। ततः पूर्वं अन्नस्य भक्षणेन बालकस्य पचने क्लेषाः भवेयुः। अतः योग्ये निर्धारिते समये एव अन्नप्राशनं भवेत् अन्यथा प्रायश्चित्तं सूचितम्। उपनयनकालविषयेऽपि चिन्तनं स्यात्। यत् बालकस्य बुद्धेः विकासः यदा भवति यदा बालकः गुरुगृहं गत्वा वासं कृत्वा अध्ययनं कर्तुं शक्नुयात् तदा उपनयनं कर्तव्यम् न तु विलम्बेन।

## अग्रिमं संशोधनम्

प्रबन्धेऽस्मिन् गृह्यसूत्राणामेव सन्दर्भाः स्वीकृताः सन्ति। परम् अन्येऽपि कतिचन ग्रन्थाः विषयममुं प्रस्तावयन्ति। यथा एतेषां गृह्यसूत्राणां भाष्यग्रन्थाः, स्मृतिग्रन्थाः, प्रयोगग्रन्थाः, विवरणग्रन्थाः। एतादृशेषु कतिचनग्रन्थेषु संस्काराणां विषये तथा च संस्काराणाम् अकरणे प्रायश्चित्तानि विवृतानि सन्ति। तेषां सङ्ग्रहः तथा च तेषाम् अद्यतने कालेऽपि उपयोगिता अध्येतव्या भवेत्।

# परिशिष्टम् १

## सन्दर्भग्रन्थसूचिः

### मूलग्रन्थाः(गृह्यसूत्राणि)


१) **अग्निवेश्यगृह्यसूत्रम्**, १) सम्पा. टी. गणपतिशास्त्री, अनन्तशयनसंस्कृतग्रन्थावलिः, तिरुवनन्तपुरम्, १९२३,
२) सम्पा. एल्. ए. रविवर्मा, त्रावणकोरसंस्कृतसिरिज, त्रावणकोर, १९४०

२) **आपस्तम्बगृह्यसूत्रम्**, १) सम्पा. चिन्नस्वामीशास्त्री, चौखम्बासंस्कृतसिरिज, वाराणसी, १९२८
२) सम्पा. पाण्डेय उमेशचन्द्रः, चौखम्बासंस्कृतसिरिज, वाराणसी, १९७१

३) **आश्वलायनगृह्यसूत्रम्**,
**आश्वलायनगृह्यपरिशिष्टम्**, सम्पा. गोखले गणेश, आनन्दाश्रमसंस्था, पुणे, १९७८

४) **काठक(लौगाक्षी)गृह्यसूत्रम्**, सम्पा. कालण्ड विलेम, मेहरचन्द लछमन्दास, नवी दिल्ली, २००८

५) **कौथुमगृह्यसूत्रम्**, मूलमात्रम्, महर्षि युनिवर्सिटी वेदिक लिटरेचर कलेक्शन

६) **कौशिकगृह्यसूत्रम्**, सम्पा. सिंह उदयनारायण, चौखम्बासंस्कृतसिरिज, वाराणसी, २००९

७) **कौषीतकगृह्यसूत्रम्**, सम्पा. टी. आर्. चिन्तामणि, मेहरचन्द लछमन्दास, नवी दिल्ली, २००४

८) **खादिर(द्राह्यायण)गृह्यसूत्रम्**, १) सम्पा. पट्टाभिरामार्यः, आनन्दताण्डवपुरम्, मद्रास, १९५५,
२) सम्पा. शर्मा श्रीराम, संस्कृति संस्थान, बरेली, १९७२

९) **गोभिलगृह्यसूत्रम्**, सम्पा. मालवीय सुधाकर, चौखम्बासंस्कृतसंस्थान, वाराणसी, १९९७

१०) **जैमिनिगृह्यसूत्रम्,** सम्पा. कालण्ड विलेम, मोतिलालबनारसीदास, लाहोर, १९२२

११) **पारस्करगृह्यसूत्रम्,** सम्पा. मुल्लपूडि सीतारामशास्त्री, वेङ्कटेशवेदविश्वविद्यालयः, तिरुपति, २००९

१२) **बोधायनगृह्यसूत्रम्,**

**बोधायनगृह्यपरिभाषासूत्रम्,**

**बोधायनगृह्यशेषसूत्रम्,**

**बोधायनपितृमेधसूत्रम्** सम्पा. एल्. श्रीनिवासाचारी, आर्. शामशास्त्री, प्राच्यविद्यासंशोधनालयः, मैसूर, १९८३

१३) **भारद्वाजगृह्यसूत्रम्,** सम्पा. सालोमन जे. डब्ल्यू., मेहरचन्द लछमन्दास, नवी दिल्ली, २००४

१४) **मानवगृह्यसूत्रम्,** १) सम्पा. क्रावर, सेन्ट पीटरबर्ग, पॅरिस, १८९७,

२) सम्पा. पाठक रामकृष्ण हर्ष, सेन्ट्रल लायब्ररी, बडोदा, १९२६

१५) **वाराहगृह्यसूत्रम्,** सम्पा. रघुवीर, मेहरचन्द लछमन्दास, नवी दिल्ली, १९८२

१६) **वैखानसगृह्यसूत्रम्,** १) सम्पा. पार्थसारथिभट्ट आकुलमन्नाडु, तिरुपतितिरुमला देवस्थानम्, तिरुपति, १९९७,

२) सम्पा. कालण्ड विलेम, मेहरचन्द लछमन्दास, नवी दिल्ली, १९८९

१७) **शाङ्खायनगृह्यसूत्रम्,** सम्पा. शर्मा श्रीराम, संस्कृति संस्थान, बरेली, १९७२

१८) **हिरण्यकेशिगृह्यसूत्रम्,**

**हिरण्यकेशिगृह्यशेषसूत्रम्,** सम्पा. मारुलकर शङ्कर, आनन्दाश्रमसंस्था, पुणे, १९२९

## मूलग्रन्थाः(प्रयोगग्रन्थाः)


१) **ऋग्वेदीयब्रह्मकर्मसमुच्चयः**, सम्पा. शेङ्ये गणेशशास्त्री, पुणे,

२) **कौशिकपद्धतिः**, सम्पा. लिमये, दांडेकर, काशीकर, भिडे, बहुलकर, टिळकमहाराष्ट्रविद्यापीठ, पुणे, १९०३

३) **प्रयोगरत्नम्**, सम्पा. पणशीकर वासुदेव लक्ष्मण, अनमोलप्रकाशन, पुणे, १९९७

४) **बोधायनीयब्रह्मकर्मसमुच्चयः**,सम्पा. गायत्री साम्ब नारायण, श्री मेधा दक्षिणामूर्तिसंस्कृत विद्यापीठ, गोकर्ण, उ.कन्नड, १९७०

५) **शुक्लयजुःशाखीयकर्मकाण्डप्रदीपः**, सम्पा. वारे अण्णाशास्त्री आत्याजी, अनमोल प्रकाशन, पुणे, २००३

६) **हिरण्यकेशीयब्रह्मकर्मसमुच्चयः**,सम्पा. पणशीकर वासुदेव लक्ष्मण, अनमोल प्रकाशन, पुणे, १९९५


## मूलग्रन्थाः(अन्ये)


१) **अथर्ववेदसंहिता**, सम्पा. सातवळेकर श्रीपाद दामोदर, स्वाध्यायमण्डलम्, पारडी, सुरत, १९५७

२) **आश्वलायनश्रौतसूत्रम्**, सम्पा. विद्यारत्न रामनारायण, एशियाटिक सोसायटी, कलकत्ता, १८७४

३) **ऋग्वेदसंहिता**, सम्पा. सातवळेकर श्रीपाद दामोदर, स्वाध्यायमण्डलम्, औन्ध, सातारा, महाराष्ट्र, १९४०

४) **ऐतरेयब्राह्मणम्**, सम्पा. कुलसचिव, राष्ट्रीयसंस्कृतसंस्थानम्, नवी दिल्ली, २००६

५) **कृष्णयजुर्वेदीयतैत्तिरीयसंहिता**, सम्पा. सातवळेकर श्रीपाद दामोदर, रामलाल कपूर ट्रस्ट, बहालगढ, सोनिपत, हरयाणा, १९८३

६) **कौटिलीयम् अर्थशास्त्रम्**, सम्पा. कङ्गले र. पं., महाराष्ट्र राज्य साहित्य संस्कृति मंडळ, पुणे, १९८२

७) **जैमिनीयन्यायमाला**, सम्पा. पण्डित शिवदत्त बदरीनाथ, आनन्दाश्रमसंस्था, पुणे, १९४६

८) **प्रायश्चित्तमयूखः**, सम्पा. भट्ट अनन्त यज्ञेश्वर, चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली, १९८६

९) **बौधायनश्रौतसूत्रम्**, सम्पा. कालण्ड विलेम, एशियाटिक सोसायटी, कलकत्ता, १९१३

१०) **मनुस्मृतिः**, सम्पा. पणशीकर वासुदेव लक्ष्मण, निर्णयसागरमुद्रणालयः, मुम्बई, १९१५

११) **वैयाकरणसिद्धान्तकौमुदी**, सम्पा. साठे महादेव दामोदर, संस्कृतविद्यापरिसंस्था, पुणे, १९६५

१२) **शुक्लयजुर्वेदवाजसनेयीमाध्यन्दिनसंहिता**, सम्पा. सातवळेकर श्रीपाद दामोदर, स्वाध्यायमण्डलम्, औन्ध, सातारा, महाराष्ट्र, १९४७

१३) **सामवेदसंहिता**, सम्पा. सातवळेकर श्रीपाद दामोदर, स्वाध्यायमण्डलम्, औन्ध, सातारा, महाराष्ट्र, १९४०

१४) **षड्विंशब्राह्मणम्**, सम्पा. शर्मा बेलिकोट रामचन्द्र, केन्द्रीयसंस्कृतविद्यापीठ, तिरुपति, १९८३


### आधुनिकग्रन्थाः


१) उपाध्याय काशिनाथ, **धर्मसिंधुः**, अनमोल प्रकाशन, पुणे, २००३

२) काशीकर चिन्तामणि गणेश, **श्रौतधर्माची स्वरूप चिकित्सा**, पुणे विद्यापीठ, पुणे, १९७७

३) क्षीरसागर बाळ रावजी, **षोडशसंस्काररत्नमाला**, श्रीनारायणाश्रम प्रकाशन संस्था, पुणे, १९७१

४) भट यशवन्त आबाजी, **धर्मशास्त्राचा इतिहास**, **सारांशरूप**, महाराष्ट्र राज्य साहित्य संस्कृति मंडळ, पुणे, १९८०

५) मोघे गोविन्द रामचन्द्र, **जोतिर्मयूखः**, तुकाराम बुक डेपो, मुम्बई, १९८४

## कोशग्रन्थाः

१) ओक जनार्दन विनायक, **गीर्वाणलघुकोशः**, द्वारकाबाई ओक, सरस्वतीबाई मराठे, बिहार,१९६०

२) जोशी महादेवशास्त्री, **भारतीय-संस्कृति-कोशः**,भारतीयसंस्कृतिकोशमंडळ, १९८५

३) देव राजा राधाकान्त, **शब्दकल्पद्रुमः**, **तृतीयोभागः**, चौखम्बासंस्कृतसिरीज ऑफिस, वाराणसी, १९६७

४) भट्ट तारानाथ तर्कवाचस्पतिः,**वाचस्पत्यम्**, **षष्ठोभागः**, चौखम्बासंस्कृतसिरीज ऑफिस, वाराणसी, १९६२

५) मुळे रवीन्द्र, **श्रौतप्रायश्चित्तिकोशः**, प्रतिभा प्रकाशन, दिल्ली, २००४

६) Sastry V. Kutumba, **Directory of Doctoral Dissertations on Sanskrit of Indian Universities,** Rashtriya Sanskrit Sansthan, New Delhi , 2006

# परिशिष्टम् २

## मन्त्रसूचिः

एतस्मिन् प्रबन्धे उल्लिखिताः वेदमन्त्राः मन्त्रसूच्यां स्वीकृताः सन्ति। धार्मिकप्रयोगेषु ब्राह्मणवाक्यानि, उपनिषद्मन्त्राः, श्रौतगृह्यसूत्रेषु विद्यमानाः सौत्रमन्त्राश्च उपयुक्ताः भवन्ति। सर्वेषां मन्त्राणां प्रयोगग्रन्थेषु उल्लेखाः उपलभ्यन्ते। यद्यपि कतिचन मन्त्राः बहुत्र आगताः तथापि प्रयोगसन्दर्भे यस्य वेदस्य तत् गृह्यसूत्रम् तस्य वेदस्य पठनपद्धत्या मन्त्रस्य पठनं उच्चारणं कर्तव्यम्। पठनपद्धतिविषये प्रयोगकुशलाः याज्ञिकाः एव प्रमाणभूताः।

| **मन्त्रः** | **आकरः** |
|---|---|
| अक्षितोऽस्य क्षित्यै | (कृ.य.१.७.३.१३) |
| अग्नये क्षामवते | (कृ.य.२.२.२.७) |
| अग्निर्मूर्धा | (ऋ.८.४४.१६) (शु.य.१३.१४) (कृ.य.१.५.५.३)(सा.२७,१५३५) |
| अग्नी रक्षांसि सेधति | (ऋ.७.१५.१०)(अ.८.३.२६) |
| अग्ने अङ्गिरः | (शु.य.१२.८)(कृ.य.४.२.१.७) |
| अग्नेऽभ्यावर्तिन् | (शु.य.१२.७)(कृ.य.४.२.१.६) |
| अतो देवा | (ऋ.१.२२.१६)(सा.१६७४) |
| अद्या नो देव सवितः | (ऋ.५.८.२४)(सा.१४१) |
| अभिन्नो घर्मो जीरदानुः | (कृ.य.१.५.१०.१२) |
| अयं ते योनिर्ऋत्वियः | (ऋ.३.२९.१०)(शु.य.३.१४)(कृ.य.१.५.५.२)(अ.३.२०.१) |
| अयाविष्ठाजनयन्कर्वराणि | (कृ.य.१.७.१२.११) |
| अस्वप्न | (ऋ.४.४.१२)(कृ.य.१.२.१४.१२) |
| आ गावः | (ऋ.६.२८.१)(अ.४.२१.१) |
| आजुह्वानः | (ऋ.१०.११०.३)(शु.य.१७.७३)(कृ.य.४.६.५.१०)(अ.५.१२.३) |
| आपोहिष्ठामयोभुवः | (ऋ.१०.९.१)(शु.य.११.५०)(कृ.य.४.२.५.२)(सा.१८३७)(अ.१.५.१) |
| आप्यायस्व | (ऋ.१.९१.१६,९.३.१४)(शु.य.१२.११२)(कृ.य.३.२.५.८,) |
| आयुर्दा अग्न | (कृ.य.२.५.१२.२,१.३.१४.१२) |

इदं विष्णुर्विचक्रमे(ऋ.१.२२.१७)(शु.य.५.१५)(कृ.य.१.२.१३.४)(सा.२२२)(अ.७.२६.४)

इदमापः प्रवहत (ऋ.१.२३.२२,१०.९.८)(शु.य.६.१७)(अ.७.८९.३)

इन्द्रं नरो (ऋ.७.२७.१)(कृ.य.२.१.११.२,३.१४.४.३)(सा.३१८)

इन्द्रं वो विश्वतस्परि (ऋ.१.७.१०)(कृ.य.१.६.१२.१)(सा.१६२०)(अ.२०.३९.१)

इन्द्रो यज्वने (ऋ.६.२८.२)(अ.४.२१.२)

इन्धानास्त्वा शतं हिमा (कृ.य.१.५.५.१८)

इमं मे वरुण (ऋ.१.२५.१९)(शु.य.२१.१)(कृ.य.२.१.११.२१)(सा.१५८५)

इरावती (ऋ.७.९९.३)(शु.य.५.१६)(कृ.य.१.२.१३.५)

इह धृतिस्स्वाहा (कृ.य.७.१.१२.७)

इहरतिः (शु.य.८.५१)

इह विधृतिस्स्वाहा (कृ.य.७.१.१२.८)

उन्नम्भय पृथिवीम् (कृ.य.२.४.८.९,३.५.५.४)

उद्बुध्यस्वाग्ने (शु.य.१५.५४,१८.६१)

उद्वयं तमस (ऋ.१.५०.१०)(शु.य.२०.११)(कृ.य.४.१.७.४)(अ.७.५३.७)

कयानश्चित्रआभुवत्(ऋ४.३१.१)(शु.य२७.३९)(कृ.य४.२.११.९)(सा१६९)(अ२०.१२४.१)

कामस्तदग्रे (ऋ.१०.१२९.४)

को अद्य युङ्क्ते (ऋ.१.८४.१६)(कृ.य.४.२.११.१०)(सा.३४१)(अ.१८.१.६)

गन्धर्वोऽसि (कृ.य.१.१.११.१०)

गन्धद्वारा (ऋ.२.६.९)

जीवां रुदन्ति विमयन्त (ऋ.१०.४०.१०)(अ.१४.१.४६)

ततं मे आपः (ऋ.१.११०.१)

तत्वायामि (ऋ.१.२४.११)(शु.य.१८.४९,२१.२)(कृ.य.२.१.११.२२)

तत्सवितुर्वरेण्यम् (ऋ.३.६२.१०)(शु.य.३०.२)(कृ.य.१.५.६.१२)(सा.१४६२)

तस्माद्यज्ञात्सर्वहुत (ऋ.१०.९०.८)(शु.य.३१.६)(ऋ.१९.६.१३)

त्रयस्त्रिंशत्तन्तव (कृ.य.१.५.१०.११)

त्रिते देवाः (अ. ६.११३.१)

त्रिपादूर्ध्वउदैत्पुरुषः (ऋ.१०.९०.४)(शु.य.३१.४)(सा.६१८)(अ.१९.६.२)

| | |
|---|---|
| त्वमग्ने व्रतपा असि | (ऋ.८.११.१)(शु.य.४.१६)(कृ.य.१.१.१४.१३)(अ.१९.५९.१) |
| त्वं नो अग्ने | (ऋ.४.१.४)(शु.य.२१.३)(कृ.य.२.५.१२.२२,४.२.११.१९) |
| दधिक्राव्णो | (ऋ.४.३९.६)(शु.य.२३.३२)(कृ.य.१.५.११.११)(सा.३५८)(अ.२०.१३७.३) |
| देवस्यत्वा सवितुः | (शु.य.१.१०,२१,२४)(कृ.य.१.१.४.९) |
| देवाः कपोत | (ऋ.१०.१६५.१)(अ.६.२७.१) |
| नमो अस्तु सर्पेभ्यः | (ऋ.९३९खिल)(शु.य.१३.६)(कृ.य.४.२.८.७) |
| निर्ऋत्यै त्वा | (कृ.य.१.२.३.१६) |
| पाहि नो अग्न | (शु.य.२७.४३)(सा.३६,१५४४) |
| पुनर्मैत्विन्द्रियम् | (अ.७.६७.१) |
| पुनरग्निश्चक्षुरदात् | (कृ.य.३.२.५.१२) |
| पुनरूर्जा | (शु.य.११.४०)(कृ.य.१.५.३.९)(सा.१८३२) |
| पुनस्त्वादित्या रुद्रा | (शु.य.१२.४४)(कृ.य.४.२.३.१३,५.२.२.१९) |
| पुरुष एवेदं सर्वम् | (ऋ.१०.९०.२)(शु.य.३१.२)(सा.६१९)(अ.१९.६.४) |
| पूर्णा पश्चात् | (कृ.य.४.४.१०.२८) |
| पृथिवि देवयजन् | (शु.य.१.२५) |
| प्रजापते | (ऋ.१०.१२१.१०)(शु.य.१०.२०)(कृ.य१.८.१४.१२)(अ.७.७९.४) |
| प्रजापतिर्जय | (कृ.य.३.४.४.१३) |
| प्रत्यग्ने | (ऋ.१०.८७.२५)(सा.९५) |
| प्रत्नो हि | (ऋ.८.११.१०) |
| प्राणापानौ | (कृ.य.३.१.७.६,३.१.७.५) |
| बृहस्पते सवितः | (शु.य.२७.८)(कृ.य.४.१.७.८) |
| ब्राह्मणोऽस्य मुखमासीत् | (ऋ.१०.९०.१२)(अ.१९.६.६) |
| भद्रं कर्णेभिः | (ऋ.१.८९.८)(शु.य.३१.११)(सा.१८७४) |
| भवतं नः समनसौ | (शु.य.५.३,१२.६०)(कृ.य.१.३.७.१३,४.२.५.४) |
| भुवः | (कृ.य.१.५.११.१४,७.४.२०.२) |
| भूर्भुवस्सुवरोम् | (कृ.य.५.५.५.९) |
| भूमिर्भूम्ना | (कृ.य.१.५.३.१) |

भूः स्वाहा (कृ.य.१.६.२.७,७.४.२०.१)

मधुश्चस्वाहा,माधवश्चस्वाहा (कृ.य.१.४.१४.१,४.४.११.१)

मनो ज्योतिर्जुषताम् (शु.य.२.१३)(कृ.य.१.५.३.७)

मय्यग्रे (अ.७.८२.२)

मा ज्येष्ठम् (अ.६.११२.१)

मानस्तोके (ऋ.१.११४.८)(शु.य.१६.१६)(कृ.य.३.४.११.८,४.५.१०.६)

मूर्धानं दिवः (ऋ.६.७.१)(शु.य.७.२४)(कृ.य.१.४.१३.१)(सा.६७,११४०)

य ऋते चिदभिश्रिष (ऋ.८.१.१२)(सा.२४४)(अ.१४.२.४७)

यच्च गोषु दुष्वप्नम् (ऋ.८.४७.१४)

यच्चिद्धि ते विशो (ऋ.१.२५.१)(कृ.य.३.४.११.१८)

यज्ञेन यज्ञमयजन्त (ऋ.१.१६४.५०,१०.९०.१६)

यत इन्द्रभयामहे (ऋ.९.६१.१३)(सा.२७४,१३२१)(अ.१९.१५.१)

यत्किं चेत् (ऋ.७.८९.५)(कृ.य.३.४.११.१९)(अ.६.५१.३)

यत्ते कृष्णः (ऋ.१०.१६.६)(अ.१८.३.५५)

यत्ते देवी (कृ.य.४.२.५.८)

यत्पाकत्रा (ऋ.१०.२.५)

यद्देवा देवहेळनम् (शु.य.२०.१४)

यद्वा उ विश्पतिः शितः (ऋ.८.२३.१३)(सा.११४)

यद्वो वयम् (ऋ.१०.२.४)(अ.१९.५९.२)

यन्म आत्मनो मिन्दाऽभूत्(कृ.३.२.५.११)

यमाय त्वा (शु.य.३७.११,३८.९)

यस्त्वा हृदाकीरिणा (ऋ.५.४.१०,कृ.य.१.४.४६.१)

यस्मै त्वं सुकृते जातवेदः(ऋ.५.४.११)(कृ.य.१.४.४६.२)

याते अग्ने (ऋ.३.५७.६,कृ.य.१.२.११.४,६.२.२.१३)

ये देवा यज्ञहनो (कृ.य.३.५.४.१)

येन देवाः पवित्रेण (सा.१३०२)

येन सूर्य ज्योतिषा (ऋ.१०.३७.४)

रुद्राय त्वा (कृ.य.१.२.३.१७)

वास्तोष्पते प्रती (ऋ.७.५४.१)(कृ.य.३.४.१०.१)

विष्णो त्वन्नो अन्तमः (कृ.य.३.१.१०.९)

विष्णोर्नुकं वीर्याणि (ऋ.१.१५४.१)(शु.य.५.१८)(कृ.य१.२.१३.९)(अ.७.२६.१)

वेदाहमेतं पुरुषं (शु.य.३१.१८)

शतमिन्नु शरदो अन्ति (ऋ.१.८९.९)

शं नः इन्द्राग्नी (ऋ.७.३५.१)(अ.१९.१०.१)

शुक्रमसि (कृ.य.१.१.१०.१७)

सं त्वा सिञ्चामि (कृ.य.१.६.१.१)

स त्वं नो अग्ने (ऋ.४.१.५)(शु.य.२१.४)(कृ.य.२.५.१२.२३)

सदस्पतिमद्भुतम् (ऋ.१.१८.६)(शु.य.३२.१३)(सा.१७१)

सनादग्न (ऋ.१०.८७.१९)(सा.८०)(अ.५.२९.११)

सप्त ते अग्ने समिधः (शु.य.१७.७९)(कृ.य.१.५.२.१४,१.५.३.१४)

समीची नामासि (कृ.य.५.५.१०.१)

समुद्रादूर्मि (ऋ.४.५८.१)(शु.य.१७.८९)

समुद्राय (शु.य.३८.७,२४.२१)(कृ.य.७.२.२०.८)

सहरय्या (शु.य.१२.१०,१२.४१) (कृ.य.१.५.३.१०,४.२.१.९) (सा.१८३३)

सहस्रशीर्षा पुरुष (ऋ.१०.९०.१)(शु.य.३१.१)(सा.६१७)(अ.१९.६.१)

सोमाय (कृ.य.१.८.१३.२१,७.१.१४.२)

स्वस्ति न इन्द्रो वृद्धश्रवाः(ऋ.१.८९.६)(शु.य.२५.२९)(सा.१८७५)

स्वस्ति नो मिमीता (ऋ.५.५१.११)

हिरण्यवर्णाम् (ऋ.२.६.१)(कृ.य.५.६.१.१)

मन्त्रसूच्याम् उपयुक्ताः सङ्क्षेपाः

१) ऋग्वेदः - ऋ.

२) शुक्लयजुर्वेदः - शु.य.

३) कृष्णयजुर्वेदः - कृ.य.

४) सामवेदः - सा.

५) अथर्ववेदः - अ.

# परिशिष्टम् ३

## शब्दसूचिः

- अङ्गहोमः - यज्ञे निर्धारितविशिष्टदेवतानिमित्तं विशिष्टस्य हविर्द्रव्यस्य होमः भवति। परं होमस्य, यागस्य अवान्तरदेवतानिमित्तं प्रायश्चित्तादि यागः, होमः अङ्गहोमः।
- अब्लिङ्गमन्त्राः - येषां मन्त्राणां अप् देवता स्यात्।
- अतिकृच्छ्रम् - एकं प्रायश्चित्तम् ६.२ प्रकरणे द्रष्टव्यम्।
- अरणिः - काष्ठस्य काष्ठेन सह घर्षणं कृत्वा अग्निनिर्माणस्य यन्त्रम्। चित्रसङ्ग्रहे सविस्तरं विवरणं द्रष्टव्यम्।
- अवकीर्णि - स्त्रीसंसर्गेण ब्रह्मचारिणः व्रतलोपः भवति तदा अवकीर्णिः इति संज्ञा भवति।
- अवभृथम् - श्रौतयागस्य अन्ते या इष्टिः भवति, यत् स्नानं भवति।
- आग्नेयम् - येषां मन्त्राणाम् अग्निर्देवता। यस्य हविर्भागस्य अग्निर्देवता।
- आग्रयणम् - आग्रयणं नाम नवीनं धान्यं यदा कृषिक्षेत्रात् आनीतं भवति तदा प्रथमं नवीनस्य धान्यस्य उपयोगं कृत्वा होमः कर्तव्यः। तदनन्तरमेव तस्य धान्यस्य उपयोगः पाकार्थं करणीयः। वैशाखपौर्णिमायां यवाग्रयणम्, आश्विनपौर्णिमायां व्रीह्याग्रयणम्।
- आघार - वायव्यकोणमारभ्य आग्नेयकोणपर्यन्तं तथा च निर्ऋतिकोणमारभ्य ईशानिकोणपर्यन्तं प्रजापतिदेवतानिमित्तं आज्यहोमः।
- उद्दालकम् - एकं प्रायश्चित्तम् ६.२ प्रकरणे द्रष्टव्यम्।
- एकोदिष्टम् - मृतस्यनिमित्तं एकादशदिने कर्तव्यं श्राद्धम्।
- ऐन्द्रम् - येषां मन्त्राणां इन्द्रदेवता। यस्य हविर्भागस्य इन्द्रदेवता।
- औपासनम् - विवाहोत्तरं स्थापितः अग्निः। यस्य रक्षणम् आजीवनं कर्तव्यम्। तस्मिन् क्रियमाणः होमः औपासनहोमः इत्यनेन उच्यते।
- कूश्माण्ड -प्रायश्चित्तहोमार्थं निश्चिताः कतिचन मन्त्राः कूश्माण्डमन्त्राः इत्यनेन प्रसिद्धाः।
- कृच्छ्रम् - एकं प्रायश्चित्तम् ६.२ प्रकरणे द्रष्टव्यम्।

- गायत्रीं - गायत्रीछन्दः प्रसिद्धः परं अत्र गायत्री इत्यनेन *तत्सवितुर्वरेण्यम्* इति मन्त्रः अपेक्षितः। (ऋ.३.६२.१०)(शु.य.३०.२,३.३५,२२.९)(कृ.य.१.५.६.१२)(सा.१४६२)
- चान्द्रायणम् - एकं प्रायश्चित्तम् ६.२ प्रकरणे द्रष्टव्यम्।
- तन्तुन्मती - तन्तुंतन्वन्नजसो इतिमन्त्रेण आहुतिर्जुहुयात्(ऋ.१०.५३.६,कृ.य.३.४.२.२)
- तप्तकृच्छ्रम् - एकं प्रायश्चित्तम् ६.२ प्रकरणे द्रष्टव्यम्।
- दर्भः - यज्ञकर्मणि उपयुक्तं विशिष्टं तृणम्। एतत् कुश इति नाम्नापि उच्यते।
- दर्शपूर्णमासः - दर्शः नाम अमावास्या, पूर्णः नाम पौर्णिमा। प्रतिमासम् एतयोः दिनयोः वैशिष्ट्यं विद्यते। चन्द्रस्य कलानां समाप्तिः यस्मिन् दिने भवति स दर्शः। चन्द्रस्य कलानां पूर्णता यस्मिन् दिने भवति सः पूर्णः। तयोः दिनयोः यः विशिष्टः होमः भवति सः दर्शहोमः वा पूर्णहोमः।
- नवान्नम् - कृषिक्षेत्रात् आनीतं नवीनं धान्यम्। तेन नवीनेन धान्येन होमं कृत्वा एव नवीनं धान्यं भक्षणीयम्। कार्तिकपौर्णिमा नवान्नपौर्णिमा इति नाम्ना उच्यते।
- पञ्चमहायज्ञाः - १)ब्रह्मयज्ञः, २)देवयज्ञः, ३)पितृयज्ञः, ४)भूतयज्ञः, ५)मनुष्ययज्ञः
- परिधिः - होमसमये होमकुण्डात् बहिः दीर्घां पलाशशाखां स्थापयन्ति। एताः शाखाः त्रिषु दिक्षु स्थापयन्ति। पूर्वस्यां दिशि न स्थापयन्ति। एताः शाखाः एतावता दीर्घाः भवेयुः यथा शाखायाः मूलं अन्यस्याः शाखायाः अग्रे स्पृष्टं भवेत्।
- परिसमूहनम् - परिस्तरणानां स्थापनातः पूर्वम् अग्निं परितः ईशानीमारभ्य प्रदक्षिणं जलेन प्रोक्षणम्।
- परिस्तरणानि - होमकुण्डस्य बहिर्भागे चत्वारः चत्वारः दर्भाः स्थापिताः भवन्ति। तान् परिस्तरणानि इति उच्यन्ते। यावान् होमकुण्डस्य आकारः भवति ततोपि किञ्चित् दीर्घाः दर्भाः भवन्ति। तेन दर्भाणां अग्राणि मूलानि च स्पृष्टानि भवन्ति। होमारम्भे ते दर्भाः स्थापिताः भवन्ति होमसमाप्तौ च निष्कासिताः भवन्ति।
- पर्युक्षणम् - परिस्तरणानां स्थापनं कृत्वा पुनः अग्निं परितः ईशानीमारभ्य प्रदक्षिणं जलेन प्रोक्षणम्।
- पादकृच्छ्रम् - एकं प्रायश्चित्तम् ६.२ प्रकरणे द्रष्टव्यम्।

- पार्वणम् - दर्शः नाम अमावास्या, पूर्णः नाम पौर्णिमा एतयोः पर्वणि क्रियमाणं कार्यं होमादिकम्।
- पावमानी/पवमान - ऋग्वेदस्य नवममण्डले विद्यमानाः पवमानमन्त्राः।
- पिण्डपितृयज्ञः - पितराणां निमित्तम् अमावास्यायां कर्तव्यः यज्ञः।
- पुनराधानम् - अग्नेः स्थापना आधानम्। यदि दीर्घकालम् अग्नेः नाशः उपशमः वा भवेत् तदा अग्नेः विधिपूर्वकं पुनःस्थापना कर्तव्या तत् पुनराधानम्।
- पुरुषसूक्तम् - सहस्रशीर्षा इत्यनेन आरब्धं पुरुषदेवताकं सूक्तम्। (ऋ.१०.९०.१) (शु.य.३१.१) (सा.६१७) (अ.१९.६.१)
- पूर्णाहुतिः - होमस्य समाप्तिनिमित्तम् दीयमाना आज्याहुतिः।
- पैतृकम् - पितृसम्बन्धी कार्यम् श्राद्धादिकम्।
- प्रणवम् - ओङ्कारः। सप्रणवं नाम ओङ्कारसहितम्।
- प्राजापत्या - येषां मन्त्राणां प्रजापतिर्देवता। यस्य हविर्भागस्य प्रजापतिर्देवता।
- बर्हिः - यज्ञकुण्डस्य पश्चिमभागे आज्यस्थालीं, दर्वीं, हविर्द्रव्यं च स्थापयितुं बर्हिं प्रसारयन्ति। बर्हिः दर्भस्य भवति।
- बार्हस्पत्यम् - येषां मन्त्राणां बृहस्पतिर्देवता। यस्य हविर्भागस्य बृहस्पतिर्देवता।
- ब्राह्मम् - येषां मन्त्राणां ब्रह्मादेवता।यस्य हविर्भागस्य ब्रह्मादेवता।
- महाव्याहृतिः - भूर्भुवःस्वः एषा महाव्याहृतिः।
- महासान्तपनम् - एकं प्रायश्चित्तम् ६.२ प्रकरणे द्रष्टव्यम्।
- मारुतम् - येषां मन्त्राणां मरुत् देवता। यस्य हविर्भागस्य मरुत् देवता।
- मासि/मासिकश्राद्धम् - मृतस्यनिमित्तं मृतात् दिनात् प्रतिमासं कर्तव्यम् श्राद्धम्।
- मिन्दाहुती - यज्ञसमये हवनीयद्रव्याणाम् अग्नेश्च केशनखकृमिकीटपिपीलिकामक्षिकादि उपघातानां दोषानां निवारणाय दीयमाना आज्याहुतिः।
- याम्यम् - येषां मन्त्राणां यमदेवता। यस्य हविर्भागस्य यमदेवता।
- यूपम् - यज्ञकर्मणि यत्र पशोः बन्धनं भवति स स्तम्भः यूप इत्यनेन उच्यते।

- रात्रिसूक्तम् - *रात्रीव्यख्यदायती* इत्यनेन आरब्धं रात्रिः इति देवताकसूक्तम्। (ऋ.१०.१२७.१)
- रौद्रम् - येषां मन्त्राणां रुद्रदेवता। यस्य हविर्भागस्य रुद्रदेवता।
- वारुणीम्/वारुणम् - येषां मन्त्राणां वरुणदेवता। यस्य हविर्भागस्य वरुणदेवता।
- वैश्वदेवम् - येषां मन्त्राणां विश्वेदेवदेवता। यस्य हविर्भागस्य विश्वेदेवदेवता।
- वैष्णवीम्/वैष्णवम्/विष्णुसूक्तम् - येषां मन्त्राणां विष्णुर्देवता। यस्य हविर्भागस्य विष्णुर्देवता।
- व्याहृतिः - भूः, भुवः, स्वः एताः व्याहृतयः।
- व्रात्यस्तोमः - एकं प्रायश्चित्तम् ६.२ प्रकरणे द्रष्टव्यम्।
- शतरुद्रियेण - वेदे विद्यमानाः रुद्रदेवतासम्बन्धिनः मन्त्राः।
- सपिण्डीकरणम् - सपिण्डीकरणम् नाम मृतस्य पूर्वजत्रयेण सह संयोजनम्। सपिण्डीकरणम् प्रायः मृतात् द्वादशेदिने भवति। यावत्पर्यन्तं सपिण्डीकरणं न भवति तावत्पर्यन्तं मृतस्य प्रेतसंज्ञा भवति यदा सपिण्डीकरणम् भवति तदारभ्य पितृसंज्ञा भवति।
- सप्तव्याहृतिः - भूः, भुवः, स्वः, महः, जनः, तपः, सत्यम्, एताः सप्त।
- सप्रणवम् - ओंकारसहितं मन्त्रोच्चारणम् अथवा ओंकारसहिता काचित् क्रिया।
- सान्तपनम् - एकं प्रायश्चित्तम् ६.२ प्रकरणे द्रष्टव्यम्।
- सारस्वतम् - येषां मन्त्राणां सरस्वतिदेवता। यस्य हविर्भागस्य सरस्वतिदेवता।
- सावित्रीं - येषां मन्त्राणां सवितादेवता। यस्य हविर्भागस्य सवितादेवता।
- सौम्यम् - येषां मन्त्राणां सोमदेवता। यस्य हविर्भागस्य सोमदेवता।
- सौरम् - येषां मन्त्राणां सूर्यदेवता। यस्य हविर्भागस्य सूर्यदेवता।
- स्विष्टकृतम् - सर्वेषां हविर्द्रव्याणाम् अवशिष्टभागेन यज्ञस्य अन्ते स्विष्टकृताहुतिः भवति।

# परिशिष्टम् ४

## चित्रसङ्ग्रहः




गृह्यसंस्कारेषु यज्ञस्य प्राधान्यं विद्यते। यज्ञकरणे कस्य किं स्थानं कानि उपकरणानि कानि साधनानि उपयुक्तानि भवन्ति तेषां परिचयः अत्र कारितः अस्ति। उपरितने गृह्यसंस्कारयज्ञविहारे ये क्रमाङ्काः दर्शिताः सन्ति तत्र तस्य स्थानं विद्यते।

१) **यज्ञकुण्डम्/ स्थण्डिलम्** - यत्र अग्निप्रज्वलनं हवनं च भवति। एतस्य आकारः हवनसंङ्ख्यानुसारं न्यूनाधिकः भवति। परं नित्ययज्ञाय यजमानस्य हस्तमात्रं यज्ञकुण्डम्/ स्थण्डिलम् भवति।

२) **देवतास्थानम्** - यस्य कस्यापि यज्ञस्य या कापि आराध्यदेवता भवति तस्याः पूजार्थं यज्ञकुण्डस्य/ स्थण्डिलस्य पूर्वभागे स्थानं निश्चित्तं भवति। यज्ञसमये देवतास्थानं तथा च यज्ञकुण्डम्/ स्थण्डिलम् एतयोः अन्तराले यजमानं ऋत्विजं विहाय अन्येन गमनागमनं न कर्तव्यमिति नियमः वर्तते।

३) **ब्रह्मणः स्थानम्** - यज्ञस्य सम्पूर्णं ज्ञानं यस्य अस्ति सः ब्रह्मा नामकः ऋत्विक् भवति। यज्ञे यदि कोपि दोषः भवति तस्य प्रायश्चित्तस्य दायित्वमपि ब्रह्मणः एव।

४) **यजमानः/यजमानपत्नी अथवा आचार्यः** - यज्ञस्य कार्यं यदा यजमानः स्वयं करोति तदा अत्र यजमानः पत्न्या सह उपविशति। यदा यज्ञः आचार्यद्वारा भवति तदा एतस्मिन् स्थाने आचार्यः उपविशति।

५) **हवनीयस्थाली** - यस्य पदार्थस्य यज्ञः कर्तव्यः तस्य पदार्थस्य पात्रम् अत्र स्थापनीयम्। तिलाः, व्रीहयः, चरुः एतादृशानां हवनीयद्रव्याणां निमित्तं धातुमयं पात्रं भवति। विवाहसमये व्रीहीनां लाजाः हवनीयद्रव्यं भवति। तदा लाजाः शूर्पे स्थापयन्ति।




६) **प्रोक्षणी** - यज्ञीयपात्राणां शुद्ध्यर्थं प्रोक्षणाय जलम् एतस्मिन् पात्रे स्थापयन्ति।



७) **दर्वी** - आज्यहोमम् अनया दर्व्या कुर्वन्ति।



८) **स्रुवा** - चरुः, व्रीहयः, तिलाः, एतेषां हविर्द्रव्याणां हवनसमये एतस्याः उपयोगः भवति।



९) **प्रणीता** - अत्र शुद्धं जलं प्रपूर्य स्थापयन्ति। यज्ञसमाप्तिसमये मार्जनाय उपयोगं कुर्वन्ति।



१०) **आज्यपात्रम्** - होमाय मुख्यभूतं हविर्द्रव्यं आज्यमेव। अन्यानि हविर्द्रव्याणि पर्यायरूपेण भवन्ति अतः प्रत्येकस्मिन् यज्ञसमये आज्यपात्रं भवत्येव।



११) **इध्मा** - यज्ञस्य आरम्भे अग्निः योग्यरीत्या प्रज्वलितः भवतु। एतदर्थं इध्महवनं भवति। पञ्चदशानाम् अथवा अष्टादशानाम् इध्मा वेदशाखाभेदानुसारं भवति।



१२) **बर्हिः** - यज्ञकुण्डस्य पश्चिमभागे आज्यस्थालीं, दर्वीं, हविर्द्रव्यं च स्थापयितुं बर्हिं प्रसारयन्ति। बर्हिः दर्भस्य भवति।



**अरणिः** - काष्ठस्य काष्ठेन सह घर्षणं कृत्वा अग्निनिर्माणस्य यन्त्रम् प्राचीनकाले विकसितमासीत्। तस्य स्पष्टं स्वरूपं नाम अरणिः। एतस्मिन् चित्रे सहजतया ज्ञातुं शक्यते यत् रज्वा मथनं कृत्वा अग्निनिर्माणं कर्तुं शक्यते इति। एतदर्थं यान्त्रिकाय उपयोगाय यस्य कस्यापि काष्ठस्य उपयोगः भवितुमर्हति। परं यत्र घर्षणेन अग्निनिर्माणं भवति तत् काष्ठं शमीवृक्षे जातस्य अश्वत्थवृक्षस्यैव भवति। विवाहादि प्रयोगेषु यत्र यत्र अग्निनाशः वा अग्निसमारोपः भवति। तदनन्तरं पुनः अग्निस्थापनाय अग्निनिर्माणाय एतस्य यन्त्रस्य उपयोगं कुर्वन्ति।



उपनयनसंस्कारे बटवे यानि साधनानि आचार्यः धारयति तेषां परिचयः अत्र दत्तः अस्ति।

**दण्डः** - गुरुः बटवे दण्डं ददाति।

ब्राह्मणाय पालाशदण्डः। क्षत्रियाय औदुम्बरदण्डः। वैश्याय बिल्वदण्डः।







**मेखला** - ब्राह्मणस्य मुञ्जातृणस्य, क्षत्रियस्य धनुषस्य ज्या, वैश्यस्य आवी नाम मेषलोमानां रज्जुः। एषा कटिदेशे त्रिगुणिता वेष्टिता तथा नाभिदेशे ग्रन्थिता भवति।



**अजिनम्** - मृगस्य चर्म प्रावारयितुं तथा च उपवेष्टुम् उपयुक्तं भवति।



**यज्ञोपवीतम्** - यज्ञाय उपवीतम् यज्ञोपवीतम् अतः उपनीतेन सर्वदा यज्ञोपवीतं धारणीयम्।



**यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत्। तत्सर्वं क्षम्यतान्देव प्रसीद परमेश्वर।**

**विसर्गबिन्दुमात्राणिपदपादाक्षराणि च। न्यूनानि चातिरिक्तानि क्षमस्व परमेश्वर।**

# गृह्यसंस्कारप्रायश्चित्तानि

## विषयस्य महत्त्वम्

मानवः जन्मना केवलं मानवः भवति। संस्कारैः तस्मिन् विद्यमानं देवत्वं प्रकाशितं प्रकटितं भवति। मानवस्य देवत्वसिद्ध्यर्थं प्राचीनैः कतिचनसंस्काराः सूचिताः, कृताः, अनुभूताः च। आरम्भे संस्काराणां पद्धतिः तत्तत् देशानुसारिणी, कालानुसारिणी, ज्ञानानुसारिणी च आसीत्। यथा कालः अग्रतां गतः तथा तेषु संस्कारेषु नियमितता, बद्धता, एकसूत्रता, कालसापेक्षता इत्यादयः गुणाः वर्धिताः। तेषां संस्काराणां परम्परा रक्षिता भवतु इति कारणेन संस्कारविधयः सूत्रबद्धपद्धत्या ग्रथिताः अभवन्। सूत्राणां विस्तृतविवरणाय स्मृतयः, कारिकाः, प्रयोगाश्च ग्रथिताः अभवन्। प्राचीनात् कालात् अद्यपर्यन्तम् उपनयन-विवाह-अन्त्येष्टिः इत्येतेषां त्रयाणां संस्काराणां प्रभावः समाजे विद्यते।

## उद्देश्यम्

विभिन्नेषु ग्रन्थेषु उक्तानि प्रायश्चित्तानि तत्तत् संस्कारानुसारं उक्तानि सन्ति। परं समानसंस्काराय विभिन्नैः सूत्रकारैः यानि प्रायश्चित्तानि उक्तानि तेषां तौलनिकम्, विश्लेषणात्मकम् अध्ययनं भवेत्। धर्माचरणात् यदि कोपि भ्रष्टः भवति तर्हि तस्य मार्गदर्शनाय उपयुक्तता भवेत्। धर्माचरणे ये मार्गदर्शनं कुर्वन्ति तेषां साहाय्याय सङ्ग्रहोऽयं उपयुक्तः भवेत्। सूत्रवाङ्मये, स्मृतिवाङ्मये, प्रयोगग्रन्थेषु, प्रायश्चित्तविषयग्रन्थेषु च कीदृशः विस्तारः सङ्क्षेपश्च कृतोस्ति तस्य अध्ययनं भवेत्।

## सर्वेक्षणम्

प्रायश्चित्तविषयस्य पूर्वाध्ययनं केनापि कृतमस्ति वा? अथवा प्रायश्चित्तविषयस्य अध्ययनं कृतं स्यात् परं तस्मिन् अध्ययने गृह्यसंस्काराणाम् अध्ययनं कृतमस्ति न वा इति ज्ञातुं कतिचनशोधप्रबन्धानां सर्वेक्षणं कृतम्। तेषु कतिचनप्रबन्धेषु प्रायश्चित्तविषये द्वयोः मतानां तुलनात्मकम् अध्ययनं विद्यते। कतिचनप्रबन्धेषु विशिष्टस्य प्रायश्चित्तग्रन्थस्य समीक्षणं विद्यते। एकस्मिन् प्रबन्धे श्रौतप्रायश्चित्तानां सङ्ग्रहो विद्यते। परं कुत्रापि गृह्यसंस्काराणां प्रायश्चित्तानां

विशिष्य अध्ययनं कृतं न दृष्टम्। अतः गृह्यसंस्कारप्रायश्चित्तानि इत्यमुं विषयमधिकृत्य शोधनम् आरब्धम्।

**व्याप्तिनिश्चयः**

संशोधनस्य आरम्भे गृह्यसूत्राणि, स्मृतयः, प्रायश्चित्तविषयकाः ग्रन्थाः, प्रयोगग्रन्थाश्च अध्येतव्याः इति धारणा आसीत्। परं यथाक्रमं गृह्यसूत्राणाम् अध्ययनम् आरब्धं, पर्याप्तमात्रेण सन्दर्भाः सङ्गृहीताः च। अतः गृह्यसूत्रपरिमितमेव अध्ययनमिदानीं पर्याप्तं भवेत् इति निश्चित्य ऋग्वेदस्य त्रीणि, शुक्लयजुर्वेदस्य एकं, कृष्णयजुर्वेदस्य नव, सामवेदस्य चत्वारि, अथर्ववेदस्य एकम् एवम् अष्टादशगृह्यसूत्राणां सन्दर्भाः स्वीकृताः सन्ति।

**विषयारम्भः**

न राज्यं नैव राजाऽसीत् न दण्डो न च दाण्डिकः।

धर्मेणैव प्रजास्सर्वाः रक्षन्ति च परस्परम्।।

प्राचीनवाङ्मये प्राचीनस्य समाजस्य चित्रणम् एवं प्रकारेण कृतं दृश्यते। सम्पूर्णः समाजः स्वयमनुशासनेन परस्परं नाम आत्मनः अन्यस्य च रक्षणं करोति स्म। तदा कोऽपि राजा नासीत् न राज्यं न दण्डः नैव दाण्डिकः। यदा समाजे पापपुण्ययोः सङ्कल्पनाः दृढमूलाः आसन् तदा अपराधानां सङ्ख्या समाजे न स्यात्, विरला च स्यात्। यथाक्रमं कालः अतीतः, समाजे काचित् अव्यवस्था आरब्धा। क्रमशः नियन्त्रकस्य आवश्यकता आपतिता। तदा राजा आगतः, तदा दण्डः आरब्धः। यथा लौकिके व्यवहारे तथैव धार्मिकेषु आचारेष्वपि आरम्भकाले दण्डः नाम प्रायश्चित्तं नासीत्। परं कालः अतीतः, समाजे दोषाः उद्भूताः। क्रमशः लौकिके व्यवहारे तथा धार्मिकेषु आचारेष्वपि अकरणं, कालातिपत्यता, कार्यस्य नाशः इत्यादयः दोषाः समुद्भूताः। तदा प्रायश्चित्तानि आरब्धानि।

प्रत्येकं संस्कारस्य निश्चितः कालः, निश्चितं दिनं, निश्चितः समयः, च भवति। यदि तदा संस्कारः न कृतः तर्हि प्रायश्चित्तं करणीयमेव। परं तत्र केवलं धार्मिकं कारणं नास्ति अपि तु सामाजिककारणं, वैद्यकीयकारणं, मानसिककारणम् अपि स्यात्। यथा गर्भाधानस्य विशिष्टकाले गर्भाधाननिमित्तम् आवश्यकानां परिणामानां विचारो भवति यथा गर्भधारणयोग्यता, गर्भसंस्कारः, सुप्रजनत्वम्। तथैव उपनयने विद्याग्रहणयोग्यता, सामर्थ्यं, क्षमता, इत्यादयः

विषयाः चिन्तिताः स्युः। विवाहे गृहस्थाश्रमस्यारम्भः भवति। गृहस्थाश्रमस्य आधारेण एव अन्ये त्रयः आश्रमाः सुस्थिताः भवन्ति। पातिव्रत्यं तथा एकपत्नित्वं समाजस्य धारणाय अत्यावश्यकमेव। अतः समाजस्य व्यवस्था योग्यरीत्या भवतु इति धिया सर्वापि व्यवस्था निर्मिता व्यवस्थापिता इति चिन्त्यते। यदा मनुष्यः स्वयमेव निर्मितानां निश्चितानां च नियमानां पालनम् आचरणं वा न करोति अथवा धार्मिकाचारेष्वपि स्वाधीनतया, पराधीनतया धर्मविरुद्धम् आचरणं करोति तदा समाजस्य धारणाय कटिबद्धाः चिन्तकाः दण्डस्य नाम प्रायश्चित्तस्य योजनां कुर्वन्ति।

दण्डस्य नाम प्रायश्चित्तस्य व्यवस्था समाजाय निरन्तरं आवश्यकी भवति। समाजे विद्यमानाः सर्वेऽपि मानवाः कदापि बुद्ध्या पापाचरणं, धर्मविरुद्धम् आचरणं न कुर्वन्ति। परं पुनः यदि शुद्धाचरणं, योग्याचरणं कर्तुमिच्छा भवति तर्हि प्रायश्चित्तं कृत्वा शिष्टसम्मतमार्गे, धर्ममार्गे पुनः विचरणं शक्यं भवति। अतः एव दण्डस्य, प्रायश्चित्तस्य स्थानं समाजव्यवस्थायां निरन्तरं विद्यते।

## गृह्यः ?

वेदकालात् विविधानाम् आचाराणां वर्णनं विविधेषु ग्रन्थेषु दृश्यते। तत्र महत्त्वपूर्णः आचारः यज्ञः। सर्वविधानां यज्ञानां कर्ता यजमानः सपत्नीकः भवेत् इति प्रायः नियमः भवति। नाम यजमानः गृहिण्या सहितः भवेदिति। आश्वलायनगृह्यसूत्रस्य प्रथमसूत्रे उक्तम् *उक्तानि वैतानिकानि गृह्याणि वक्ष्यामः* इति। सूत्रस्यास्य नारायणवृत्तौ गृहशब्दः भार्यावाचकः इति स्पष्टम्। सुभाषितेष्वपि *न गृहं गृहमित्याहुः गृहिणी गृहमुच्यते* इति सूचितम्। गृहं नाम भवनम्। परं भवनेन गृहमिति संज्ञा पूर्णा न भवति। तत्र यदा गृहिणी उपस्थिता भवति तदा एव गृहमिति संज्ञा पूर्णा भवति। विवाहानन्तरं भार्यया सह ये विधयः भवन्ति ते गृह्याः। अतः विवाहानन्तरमेव गृह्यविधीनाम् आरम्भो भवति।

## संस्कारः ?

विश्वेऽस्मिन् मनुष्यजन्मनः सार्थकता भवतु इति धिया मनुष्यः सर्वदा प्रयत्नरतो भवति। केवलं जन्मना एव मनुष्यजन्मनः सार्थकता न भवति। सार्थकता तदा भवति यदा जन्मना जातः मनुष्यः संस्कारात् विशिष्टं कार्यं तथा विशिष्टं स्तरं साधयति, प्राप्नोति च।

व्याकरणदृष्ट्या सम् उपसर्गपूर्वकस्य कृ धातोः रूपमेतद्। सम्यक् करणं नाम संस्कारः। विविधेषु विषयेषु संस्कारः इति शब्दः उपयुक्तः भवति। संस्काराः मानवजीवने यथा महत्त्वभूताः तथैव परलोकमार्गेऽपि। अतः मनुष्यजन्मनः प्राक् यथा संस्काराः सूचिताः तथैव प्राणोत्क्रमणानन्तरं निर्जीवदेहस्यापि अन्त्यसंस्काराः सूचिताः।

जन्मनः प्राक् गर्भाधानादयः, जन्मानन्तरं जातकर्मादयः, प्राणोत्क्रमणानन्तरम् अन्त्यसंस्कारादयः संस्काराः विधेयाः। संस्काराः द्विविधाः। तत्र ब्राह्माः नाम गर्भाधानादयः दैवाः नाम पाकयज्ञादयः। तत्र ब्राह्मसंस्काराः गर्भाधानम्, पुंसवनम्, अनवलोभनम्, सीमन्तोन्नयनम्, जातकर्म, नामकरणम्, निष्क्रमणम्, अन्नप्राशनम्, चौलम्, उपनयनम्, महानाम्नीव्रतम्, महाव्रतम्, उपनिषद्व्रतम्, गोदानव्रतम्, समावर्तनम्, विवाहः, अन्त्यकर्म इति। तत्र दैवाः संस्काराः त्रिविधाः पाकयज्ञाः, हविर्यज्ञाः, सोमयज्ञाः। तत्र पाकयज्ञाः सप्त, सोमयज्ञाः सप्त एवं प्रकारेण ब्राह्माः तथा दैवाः संस्काराः उक्तास्सन्ति।

## प्रायश्चित्तम्?

शब्दकल्पद्रुमकोषे प्रायश्चित्तशब्दस्य व्युत्पत्तिः एवं दत्तास्ति *प्रायस्य पापस्य चित्तं विशोधनं यस्मात्* इति। वाचस्पत्यम् कोषे शब्दस्यास्य व्युत्पतिः एवं दत्तास्ति *पापक्षयमात्मसाधनत्वेन विधिबोधिते कर्म* इति। आश्वलायनश्रौतसूत्रे उक्तं *विध्यपराधे प्रायश्चित्तिः* (३.१०.१) सूत्रस्यास्य भाष्ये नारायणभट्टेनोक्तं *विहितस्याकरणेऽन्यथाकरणे च प्रायश्चित्तिः कर्तव्या* इत्युक्ते यत् योग्यं यत् शिष्टसम्मतं यत् धर्मसम्मतं तत् नाम विहितम्। तादृशं कार्यं यदि न कृतम् अथवा अन्यप्रकारेण कृतं तर्हि प्रायश्चित्तं करणीयमेव। प्रायश्चित्तम् इति शब्दविषये स्पष्टीकरणं तथा शब्दस्यास्य व्याख्यानं विविधप्रकारेण विविधैः कृतं दृश्यते। यथा मनुना उद्धृतेन अङ्गिरामतेन-

प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते।
तपो निश्चयसंयुक्तं प्रायश्चित्तमितिस्मृतम्।।

प्रायः शब्दः तपः इत्यर्थे योजितः। तपः नाम निश्चितनियमानुसारं निश्चितकालावधौ आचरितव्यं वर्तितव्यमिति। चित्तं नाम निश्चयः। तपसः निश्चयः यदा भवति तदैव तपः सिध्यति। तपसः फलं भवति। अतः निश्चिततपसा यद् सिध्यति तद् प्रायश्चित्तमिति।

## प्रायश्चित्तिः प्रायश्चित्तं वा

विविधेषु ग्रन्थेषु प्रायश्चित्तिः इति शब्दो विद्यते, कुत्रचित् प्रायश्चित्तम्। परं शब्दद्वयमपि समानार्थेनैव उपयुक्तम् अस्ति। ऐतरेयब्राह्मणे *सा तत्र प्रायश्चित्तिः* इति वाक्यं बहुवारं दृश्यते।(३२.१८) आश्वलायनश्रौतसूत्रेऽपि *विध्यपराधे प्रायश्चित्तिः*(पूर्वषट्क.३.१०.१) इति वाक्यं दृश्यते। कौथुमगृह्यसूत्रे *कर्तव्यं स्यात्प्रायश्चित्तिः*(४) इति वाक्यं बहुत्र दृश्यते। कौशिकगृह्यसूत्रे *सा तत्र प्रायश्चित्तिः*(१११.१०) इति वाक्यं विद्यते। प्रायः प्राचीनग्रन्थेषु प्रायश्चित्तिः इति शब्दो विद्यते। व्याकरणशास्त्रे समासाश्रयविधिप्रकरणे *पारस्करप्रभृतीनि च संज्ञायाम्*(६.१.१५७) इति सूत्रस्य विवरणे *प्रायस्य चित्तिचित्तयोः* इति वार्तिकम् उद्धृतमस्ति। तत्र प्रायश्चित्तिः प्रायश्चित्तम् वा द्वयोः शब्दयोः साधुप्रयोगत्वेन उल्लेखो विद्यते। यथा शब्दकल्पद्रुमकोषे प्रायश्चित्तम् इति नपुंसकः शब्दः अस्ति। वैखानसगृह्यसूत्रे *जातकाग्नौ समुत्सन्ने तद्भस्म पूर्वत्समिधमारोप्य लौकिकाग्नौ निधाय प्रायश्चित्तं हुत्वा तथैव जुहुयात्*(६.४) इति। जैमिनिना रचिते मीमासाशास्त्रे *अर्थसमवायात्प्रायश्चित्तमेकदेशेऽपि*(६.४.१०) अत्र प्रायश्चित्तम् इति शब्दो दृश्यते। स्मृतिग्रन्थेषु अपि प्रायश्चित्तम् इति शब्दो दृश्यते। अतः प्रायश्चित्तिः प्रायश्चित्तं वा शब्दार्थस्तु समान एव। अतः कर्तव्यमपि समानमेव।

## प्रथमप्रकरणम्

प्रथमप्रकरणे संस्कारेषु गर्भाधानात् जननपर्यन्ताः संस्काराः वर्णिताः सन्ति। पुंसवनम्, अनवलोभनं, सीमन्तोन्नयनं, विष्णुबलिः एते चत्वारः संस्काराः गर्भसंस्काराः। एते संस्काराः जननात् प्राक्तनाः। प्रथमः गर्भाधानसंस्कारो नाम स्त्रीसंस्काररूपः क्षेत्रसंस्कारः। गर्भधारणायाः प्राक्तनः संस्कारः। अनेन संस्कारेण क्षेत्रं शुद्धं संस्कारितं भवति। गर्भधारणा तदा एव योग्या भवेत् यदा ऋतुकालः योग्ये समये भवेत्, परं यदि अयोग्यसमये ऋतुकालः आरब्धः तर्हि ऋतुशान्तिं कृत्वा तदनन्तरमेव गर्भाधानं कुर्यात्। यदि गर्भाधानसंस्कारम् अकृत्वा एव स्त्रीगमनं कृतं गर्भधारणा च अभवत् तर्हि गर्भाधानसंस्कारस्य लोपकारणात् जातस्य दोषस्य निवारणाय प्रायश्चित्तं कुर्यात्। गर्भधारणायाः लक्षणानि यदा दृश्यन्ते तदा द्वितीये चतुर्थे गर्भमासे पुंसवनसंस्कारो भवति। षष्ठे मासि अनवलोभनं तथा सीमन्तोन्नयनं भवति। एते चत्वारः संस्काराः यदि नाभवन् तर्हि प्रायश्चित्तं कुर्यात्। विष्णुबलिः गर्भस्य अष्टमे मासि भवति। तस्य अकरणे किमपि स्वतन्त्रं प्रायश्चित्तं नोपलभ्यते।

## द्वितीयप्रकरणम्

द्वितीयप्रकरणे जननात् चौलान्ताः संस्काराः स्वीकृताः सन्ति। जातकर्म, नामकरणं, निष्क्रमणम्, अन्नप्राशनं, चौलम् एते संस्काराः बाल्यावस्थायां क्रियमाणाः सन्ति। जननसमये यदि अयोग्यसमयः नाम अयोग्यतिथिः, अयोग्यनक्षत्रम्, अयोग्ययोगः भवेत् तर्हि शान्तिः नाम प्रायश्चित्तं सूचितमस्ति। जनने यदि कापि विकृतिः भवेत् तर्हि प्रायश्चित्तं सूचितमस्ति। त्रयाणां पुत्राणां कन्यानां वा जन्मानन्तरं चतुर्थमपत्यं कन्या पुत्रो वा भवेत् प्रायश्चित्तं कुर्यात्। यदि हीनाङ्गम्, अधिकाङ्गं, दन्तसहितं, अपूर्णकालं, यमलम् एवं विविधप्रकारेण विकृतजननं भवेत् तर्हि प्रायश्चित्तं सूचितमस्ति। नामकरणनिष्क्रमणयोः विषये प्रायश्चित्तं नोक्तम्। अन्नप्राशनसंस्कारेण विना यदि बालेन अन्नं भक्षितं तर्हि प्रायश्चित्तं कर्तव्यम्। चौलसंस्कारस्य राहित्येऽपि प्रायश्चित्तं सूचितमस्ति।

## तृतीयप्रकरणम्

तृतीयप्रकरणे उपनयनसमावर्तनयोः अन्तर्भावः कृतोऽस्ति। ब्रह्मचर्याश्रमस्य आरम्भात् समाप्तिपर्यन्तम् अत्र वर्णनम् अस्ति। उपनयनेन ब्रह्मचर्याश्रमस्य आरम्भो भवति समावर्तनेन ब्रह्मचर्याश्रमस्य समाप्तिः भवति। उपनयनस्य शिष्टसम्मतः शास्त्रसम्मतः कालः यदि अतीतः भवेत् तर्हि प्रायश्चित्तं कर्तव्यं भवति। उपनीतेन ब्रह्मचारिणा व्रते नियमे भवितव्यम्, तेनैव ब्रह्मचारिणः अध्ययनं योग्यरीत्या भवेत्। परं यदि ब्रह्मचारी नियमभङ्गं कुर्यात् तर्हि तेन प्रायश्चित्तं कर्तव्यम्। केवलं प्रायश्चित्तं कृत्वा पुनः व्यवहारयोग्यता न भवेत् तदा पुनः उपनयनं कर्तव्यं भवेत्। ब्रह्मचर्याश्रमस्य कर्तव्यानि समाप्य समावर्तनं कुर्यात्। परं समावर्तनं अकृत्वा विवाहः नाभवत्, तथा च समावर्तितेन स्नातकेन नियमविरुद्धम् आचरणं कृतं तदा प्रायश्चित्तं कर्तव्यं भवति।

## चतुर्थप्रकरणम्

चतुर्थप्रकरणे विवाहसंस्कारः वर्णितोऽस्ति। गृहस्थाश्रमस्य आरम्भः येन संस्कारेण भवति सः विवाहसंस्कारः अत्र स्वीकृतः। विवाहसंस्कारे मुख्यभूतं कार्यं गृह्याग्निसिद्धिः, तस्य गृह्याग्नेः रक्षणं, तस्मिन् अग्नौ नित्यहोमः, पर्वकाले होमः इत्यादिषु कार्येषु यदि दोषः भवेत्।

तर्हि प्रायश्चित्तानि कर्तव्यानि भवन्ति। विवाहानन्तरं विवाहितायाः कन्यायाः योग्यरीत्या स्वगृहं प्रति आनयनम् इति पत्युः दायित्वमेव। परं यदि कन्यायाः आनयनसमये कतिचन विपरीतानि निमित्तानि भवन्ति तर्हि प्रायश्चित्तं कर्तव्यम्। यदि अशुभे दिने, समावर्तनम् अकृत्वा, ज्येष्ठभ्रातुः विवाहात् प्राक् विवाहः कृतः तर्हि प्रायश्चित्तं कृत्वा पुनर्विवाहं कुर्यात्। यदि विवाहसमये पत्नी रजस्वला भवेत् तर्हि प्रायश्चित्तं सूचितमस्ति। यदि ज्येष्ठभ्रातुः विवाहात् प्राक् विवाहः कृतः तर्हि अन्येषु गृह्यसूत्रेषु केवलं प्रायश्चित्तं सूचितमस्ति।

## पञ्चमप्रकरणम्

पञ्चमप्रकरणे अन्त्येष्टिः। प्राणोत्क्रमणानन्तरम् अन्त्येष्टिसंस्कारः। संस्कारोऽयं मृतशरीरस्य भवति। अतः अत्र कर्तृत्वं पुत्रादीनां वंशजानाम् एव। अन्त्यसंस्कारस्य आरम्भः दाहसंस्कारेण भवति परं यदि मृतशरीरं विविधैः कारणैः उपलब्धं न स्यात् तर्हि पालाशविधिः सूचितोऽस्ति। यदि अनायासेन मृत्युः नाभवत् सर्पदंशादिकरणैः अभवत् तर्हि प्रायश्चित्तं कृत्वा दहसंस्कारः कर्तव्यः। मृतशरीरमपि अग्नये आहुतिरूपेण समर्प्यते अतः तत् शरीरं यदि शुनकादिनां स्पर्शेण अशुद्धं जातमस्ति तर्हि शुद्धं कृत्वा दाहसंस्कारः कर्तव्यः। मृतस्य सम्बन्धिनां अशौचनिवृत्तिः, शुद्धिश्च कथं भवेत् तदपि सूचितमस्ति सूत्रेषु। अन्यत् च अन्यानि विविधानि अन्त्येष्टिसम्बन्धीनि प्रायश्चित्तानि च सूचितानि सन्ति। यथा दहनाय आनीतः अग्निः नष्टः भवेत्, प्रेतस्य दहनकालः अतीतः, दशाहक्रियाः न कृताः, सपिण्डीकरणश्राद्धं न कृतम् इत्यादीनि।

## षष्ठप्रकरणम्

षष्ठप्रकरणे विविधनिमित्तेषु समानप्रायश्चित्तम् नाम कतिचनविषयाणां निमित्तम् एकमेवप्रायश्चित्तम् उक्तमस्ति तादृशानि सूत्राणि अत्र सङ्गृहीतानि सन्ति। प्रायश्चित्तानि इति विभागे प्रायश्चित्तानि सूत्रेषु उल्लिखितानि सन्ति परं तेषां स्वरूपं तत्र नास्ति। तादृशाणां विस्तृतं वर्णनम् अस्ति। अद्भुतप्रायश्चित्तानि इति विभागे विविधानाम् अद्भुतप्रसङ्गानां परिहाराय प्रायश्चित्तानि वर्णितानि सन्ति। अन्ते यज्ञकरणे अन्यथाकरणे विपरीतकरणे ये प्रसङ्गाः आपतिताः भवन्ति तेषां निमित्तं प्रायश्चित्तानि यज्ञीयप्रायश्चित्तानि इत्यत्र सन्ति।

## उपसंहारः

- विविधगृह्यसूत्राणाम् अध्ययनं कृत्वा तेषु उल्लिखितानि प्रायश्चित्तानि आदौ सङ्गृह्य तेषु यानि प्रायश्चित्तानि गृह्यसंस्काराणां सम्बद्धानि सन्ति तेषां विशेषतया अत्र विचारः कृतोऽस्ति। आहत्य द्विशतंद्व्यशीतिः (२८८) सन्दर्भाः स्वीकृताः।
- कतिचन गृह्यसूत्रकारैः कतिचन संस्कारविषयाः वर्णिताः परं गृह्यसूत्रेषु अविद्यमानाः अनागताः कतिचन संस्कारविषयाः गृह्यशेषसूत्रे, गृह्यपरिभाषासूत्रे वर्णिताः सन्ति। बोधायनेन अन्त्येष्टिसंस्काराय पितृमेधसूत्रं स्वतन्त्रतया रचितमस्ति।
- कतिचन गृह्यसूत्रेषु प्रत्येकं संस्कारस्य निमित्तं पृथक् प्रायश्चित्तं सूचितम् परं कतिचनसूत्रकारैः संस्काराणाम् अथवा दोषाणां समुच्चयम् उक्त्वा सर्वेषां दोषाणां निमित्तम् एकमेव प्रायश्चित्तम् उक्तम्।
- प्रायश्चित्तस्य स्वरूपम् अपराधानुसारं न्यूनाधिकं वर्तते। कुत्रचित् केवलं विष्णोः स्मरणमात्रेण प्रायश्चित्तं, कुत्रचित् होमः, कुत्रचित् व्रात्यस्तोमः, वा उद्दालकव्रतम् एवं स्वतन्त्रः विधिरेव सूचितः। यावान् दोषः तावत् प्रायश्चित्तमिति।
- प्रायश्चित्तस्य कारणं व्यक्तिसापेक्षं वर्तते। यथा अग्निः तथा च देवतानाम् अन्तरागमने प्रायश्चित्तं सूचितं परं यजमानः यदि अन्तरागमनं करोति तर्हि प्रायश्चित्तं नास्ति। यजमानः विनाकारणं गमनागमनं नैव करोति।
- संस्कारेषु अग्नेः महत्त्वं सर्वत्र दृश्यते। प्रतिसंस्कारविधौ होमस्तु विद्यते। तथैव प्रतिसंस्कारस्य अकरणे अन्यथाकरणे यत् प्रायश्चित्तं सूचितं तदपि होमसहितमेव।
- सर्वेषु गृह्यसूत्रेषु सर्वविधाः संस्काराः वर्णिताः सन्ति परं सर्वेषु गृह्यसूत्रेषु सर्वेषां संस्काराणां विषये तथा च संस्कारस्य अकरणे प्रायश्चित्तानि नोक्तानि। परं प्रयोगग्रन्थेषु सर्वेषामपि संस्काराणाम् उल्लेखाः वर्तन्ते। सहजतया प्रश्नः भवति यत् यस्मिन् गृह्यसूत्रे यस्य संस्कारस्य विषये उल्लेखो नास्ति तथा च यस्य संस्कारस्य अकरणे प्रायश्चित्तमपि उक्तं नास्ति तस्य गृह्यसूत्रस्य अनुयायिभिः कथम् आचारः कर्तव्यः। अत्र मीमांसाशास्त्रस्य आधारेण समाधानं प्राप्तुं शक्यते। जैमिनिरचिते मीमांसाशास्त्रे सर्वशाखाप्रत्ययैककर्मताधिकरणे पूर्वपक्षे शाखाभेदात् कर्मभेदः प्रतिपादितः परं सिद्धान्ते तु या कापि शाखा भवतु यत् किमपि कर्म वा भवतु शाखान्तरस्थोपसंहारन्यायेन यः कोऽपि यस्याः कस्याः अपि शाखायाः

अनुयायी सर्वविधं ग्रन्थान्तरेषु उपदिष्टं कर्मानुष्ठानं कर्तुं शक्नोति इति। अनेन न्यायेन प्रयोगग्रन्थेषु सर्वेऽपि संस्काराः सर्वाणि प्रायश्चित्तानि च विद्यन्ते।

## आधुनिके युगेऽपि प्रायश्चित्तानाम् उपयोगिता

आधुनिके युगे प्रायश्चित्तानाम् उपयोगिता अस्ति न वा इति प्रश्नः स्यात्। कारणम् अत्र उक्तानि प्रायश्चित्तानि संस्काराणाम् अकरणे वा अन्यथाकरणे उक्तानि सन्ति। अत्र संस्कारस्य अन्यथाकरणे नाम अयोग्ये समये करणे अयोग्यपद्धत्या करणे इति आशयोऽस्ति। ये संस्काराः मनुष्यजीवने उपयुक्ताः तेषां समाजजीवनेऽपि उपयोगिता स्यादेव। अतः तेषां संस्काराणाम् अकरणे, अन्यथाकरणे च समाजजीवने अव्यवस्था भवेत् इति भीत्या तदर्थं प्रायश्चित्तानि उक्तानि सन्ति। अतः प्रायश्चित्तेषु सामाजिकः आशयः स्यात्। समाजजीवने द्विविधाः जनाः भवन्ति। केचन स्वप्रेरणया योग्यम् उपयुक्तम् आचरणं कुर्वन्ति। केचन भीत्या योग्याचरणं कुर्वन्ति। समाजस्य योग्याचरणं भवेत् इति सर्वदा अपेक्षा भवति। परं यदि तादृशं योग्याचरणं न भवेत् तर्हि दण्डेन, प्रायश्चित्तेन योग्याचरणे समाजः आनेतव्यः भवेत्। अनेन स्पष्टमेव यत् समाजस्य धारणाय यदा कदापि आधुनिके युगेऽपि प्रायश्चित्तानि आवश्यकानि एव।

यथा उपनयनसंस्कारस्य कालः उक्तः, उपनयनेन अध्ययनस्य आरम्भः भवति। उपनयनस्य अकरणेन बालस्य अध्ययनस्य आरम्भः न भवेत्, अतः योग्ये वयसि अध्ययनस्य अकरणेन समाजाय शिक्षिताः युवकाः प्राप्ताः न भवेयुः। अतः प्रायश्चित्तम् उक्तम्। अन्यत् च ब्रह्मचारिणः आचरणविषये नियमाः उक्ताः सन्ति। तेषां नियमानाम् आचरणं यदि न कृतं तर्हि प्रायश्चित्तमुक्तम्। तत्र उक्ताः कतिचन नियमाः एवं सन्ति। सूर्योदयात् पूर्वम् उत्थितव्यम्, सन्ध्यावन्दनं कर्तव्यम्, स्त्रिया सह सम्पर्कः न भवेत्, निषिद्धदेशगमनं न कर्तव्यम् इत्यादयः। एतेषां नियमानाम् आचरणेन अध्ययनं योग्यरीत्या भवतु इति अपेक्षा अस्ति। अन्यत् च सहोदराणां विवाहः क्रमानुसारं कर्तव्यः, परं ज्येष्ठे अविवाहिते कनिष्ठेन विवाहः कृतः तदा प्रायश्चित्तमुक्तम्। अत्र समानकुटुम्बे सर्वेषां सहोदराणां संस्कारविषये समानपद्धत्या चिन्तनम् आचरणं च भवतु इति भावः स्यात्। यथा जन्मनः क्रमः तथैव संस्काराणामपि क्रमः भवतु इति। अद्यापि ज्येष्ठे अविवाहिते कनिष्ठेन विवाहः कृतः तदा समाजे काचित् अमान्यता दृश्यते।

ज्येष्ठेन किमर्थं विवाहो न कृतः इत्यस्य जिज्ञासापि भवति। अतः संस्कारेपि क्रमः अनुसर्तव्यो भवति।

संस्कारेषु आरोग्यदृष्ट्या चिन्तनं विद्यते। तत्र गर्भकाले गर्भस्य कथं कीदृशं वर्धनं भवति इति विषये साधारणाः अनुभवाः सन्ति। तत्र किञ्चिदपि अयोग्यता न भवतु इति धिया गर्भिण्या कथं वर्तितव्यम् इत्यपि सूचितमस्ति। तद्भिन्नं यदि आचरितं जननवैकृतता भवेत्। तदा जननवैकृते प्रायश्चित्तं सूचितम्। यथा अन्नप्राशनसंस्कारः जन्मनः षष्ठमासि नाम पचनसंस्थायाः विकासानन्तरं भवति। ततःपूर्वं अन्नस्य भक्षणेन बालकस्य पचने क्लेषाः भवेयुः। अतः योग्ये निर्धारिते समये एव अन्नप्राशनं भवेत् अन्यथा प्रायश्चित्तं सूचितम्। उपनयनकालविषयेऽपि चिन्तनं स्यात्। यत् बालकस्य बुद्धेः विकासः यदा भवति यदा बालकः गुरुगृहं गत्वा वासं कृत्वा अध्ययनं कर्तुं शक्नुयात् तदा उपनयनं कर्तव्यम् न तु विलम्बेन।

## अग्रिमं संशोधनम्

प्रबन्धेऽस्मिन् गृह्यसूत्राणामेव सन्दर्भाः स्वीकृताः सन्ति। परम् अन्येऽपि कतिचन ग्रन्थाः विषयममुं प्रस्तावयन्ति। यथा एतेषां गृह्यसूत्राणां भाष्यग्रन्थाः, स्मृतिग्रन्थाः, प्रयोगग्रन्थाः, विवरणग्रन्थाः। एतादृशेषु कतिचनग्रन्थेषु संस्काराणां विषये तथा च संस्काराणाम् अकरणे प्रायश्चित्तानि विवृतानि सन्ति। तेषां सङ्ग्रहः तथा च तेषाम् अद्यतने कालेऽपि उपयोगिता अध्येतव्या भवेत्।

अन्ते चत्वारि परिशिष्टानि योजितानि सन्ति। १)सन्दर्भग्रन्थसूचिः, २)मन्त्रसूचिः, ३)शब्दसूचिः, ४)चित्रसङ्ग्रहः